ISSN 2348-7828

ज्ञान विज्ञान विमुक्तये
UGC Care Listed

# वेदविपाशा

# (VEDA VIPASHA)

Multidisciplinary Peer Reviewed Annual Research Journal

Vol. 12

2025



**CENTRAL SANSKRIT UNIVERSITY**

**VEDAVYAS CAMPUS, BALAHAR**

**Himachal Pradesh-177108**

**www.csu-balahar.edu.in**


बलाहरः, हिमाचलप्रदेशः-१७७१


केन्द्रीयसंस्कृतविश्व



ISSN 2348-7828

# VEDA VIPASHA

*PEER-REVIEWED MULTIDISCIPLINARY ANNUAL RESEARCH JOURNAL*

**VOL. 12.** **2025**

*PATRON*

**PROF. SHRINIVASA VARAKHEDI**
**Vice-Chancellor, Central Sanskrit University, New Delhi**

*CHIEF EDITOR*

**PROF. SATYAM KUMARI**
**Director, Central Sanskrit University, Vedavyas Campus, Balahar, Himachal Pradesh**
**E.mail:-director-balahar@csu.co.in**

*EDITOR*

**PROF. MANJUNATH S.G.**
**Associate Director, Central Sanskrit University, Vedavyas Campus, Balahar, Himachal Pradesh**
**E.mail:-sgmbhat@csu.co.in**

*SUB-EDITORS*

**DR. SHYAM BABU**
Assistant Professor, Sahitya Dept.
C.S.U. Vedavyas Campus, Balahar, Himachal Pradesh
**E.mail:-dr.shyam@csu.co.in**

**DR. PRUSHOTAM**
Assistant Professor, Education Dept.
C.S.U. Vedavyas Campus, Balahar, Himachal Pradesh
**E.mail:-dr.prushotam@csu.co.in**

**DR. RAGHU B. RAJ**
Assistant Professor (Contract), Advait Vedanta Dept.
C.S.U. Vedavyas Campus, Balahar, Himachal Pradesh
**E.mail:-raghu.raj@csu.co.in**

**DR. GOVIND SHUKLA**
Assistant Professor (Contract), Vyakaran Dept.
C.S.U. Vedavyas Campus, Balahar, Himachal Pradesh
**E.mail:-govindshukla590@gmail.com**

**DR. MANISH KUMAR**
Assistant Professor (Contact), English Dept.
C.S.U. Vedavyas Campus, Balahar, Himachal Pradesh
**E.mail:-dr.manish.kumar@csu.co.in**

**DR. YAGYA DUTT**
Assistant Professor (Guest), Jyotish Dept.
C.S.U. Vedavyas Campus, Balahar, Himachal Pradesh
**E.mail:-dryagyadutt@gmail.com**

ISSN 2348-7828

Title : Veda Vipasha ( वेद-विपाशा )

Vol. : : 12

Publication Date : 2025

Price : 500/-

© Vedavyas Campus

Copies : 100

**Printed and Published by** : Prof. Satyam Kumari, Director
Central Sanskrit University, Vedavyas Campus,
Balahar, Himachal Pradesh-177108

**Editor** : Prof. Manjunath S.G.
**Email** : director-balahar@csu.co.in
**Phone** : 7505639178

**Printed at** : Sharma Trading Company
V.P.O. Pragpur Tehsil Pragpur Distt. Kangra H.P.
86288-33269 (M)

**Composed and Designed By** : Ajay Sharma

ISSN 2348-7828

# सम्पादकीयम्......

## उत्कर्षसाधकम् अनुसन्धानम्

स्वतन्त्रताया अमृतमहोत्सवस्य कालोऽयं भारतवर्षस्य उत्कर्षसाधनाय विद्यते। कस्यापि राष्ट्रस्य प्रगतौ अनुसन्धानस्य अप्रतिमं योगदानं भवति। तदर्थं भारतस्य सर्वास्संस्थास्सर्वे विश्वविद्यालयाश्चाहमहमिकया स्पर्द्धन्ते।

एतस्मिन्नेव क्रमे आभारतं व्याप्तपरिसरः उदात्तगुणाकरश्च केन्द्रीयसंस्कृतविश्वविद्यालयः पुरोहितस्य भूमिकामावहति। प्रतिनित्यं नूतनपाठ्यक्रमाणां सञ्चालनम्, विधिकप्राविधिकप्रबन्धनक्षेत्रस्य संस्थाभिस्सह सहयोगसन्धिः तथा सामाजिकसङ्घटनैस्सह मिलित्वा भारतवर्षस्य प्रतिग्रामं सम्प्राप्तिः विश्वविद्यालयममुं विशिष्टे स्थाने स्थापयन्ति।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य देवभूमौ हिमाचलप्रदेशे उपत्यकासु वर्त्तमानात् वेदव्यासाख्यात् परिसरात् द्वादशवर्षेभ्यः '**वेदविपाशा**' पत्रिकारूपा शोधनिर्झरी निरन्तरं प्रवहति। अयम् अस्याः द्वादशतमोऽङ्कः। अस्मिन् न केवलं भारतवर्षस्य विदुषामपितु वैदिशिकानामपि विद्वद्वरेण्यानां शोधालेखाः समुल्लसन्ति।

तिसृसु संस्कृतहिन्द्याङ्ग्लभाषासु रचितानि द्वात्रिंशत् शोधपत्राणि अस्मिन्नङ्के गुम्फितानि सन्ति। अत्र न केवलं प्राच्याः वेदवेदाङ्गसम्बद्धाः विषयाः वर्तन्तेऽपितु साम्प्रतिकाः विधि-कला-विज्ञान-वाणिज्यादिविषया अपि नूतनां सार्वभौमिकीञ्च चिन्तनधारां समेत्य नूतनानामायामानामुद्घाटनं कुर्वन्ति। परन्त्वत्राप्येषास्याङ्कस्य विशेषता यदाधुनिकदृष्टिकोणस्य पृष्ठभूमित्वेन भारतीयज्ञानपरम्परा आदृतास्सन्त्यतः, प्रत्येकं शोधशीर्षकस्य भारतीया दृष्टिरादौ प्रतिपादिता विद्यते।

अन्ते सुधीनां पाठकानां हस्तेषु '**वेदविपाशा**' नामधेयायाः पूर्वे विश्वविद्यालयानुदानायोगस्य संरक्षितसूच्यां विद्यमानायाः वर्त्तमाने च सन्दर्भित-समीक्षितशोधपत्रिकायाः द्वादशतमोऽयमङ्कः सश्रद्धं समर्प्यते।

'राष्ट्राय स्वाहा। राष्ट्राय इदम्, इदन्न मम।''

**सम्पादकः**

ISSN 2348-7828



# परामर्शदातृ-समितिः

## *(ADVISORY BOARD)*

**प्रो. विजय कुमार सी. जी.**
महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी, मध्यप्रदेशः

**प्रो. जी. एस. आर. कृष्णमूर्तिः**
कुलपतिः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः

**प्रो. लक्ष्मीनिवासपाण्डेयः**
कुलपतिः, श्रीकामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः, बिहारः

**प्रो. आर. प्रह्लादजोशी**
कुलपतिः, कुमारभास्करविश्वविद्यालयः, असमः

**प्रो. सुकान्तकुमारसेनापतिः**
कुलपतिः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, गुजरातः

# समीक्षा-समितिः

## *(REVIEW COMMITTEE)*

**प्रो. पी. वी. बी. सुब्रह्मण्यम्**
निदेशकः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, पौड़ी, उत्तराखण्डः

**प्रो. के. भरतभूषणः**
शिक्षासंकायाध्यक्षः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

**डॉ. बृहस्पतिमिश्रः**
सहाचार्यः, केन्द्रीयविश्वविद्यालयः, धर्मशाला, हिमाचलप्रदेशः

**डॉ. सुमनप्रसादभट्टः**
सहायकाचार्यः, उत्तराखण्डसंस्कृतविश्वविद्यालयः, हरिद्वारम्, उत्तराखण्डः

**डॉ. लेखरामदन्नाना**
सहायकाचार्यः, संस्कृत-प्राकृतपालिविभागः, इलाहाबादविश्वविद्यालयः, उत्तरप्रदेशः

ISSN 2348-7828

# विषयानुक्रमणिका


1. सम्पादकीयम् (iii)
2. परामर्शदातृसमितिः (iv)
3. समीक्षा-समितिः (iv)

| क्र. सं. | विषयः | लेखकः | पृ. सं. |
|---|---|---|---|
| 1. | अद्वैतसिद्धान्ते प्रत्यक्षप्रमालक्षणप्रतिपादनपूर्वकज्ञानगतप्रत्यक्षत्वप्रयोजकविचारः | डॉ. तुलसीकुमारजोशी | 1-7 |
| 2. | प्रत्यक्षाभासः | डॉ. भास्करभट्टः जोशि | 8-9 |
| 3. | विविधशास्त्रदृशा शाब्दबोधकारणीभूताकाङ्क्षाविमर्शः | डॉ. जगन्नाथशर्मा सापकोटा | 10-15 |
| 4. | महाभाष्यटीकासूक्तिरत्नाकरस्य समीक्षात्मकमध्ययनम् | डॉ. प्रियब्रतमिश्रः | 16-20 |
| 5. | गुणदीर्घोत्त्वानामपवादः | डॉ. गणेश्वरनाथझाः | 21-27 |
| 6. | शिशुपालवधमहाकाव्ये व्यवहारकला नीतिबोधश्च | डॉ. राजकुमारमिश्रः | 28-30 |
| 7. | प्राचीन-भारतीय-राजशास्त्रस्य वर्तमान-राजनीतौ प्रासङ्गिकता | श्री ओंकारचन्दः | 31-35 |
| 8. | शाब्दबोधस्याङ्गानि | डॉ. श्यामसुन्दरशर्मा | 36-41 |
| 9. | संस्कृतवाङ्मये चारित्र्यशिक्षाविधानम् | डॉ. अमितकुमारद्विवेदी | 42-45 |
| 10. | समासशक्तिविषये कौण्डभट्टमतविमर्शः | डॉ. आस्तीकद्विवेदी | 46-51 |
| 11. | जैनवृत्तिस्वरूपविमर्शः | डॉ. बिपिनकुमारझा, डॉ. दीपिका दीक्षित | 52-54 |
| 12. | सिद्धान्तशेखरीयक्षेत्रव्यवहारविमर्शः | दिनेशमोहनजोशी, गिरीशभट्ट बि., दिवाकरशर्मा | 55-68 |
| 13. | व्याकरणशास्त्रे रचनात्मकविधेः प्रयोगः | डॉ. परमेशकुमारशर्मा | 69-81 |
| 14. | साहित्यशास्त्र में प्रतिपादित आगम तत्त्वविमर्श | डॉ. राजकुमार मिश्र | 82-84 |
| 15. | पर्यावरण संरक्षण की वैदिक दृष्टि | डॉ. सन्दीप कुमार | 85-88 |
| 16. | सरमा-पणि संवाद के विविध परिप्रेक्ष्य | डॉ. प्रेम बल्लभ देवली | 89-91 |
| 17. | वैदिक साक्ष्य के आलोक में भारत के विकास का पुनरावलोकन | डॉ. अखिलेश कुमार मिश्र | 92-98 |
| 18. | त्रिक दर्शन में प्रमाता एवं तत्त्वमीमांसा विषयक अवधारणाएँ | डॉ. रमेश चन्द्र नैलवाल, डॉ. योगेश पाण्डेय | 99-102 |
| 19. | 'मानस-महाकाव्य में देववाणी संस्कृत की महत्ता' | डॉ. विजय सिंह मीना | 103-106 |
| 20. | हिमाचल की संस्कृति व परम्परा में नाग देवता का अवलोकन | लकेश कुमार | 107-111 |
| 21. | जिला सिरमौर की भूमि तथा लोग | रामचन्द्र शर्मा | 112-116 |
| 22. | स्वामी विवेकानन्द की संचार नीति में राष्ट्रवाद की अभिव्यक्ति: एक अध्ययन | हर्ष कुमार, डॉ. रवीन्द्र सिंह, सुनील कुमार | 117-120 |
| 23. | भर्तृहरि एवं पतञ्जलि के मत में शब्दार्थसम्बन्ध | प्रतीक मिश्र | 121-125 |
| 24. | वेदार्थ निर्णय में गृह्यसूत्रों की उपयोगिता | आदित्य सिंह | 126-129 |

| | | | |
|---|---|---|---|
| 25. | The Analysis of Four Fundamental Mathematical operations in Ancient Sanskrit Texts (In perspective of Addition, Subtraction, Multiplication & Division) | Prof. Daya Shankar Tiwari | 130-133 |
| 26. | Value Education : A Discourse | Prof. Pawan Sinha | 134-141 |
| 27. | Synthesis of Art through Art-Integrated Education Across the Curriculum: Self-Identification and Panch Kosha Vikas | Prof. Susmita Lakhyani<br>Shivam Luthra | 142-148 |
| 28. | Federated Proximal in Privacy-Preserving for Disease Prediction Using Heterogeneous Healthcare Data | Sh. Amit walia,<br>Dr. Randeep sing | 149-162 |
| 29. | Advancements in Shape-Based Object Recognition: A Review of Digital Image Processing Approaches | Amar Chand,<br>Dr. Randeep sing | 163-174 |
| 30. | Network Analysis and Scientific Mapping of Silviculture Research in Top Ten Countries | Sharma, Diksha<br>Parmar, Akanksha, Vikramjeet | 175-190 |
| 31. | Harmonizing Global Efforts : Climate Treaties in the intrenational sphere | Neelam Rai, Dr. Veer Mayank | 191-199 |
| 32. | Impact Association Between Emotional Intelligence & Organizational Citizenship Behaviour of Teachers-Mediating Role of Performance of Students | Manisha, Nisha Chanana | 200-210 |

ISSN 2348-7828

# अद्वैतसिद्धान्ते प्रत्यक्षप्रमालक्षणप्रतिपादनपूर्वकज्ञानगतप्रत्यक्षत्वप्रयोजकविचारः

डॉ. तुलसी कुमार जोशी[1]

**शोधसारः**

सर्वत्रास्तिकनास्तिकदर्शनेषु प्रमाणमीमांसाऽवश्यकाङ्गत्वेन कृता दृश्यते। तत्र "प्रमेयसिद्धिः प्रमाणाद्धि" इति हि प्रामाणिकानामाभाणकम्। प्रमेयविषयकज्ञानप्रयोजकं प्रमाणं विना प्रमाणजन्यज्ञानविषयीभूतं प्रमेयं विना वा नैव कश्चित् किञ्चिदप्यभिधत्ते। अतो दार्शनिकैर्निजनिजनयमनुसृत्य दूरमलक्ष्यं निक्षिप्य लक्ष्यमात्रानुसारि प्रमाणलक्षणमभ्यधायि। अद्वैतवेदान्तदर्शनेऽपि प्रत्यक्षप्रमाया अथ च प्रत्यक्षप्रमाणस्य लक्षणनिरूपणप्रसङ्गे दृश्यते काचिद्विलक्षणा पद्धतिः। इयञ्च रीतिर्न दर्शनान्तरे कुत्राप्यनुसृता वर्तते। यद्यपि अन्येषु दर्शनेष्वपि प्रत्यक्षमाश्रित्य बहुधा विचारः कृतो वर्तते तथापि स सर्वोऽपि विचारः युक्त्यनुभवाद्यनुसारी भवति। अत्र तु दर्शने युक्त्यनुभवाभ्यां सह श्रुतेरपि योजना तत्तत्प्रमेयनिरूपणप्रसङ्गे प्रत्यक्षप्रमास्वरूपनिरूपणप्रसङ्गे च दरीदृश्यते इति भवत्यस्य दर्शनस्य दर्शनान्तरापेक्षयाऽनितरसाधारणं वैशिष्ट्यम्। अत एव ब्रह्मानन्दस्वामिपादैः – दर्शनेषु सर्वेषु दर्शनीयतममिदं दर्शनमिति न्यायरत्नावल्यामुक्तम्। अत्र शोधप्रबन्धे मया दर्शनान्तरेषु विशिष्य न्यायदर्शनीयप्रत्यक्षलक्षणं कुतो नाद्वैतिनामभिमतमिति विषये आदौ युक्तिपुरस्सरं विचारान् प्रदर्श्य अद्वैतिनामभिमतप्रत्यक्षस्वरूपं किमिति प्रतिपादयिष्यते। प्रत्यक्षस्वरूपनिरूपणानन्तरं ज्ञानगतप्रत्यक्षत्वप्रयोजकविषयेऽद्वैतिनां या प्रक्रियाऽभिमता वर्तते सा प्रक्रिया प्रदर्शयिष्यते।

**<u>कुञ्जिशब्दाः</u> - प्रमाणम्, प्रमा, प्रत्यक्षम्, चैतन्यम्, अन्तःकरणवृत्तिः, ज्ञानत्वम्, प्रयोजकत्वम्, प्रामाण्यम्।**

**विषयप्रस्तावना**

ज्ञानस्य प्रामाण्ये विषयस्याबाधितत्वं भवति प्रयोजकम्। न हि ज्ञानं बाधितं विषयं विषयीकुर्वद्भवति प्रमाणम्। तत्र व्यावहारिकघटादिविषयविषयकज्ञानानान्तु व्यवहारकालाबाध्यविषयविषयकत्वेन व्यावहारिकतत्त्वावेदकत्वरूपं प्रामाण्यं, जीवब्रह्मैक्यरूप-विषयस्य तु त्रिकालाबाध्यत्वरूपपारमार्थिकत्वेन तद्विषयकज्ञानस्य पारमार्थिकतत्त्वावेदकत्वरूपं प्रामाण्यम् अद्वैतिनामभिमतम्। यद्यपि अबाधितविषयकत्वं व्यावहारिकतत्त्वावेदके पारमार्थिकतत्त्वावेदके च समानं तथापि व्यावहारिकतत्त्वावेदके व्यवहारकालाबाध्यविषयविषय-कत्वरूपमबाधितत्वम्, ऐक्यज्ञाने परं त्रिकालाबाध्यविषयकत्वरूपम् इत्युभयोः प्रामाण्ययोः स्वरूपे वैलक्षण्यं भवति। इत्थञ्च द्विविधं प्रमानिष्ठं प्रामाण्यं पर्यवस्यति। तत्र जीवब्रह्मैक्यरूपविषयातिरिक्तविषयविषयकप्रमानिष्ठं प्रामाण्यं व्यवहारकालाबाध्यविषयविषयकत्वरूपम्। इदञ्च तद्वति तत्प्रकारकत्वरूपमपि वक्तुं शक्यते। क्वचिच्च "सोऽयं देवदत्तः" "प्रकृष्टप्रकाशश्चन्द्रः" इत्यादिलौकिकवाक्यजन्यनिर्विकल्पकप्रत्यक्षे तद्वतितत्प्रकारकत्वस्याभावेऽपि व्यवहारकालाबाध्यविषयकत्वेनैव प्रामाण्यं वक्तव्यम्। तत्त्वमस्यादिवाक्यजन्यजीवब्रह्मैक्यमात्ररूपविषया-वगाहिनिर्विकल्पकज्ञाननिष्ठञ्च प्रामाण्यमपि न तद्वतितत्प्रकारकत्वरूपं तज्ज्ञानस्य अखण्डधीरूपत्वेन निष्प्रकारकत्वात् किन्तु त्रिकालाबाध्य-विषयकत्वरूपमेव। एवञ्च द्वितीयं पारमार्थिकतत्त्वावेदकं प्रामाण्यं निर्विकल्पब्रह्मसाक्षात्कारमात्रवृत्ति भवतीति कृत्वा द्विविधस्यापि प्रामाण्यस्य प्रत्यक्षज्ञानवृत्तितैव पर्यवस्यति। तत्रापि जीवब्रह्मैक्यरूपविषयातिरिक्ताबाधितविषयविषयकसविकल्पकनिर्विकल्पकप्रत्यक्षप्रमायां व्यावहारिक-तत्त्वावेदकं प्रामाण्यं जीवब्रह्मैक्यसाक्षात्काररूपनिर्विकल्पकप्रमायां तु पारमार्थिकतत्त्वावेदकत्वरूपं प्रामाण्यमिति विवेकः। प्रत्यक्षातिरिक्तेषु ज्ञानेषु तु व्यावहारिकतत्त्वावेदकत्वरूपमेव प्रामाण्यम्। इत्थञ्च उक्तं द्विविधं प्रामाण्यं कुत्र कुत्र तिष्ठतीति अधः प्रदर्शितेन चित्रेणावगन्तुं शक्यते–

प्रामाण्यस्वरूपतदाश्रयबोधकं चित्रम्




तत्र प्रामाण्यस्य आश्रयभूतं सर्वमपि ज्ञानं वृत्त्युपहितचैतन्यात्मकमेव। शुद्धचैतन्यात्मकं यत्स्वरूपज्ञानं तत्तु न प्रामाण्याश्रयभूतं तस्य निर्धमकत्वेन प्रामाण्यरूपधर्माश्रयत्वासम्भवात्। तत्र प्रामाण्याश्रयभूतेषु वृत्त्युपहितचैतन्यरूपप्रत्यक्षादिज्ञानेष्वन्यतमस्य प्रत्यक्षज्ञानस्योत्पत्ति-प्रक्रियाविषये लक्षणविषये च दर्शनेषु बहुविधा विप्रतिपत्तयो दृश्यन्ते। अत्र शोधप्रबन्धे मया दर्शनान्तरेषु विशिष्य न्यायदर्शनीयप्रत्यक्षलक्षणं

[1] वसन्तमहिलामहाविद्यालयः, राजघट्टः,वाराणसी, उत्तरप्रदेशः, भारतम्।

कुतो नाद्वैतिनामभिमतमिति विषये आदौ युक्तिपुरस्सरं विचारान् प्रदर्श्य अद्वैतिनामभिमतप्रत्यक्षस्वरूपं किमिति प्रतिपादयिष्यते। प्रत्यक्षस्वरूपनिरूपणानन्तरं ज्ञानगतप्रत्यक्षत्वप्रयोजकविषयेऽद्वैतिनां या प्रक्रियाऽभिमता वर्तते सा प्रक्रिया प्रदर्शयिष्यते।

**प्रत्यक्षप्रमाणलक्षणपरीक्षा**

प्रमाणेषु सर्वेष्वपि ज्येष्ठतमं प्रमाणम्प्रत्यक्षम्। तस्य किं लक्षणमिति जिज्ञासायां यद्यपि प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणमिति पदव्युत्पत्तिनिमित्तं लक्षणं लभ्यते तथाप्येतल्लक्षणस्वीकारे अन्योऽन्याश्रयाशङ्का प्रथमतो जायते। यतोहि प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणमित्युच्यमाने घटितबुद्धौ घटकज्ञानस्य कारणत्वेन का नाम प्रत्यक्षप्रमेति जिज्ञासायां प्रत्यक्षप्रमाणजन्यं ज्ञानं प्रत्यक्षप्रमेति वक्तव्यतया प्रत्यक्षप्रमाज्ञानाधीनं प्रत्यक्षप्रमाणज्ञानं प्रत्यक्षप्रमाणज्ञानाधीनञ्च प्रत्यक्षप्रमाज्ञानमिति कृत्वा स्वज्ञप्स्यधीनज्ञप्तिकत्वरूपोऽन्योन्याश्रयो[1] भवति। तथाहि स्वं प्रत्यक्षप्रमा तज्ज्ञप्स्यधीनज्ञप्तिकत्वं प्रत्यक्षप्रमाणस्य, एवमेव स्वं प्रत्यक्षप्रमाणन्तज्ज्ञप्स्यधीनज्ञप्तिकत्वं प्रत्यक्षप्रमाया अस्तीत्यन्योन्याश्रयः, तथा च अन्योन्याश्रयदोषग्रस्तत्वादिदं लक्षणमयुक्तम्। यद्यपि स्थितावुत्पत्तौ चान्योन्याश्रयो न दोषावहस्तथापि ज्ञप्तौ तस्य दोषत्वं स्वीक्रियते। अयञ्चान्योन्याश्रयः प्रत्यक्षप्रमायाः प्रत्यक्षप्रमाणजन्यज्ञानत्वमिति लक्षणस्वीकार एव सम्भवति, यदि चैतद्दोषवारणाय इन्द्रियजन्यज्ञानत्वम्प्रत्यक्षप्रमाया लक्षणमित्युच्यते तथा सति अन्योन्याश्रयदोषस्य वारणेपि प्रत्यक्षप्रमालक्षणस्य स्मृत्यनुमित्यादावतिव्याप्तिः, अजन्येश्वरप्रत्यक्षे चाव्याप्तिः स्यात्, सर्वेषामपि ज्ञानानां मनोरूपेन्द्रियजन्यत्त्वेन स्मृत्यनुमित्यादावपि इन्द्रियजन्यज्ञानत्वस्य सत्वात्, परमते ईश्वरप्रत्यक्षस्य चाजन्यतया जन्यत्वघटितलक्षणस्य तत्र वक्तुमशक्यत्वात्। यदि च स्मृत्यनुमित्यादावतिव्याप्तिवारणाय इन्द्रियत्वेन इन्द्रियजन्यं ज्ञानं प्रत्यक्षमित्युच्यते अर्थात् इन्द्रियत्वावच्छिन्नजनकतानिरूपितजन्यतावज्ज्ञानं प्रत्यक्षमित्युच्यते चेत्तथा सति यद्यपि स्मृत्यनुमित्यादेश्च मनस्त्वेनेन्द्रियजन्यत्वात् इन्द्रियत्वेनेन्द्रियजन्यत्वाभावान्न तत्रातिव्याप्तिः तथापि सर्वथाऽजन्य ईश्वरप्रत्यक्षेऽव्याप्तिः तदवस्थैव स्यात्, किञ्च अद्वैतसिद्धान्ते मनस इन्द्रियत्वनिरासात् साक्ष्यात्मके प्रत्यक्षे सुखादिप्रत्यक्षे च इन्द्रियत्वेनेन्द्रियजन्यत्वाभावात् तत्राव्याप्तिरपि स्यात्। यदि च विषयजन्यज्ञानत्वं प्रत्यक्षस्य लक्षणमित्युच्यते चेत् तदपि न वक्तुं शक्यम्, मनोविशेष्यकानुमित्यादावतिव्याप्तेः, सुखादिप्रत्यक्षे चाव्याप्तेः। तथाहि- मनसो ज्ञानसामान्यं प्रति कारणत्वेन तज्जन्यत्त्वं सर्वेषां ज्ञानानां वक्तव्यम्। अस्यां स्थितौ "मन इन्द्रियं प्रत्यक्षज्ञानकरणत्त्वात् चक्षुरादिवत्" इति मनोविशेष्यकानुमितावपि मनोजन्यत्वमस्त्येव। अस्याञ्चानुमितौ मनसः पक्षत्वेन विषयत्वमपि वर्तते अतः अनुमितिविषयीभूतमनोजन्यत्वस्यास्यामनुतौ सत्त्वात् अतिव्याप्तिस्स्यात्। किञ्च सुखादिप्रत्यक्षस्थले सुखादीनां ज्ञाततयैवानुभवविषयत्वात् तेषां कार्यकालवृत्तितया हेतुत्वेन सुखादीनां ज्ञानरूपकार्यनियतपूर्ववृत्तित्वाभावान्न सुखादिप्रत्यक्षं प्रति विषयस्य कारणत्वं वक्तुं न शक्यते मिति सुखादिप्रत्यक्षे विषयजन्यत्वाभावात् अव्याप्तिः।

**नैयायिकोक्तप्रत्यक्षलक्षणपरीक्षा**

नैयायिकैः ईश्वरप्रत्यक्षे जन्यत्वघटितलक्षणस्याव्याप्त्या जन्यत्वाघटितं "ज्ञानाकरणकं ज्ञानं प्रत्यक्षमि'ति सर्वप्रत्यक्षसाधारणं लक्षणान्तरं स्वीक्रियते। इदञ्च लक्षणं न पूर्वोक्तस्थलेषु अतिव्याप्तमव्याप्तं वा भवति। तथाहि मनोविशेष्यकानुमितिस्थले व्याप्तिज्ञानरूपकरणजन्यत्वस्य सत्त्वात् नातिव्याप्तिः। सुखादिप्रत्यक्षस्य च ज्ञानरूपकरणजन्यत्वाभावात् तत्र ज्ञानाकरणकज्ञानत्वस्य सत्त्वेन नाव्याप्तिः। तथा चेदमेव निर्दुष्टं प्रत्यक्षलक्षणं किमर्थमद्वैतिभिर्न स्वीक्रियते इति चेदत्रोच्यते –

ज्ञानरूपकरणाजन्यज्ञानत्वस्य प्रत्यक्षलक्षणत्वे स्मृतौ अतिव्याप्तिः स्यात्। स्मृतिं प्रति ज्ञानस्य कारणत्वेऽपि संस्कारस्यैव करणत्वमङ्गीकरणीयम्। अन्यथा परमते यथार्थस्मृतिकरणत्वेन स्मृतिजनकानुभवस्य पृथक्प्रामाण्यापत्तिः स्यात्। न चेष्टापत्तिर्वक्तुं शक्यते प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति प्रमाणसङ्ख्याबोधकसूत्रविरोधात्। किञ्च यदि संस्कारद्वारा अनुभवस्यैव स्मृतिं प्रति करणत्वमभ्युपगम्यते तथा सति स्मृतावतिव्याप्तेरभावेऽपि प्रत्यभिज्ञायां प्रत्यक्षलक्षणलक्ष्यभूतायामव्याप्तिस्स्यात्। एवमेव ज्ञायमानलिङ्गस्य करणत्वं वदतां प्राचीननैयायिकानां मते अनुमितावप्यतिव्याप्तिस्स्यात्। तस्माज्ज्ञानकरणाजन्यज्ञानत्वस्य लक्षणत्वं न सम्भवति। नापि ज्ञानाजन्यज्ञानत्वं लक्षणं सम्भवति तथा सति स्मृतौ अनुभवजन्यत्वस्यैव सत्त्वेनातिव्याप्तेरभावेऽपि विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणतावादिनये विशिष्टप्रत्यक्षमात्रेऽव्याप्तिः स्यात्। येषाञ्च मते विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्त्वं न स्वीकृतमस्ति तेषामपि मते प्रत्यक्षज्ञानमात्रस्यैव ईश्वरज्ञानरूपसाधारणकारणजन्यत्वात् असम्भवापत्तिः। अत इदमपि लक्षणमनुचितमेव।

यदि च साक्षात्वजातिमत्त्वं प्रत्यक्षस्य लक्षणं स्मृत्यादिस्थले अनुव्यवसाये साक्षात्त्वजातेरविषयीकरणान्नातिव्याप्तिः, प्रत्यभिज्ञायाञ्च तादृशानुव्यवसायबलात् साक्षात्त्वजातेः सत्त्वेन अनाव्याप्तिरिति सर्वत्र लक्षणसमन्वयः इत्युच्यते तदा अद्वैतिनां मते ज्ञानरूपस्य ब्रह्मण एकत्वेन साक्षात्वस्यैकव्यक्तिमात्रविश्रान्तत्वेन जातित्वासम्भवात् तत्राव्याप्तिस्स्यात्। एवञ्च नैयायिकोक्तप्रत्यक्षलक्षणं नाद्वैतिनामभिमतं भवति। प्रत्यक्षलक्षणस्यैव दुर्निरूप्यत्वात् परमतरीत्या प्रत्यक्षप्रमाणलक्षणमप्यशक्यनिरूपणमेवेति अद्वैतिभिः पृथगेव प्रत्यक्षप्रमालक्षणमङ्गीक्रियते।

[1] "नन्वयुक्तमिदं लक्षणं प्रत्यक्षप्रमायाः परस्पराश्रयत्वात्।" शिखामणिः

**अद्वैतसिद्धान्ताभिमतप्रत्यक्षप्रमालक्षणम्**

पूर्वोक्तरीत्या सर्वेषामपि लक्षणत्वेन पराभिमतानामव्याप्त्यादिदूषणगणग्रस्तत्वेन दूरमलक्ष्यं निक्षिप्य लक्ष्यमात्रानुसारि श्रुतिसम्मतं प्रत्यक्षप्रमाया लक्षणं प्रतिपादयता श्रीमद्धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषायामुक्तं यत्- "**प्रत्यक्षप्रमात्वत्र चैतन्यमेव**"।

अयम्भावः - अद्वैतिनां नये "**सत्यं ज्ञानमनन्तं ब्रह्म**" इत्यस्यां श्रुतौ ज्ञानपदस्य ब्रह्मपदेन सह सामानाधिकरण्यदर्शनात् ब्रह्मणो ज्ञानरूपत्वमङ्गीक्रियते। तच्च ज्ञानन्न प्रमाणादिजन्यं ज्ञानमिति वक्तुं शक्यते ब्रह्मणो नित्यत्वबोधकश्रुतिस्मृतिविरोधापत्तेः। तथाहि स्मृतिः–

**न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।**

**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥**

नापि तज्ज्ञानमनेकमिति वक्तुं शक्यं, ब्रह्मणोऽद्वितीयैकत्वबोधकश्रुतिविरोधात्। तथाहि श्रुतिः –"**एकमेवाद्वितीयं ब्रह्म**"। न वाऽनुमित्यादिस्वरूपं तज्ज्ञानं "**यत्साक्षादपरोक्षाद्ब्रह्म**" इति श्रुतिव्याकोपापत्तेः। अतः स्वरूपभूतं ज्ञानं तत्तच्छ्रुत्यनुरोधेन नित्यमेकमपरोक्षात्मकमेव स्वीकर्तव्यम्। अत एव परिभाषाकृतोक्तं प्रत्यक्षप्रमात्वत्र चैतन्यमेव इति। अस्य परिभाषाग्रन्थस्यायमभिप्रायः–

चैतन्यमेव प्रत्यक्षप्रमायाः लक्षणमर्थात् स्वरूपम्। अत्र चैतन्यमित्यनेन वृत्त्युपहितं वृत्त्यभिव्यक्तं वा चैतन्यमेव ग्राह्यं न तु शुद्धम्। यतोहि अज्ञाननिवर्तकत्वेनैव ज्ञानस्य प्रमात्वं वक्तव्यम्। शुद्धस्य चैतन्यस्य अज्ञाननिवर्तकत्वाभावात् प्रमात्वं न सम्भवति। अतः प्रत्यक्षप्रमा त्वत्र चैतन्यमेवेति ग्रन्थे प्रमापदप्रयोगात् चैतन्यपदेन वृत्त्युपहितं वृत्त्यभिव्यक्तं वा चैतन्यं ग्राह्यम्। यद्यपीदं भ्रमप्रमासाधारणं प्रत्यक्षलक्षणं भवति तथापि परिभाषायामितः पूर्वं प्रमालक्षणं निरूपितमिति कृत्वा अनधिगताबाधितार्थविषयकं वृत्त्युपहितं तदभिव्यक्तं वा चैतन्यनिष्ठचैतन्यत्वं प्रत्यक्षप्रमात्वमित्यभिप्रायेण प्रत्यक्षप्रमा त्वत्र चैतन्यमेवेत्यत्र प्रमापदप्रयोगो ग्रन्थकारैः कृतः। उक्तञ्च ग्रन्थकारैः –"यदा तु प्रत्यक्षप्रमाया एव लक्षणं वक्तव्यं तदा पूर्वोक्तलक्षणेऽबाधितत्वं विषयविशेषणं देयम्। शुक्तिरूप्यादिभ्रमस्य संसारकालीनबाधविषयप्रातिभासिकरजतादिविषय-कत्वेनोक्त-लक्षणाभावान्नातिव्याप्तिः। तत्करणञ्च प्रत्यक्षप्रमाणम्"। इदमत्रावधेयम् –

अद्वैतसिद्धान्ते सर्वत्र ज्ञानस्थले ज्ञानस्य चैतन्यात्मकत्वेन प्रत्यक्षत्वमेव स्वीक्रियते। अनुमित्यादिपरोक्षज्ञानस्थलेऽपि चैतन्यस्य स्वांशे प्रत्यक्षत्वमिष्टमेव। तदुक्तं परिभाषाकृतैवाग्रे "ज्ञप्तिगतप्रत्यक्षत्वस्य सामान्यलक्षणं चित्त्वमेव। पर्वतो वह्निमानित्यादावपि वह्न्याकारवृत्त्युपहितचैतन्यस्य स्वांशे स्वप्रकाशतया प्रत्यक्षत्वात्" इति। एवञ्च परोक्षज्ञानस्थले ज्ञानांशे प्रत्यक्षत्वं विषयांशे च परोक्षत्वं स्वीक्रियते। प्रत्यक्षज्ञानस्थले च विषयांशेऽपि ज्ञानस्य प्रत्यक्षत्वं स्वीक्रियते इति प्रत्यक्षपरोक्षज्ञानयोर्भेदः। तत्र चैतन्यांशे यत्प्रत्यक्षत्वं तन्न प्रमाणव्यापारप्रयोज्यं किन्तु विषयांशे यत्प्रत्यक्षत्वं तत्प्रमाणव्यापारप्रयोज्यं भवति। चैतन्यस्य प्रमाणव्यापारानपेक्षं यत्प्रत्यक्षत्वं तत्र "यत्साक्षादपरोक्षात् ब्रह्म" इति श्रुतिर्मानम्। अत्र श्रुतौ साक्षादिति पदेन प्रमाणव्यापारानपेक्षा बोध्यते अपरोक्षादिति पदे प्रथमार्थे सप्तमी तेन च स्वरूपज्ञानस्य अपरोक्षात्मकतोच्यते। अत्रेदं बोध्यं यत् ज्ञानत्वं सर्वविधज्ञानवृत्तिर्धर्मः। स च धर्मः ज्ञानस्य परोक्षापरोक्षभेदे सत्यप्यभिन्नमेव। अस्य च ज्ञानत्वस्य निष्कृष्टं स्वरूपं ब्रह्मानन्दसरस्वतीस्वामिपादैः न्यायरत्नावल्यां परिष्कृतमिह प्रसङ्गात्तन्निर्दिश्यते –

**अद्वैतिनामभिमतनिष्कृष्टज्ञानत्वपरिष्कारः** -"ज्ञानत्वं त्वसत्त्वापादकत्वरूपजातिविशेषाश्रयाज्ञानतद्विषयत्वाभावप्रयोजकविशिष्ट-चित्त्वम्।" **अयम्भावः** - अज्ञानं हि वस्तुस्वरूपमाच्छादयद् वस्तुनोऽसत्वमभानञ्चापादयति अतोऽसत्वापादकमज्ञानमभानापादक-मज्ञानञ्चेत्यज्ञानस्य भेदद्वयमत्राद्वैतवेदान्ते स्वीक्रियते। अभानापादकञ्च विषयावच्छिन्नं यद् ब्रह्म तन्निष्ठं असत्वापादकं तु अन्तःकरणावच्छिन्नसाक्षिचैतन्यनिष्ठम्। तत्र परोक्षज्ञानस्य इन्द्रियविषयसन्निकर्षाप्रयोज्यत्वेन ज्ञानस्यान्तःकरणमात्राश्रितत्वात् अन्तःकरणावच्छिन्नसाक्षिनिष्ठासत्वापादकावरणमात्रनाश-प्रयोजकत्वम्, अत एवानुमानेन पर्वते वह्निज्ञाने जाते पर्वते वह्निर्नास्तीति प्रत्ययो नोत्पद्यते। अपरोक्षज्ञानस्य च विषयान्तःकरणोभयजन्यत्वेन तदुभयाश्रितत्त्वात् उभयविधावरणनाशप्रयोजकत्वम्। तदुक्तं सिद्धान्तबिन्दौ मुनिश्रेष्ठः मधुसूदनसरस्वतीचरणैः- **परोक्षज्ञानतो नश्येदसत्वावृत्ति-हेतुता। अपरोक्षधिया नश्येदभानावृत्तिहेतुता॥**

अपरोक्षज्ञानस्योभयविधावरणभङ्गप्रयोजकत्वे घटोऽस्ति भाति इति प्रतीतिरेव मानम् इत्थमसत्वापादकत्वरूपा या जातिः तादृशजात्याश्रयीभूतं यदज्ञानं तादृशाज्ञानविषयत्वाभावप्रयोजकीभूतं यत्तद्विशिष्टचित्त्वं ज्ञानत्वसामान्यलक्षणम्। तादृशाज्ञानविषयत्वाभाव-प्रयोजकं तु घटादिज्ञानस्थले घटाद्याकारवृत्तिः विद्यमानसुखादिज्ञानस्थले वृत्त्यस्वीकारपक्षे सुखादिजनकसामग्र्येव।

अत एव घटाकारवृत्तिदशायां घटं न जानामीति नानुभवः। ननु वृत्तेरेवाज्ञानविषयत्वाभावप्रयोजकत्वे विद्यमानसुखादिज्ञानस्थले सुखाद्याकारवृत्त्यस्वीकर्तृणां मते अज्ञानविषयत्वाभावप्रयोजकीभूतायाः वृत्तेरभावात् सुखादिज्ञाने एतादृशं ज्ञानत्वमसम्भवदुक्तिकं स्यात्, यदि सुखादावज्ञानविषयत्वं नास्तीत्युच्यते तदा तदपि वक्तुं न शक्यते यतो हि सुखादावज्ञानविषयत्वसत्वेऽस्ति प्रमाणद्वयम्, तथाहि सूक्ष्मावस्थाभावितादशायां सुखादौ तन्न जानामीत्यनुभवः सर्वानुभवसिद्धः, अयञ्चानुभवः सुखेऽज्ञानविषयत्वसत्वे भवति प्रमाणम्, एवमेव भ्रमविषयत्वहेतुकसुखोद्देश्यकाज्ञानविषयत्वविधेयकानुमानमपि सुखेऽज्ञातत्वसत्वे भवति प्रमाणं तथाह्यनुमानप्रयोगः – "सुखम् अज्ञातं भ्रमविषयत्वात् शुक्तिरूप्यवदि"ति। एवञ्च सुखादावज्ञानविषयत्वसत्वात् सुखादिज्ञानस्थले च तद्विषयत्वाभावस्यावश्यंवक्तव्यतया तत्र च

तद्विषयत्वाभावप्रयोजकीभूतायाः वृत्तेरभावात् सुखादिज्ञान उक्तं ज्ञानत्वमव्याप्तमिति चेदत्रोच्यते न हि वृत्तिरेव तादृशाज्ञानविषयत्वाभाव-प्रयोजिकापितु वृत्युपधायकस्यापि प्रयोजकत्वं स्वीक्रियते। सुखादिभानस्थलेऽपि सुखादिवृत्त्युपधायकसाक्ष्यादिघटितसामग्र्या एव अज्ञान-विषयत्वाभावप्रयोजकत्वमङ्गीकर्तुं शक्यते। तथा च तादृशप्रयोजकविशिष्टचित्त्वस्य सुखादिभानेऽपि सत्त्वात् न लक्षणस्य अव्याप्तिस्तत्र।अत एव ब्रह्मानन्दस्वामिपादैर्वृत्तिपदप्रयोगो न कृतः। तादृशाज्ञानविषयत्वाभावप्रयोजकविशिष्टचित्त्वमेव ज्ञानत्वमित्युक्तम्। वस्तुतस्तु घटादिज्ञानस्थलेपि तादृशाज्ञानविषयत्वाभावप्रयोजकत्वं वृत्युपधायकसामग्र्या एव स्वीक्रियते, अन्यथोक्तवृत्तेः स्वोत्पत्तिकालीनेऽज्ञानविषयत्त्वाभावे प्रयोजकत्वमेव सम्भवति, यदि चोक्तवृत्त्युत्पत्तिकाले अज्ञातत्वं स्वीक्रियेत तथा सति ज्ञातत्त्वेन सह विरोधस्स्यात्। अत्र प्रयोजकत्वं च समानकालीनत्वे सति कारणत्वम्, तेन वृत्यभावकाले तादृशाभावस्वरूपयोग्यचैतन्यमादाय घटादौ न ज्ञातत्वव्यवहारः कारणत्वमधिष्ठानविधया जगदुपादानस्य चितोऽविद्याया वा ग्राह्यम्, तद्विशिष्टत्वं तत्तादात्म्यमेव, तच्च मनउपहितचित्यस्तीति तद्वत्त्वेन जीवस्य ज्ञातृत्वव्यवहारोप्युपपद्यते। इदञ्च ज्ञानत्वं परोक्षापरोक्षज्ञानसाधारणम्। प्रत्यक्षज्ञानमात्रवृत्तिज्ञानत्वं तु अभानापादकत्त्वरूपजातिविशेषाश्रयाज्ञानविषयत्वाभावप्रयोजकविशिष्ट-चित्त्वमिति बोध्यम्।

इत्थं ज्ञाननिष्ठं ज्ञानत्वं चित्त्वापरपर्यायमेव ज्ञानस्य प्रत्यक्षलक्षणम्। चैतन्यरूपमेव ज्ञानमबाधितघटादिवृत्यवच्छिन्नं सत् घटादिप्रमेत्युच्यते। तथा च प्रत्यक्षसामान्यस्य लक्षणं चैतन्यमेवेति पर्यवसितम्।

**चक्षुरादेः प्रत्यक्षप्रमाणत्वव्यवस्थापनम्**

चैतन्यस्य प्रत्यक्षप्रमात्वे व्यवस्थापिते सति भवतीयमाशङ्का यच्चक्षुरादेः प्रमाणत्वव्यवहारः कथमुपपद्येतेति। यतः प्रमायाः करणमेव प्रमाणम्, तस्य च कारणत्वघटितकरणत्वघटितत्वेन फलभूतचैतन्यात्मकप्रत्यक्षप्रमायाश्च अनादित्वेन नित्यत्वेन च तत्करणत्वस्य कुत्राप्यसम्भवात् वस्तुतो न क्वापि प्रत्यक्षप्रमाणत्वव्यवहारः स्यात् किमुत चक्षुरादौ। अतश्चक्षुरादेः प्रत्यक्षप्रमाणत्वव्यवहारोऽनुपपन्न इति चेदुच्यते-

प्रमारूपं चैतन्यं प्रति करणत्वात् चक्षुरादेः प्रामाण्यं नाद्वैतिनामाभिमतं, चैतन्यस्य स्वप्रकाशत्वेन स्वात्मनि प्रमाणव्यापारानपेक्षतया तत्करणत्वाभावस्येष्टत्वात्, "यत्साक्षादपरोक्षाद्ब्रह्म" इति श्रुतावपि साक्षादिति विशेषणं ब्रह्मणो विषयचक्षुरादिप्रमाणव्यापारद्वारकं प्रत्यक्षत्वं व्यावर्तयितुमेव प्रयुक्तम्। इदमेव ब्रह्मणः स्वप्रकाशत्वमपि, उक्तञ्च यतिश्रेष्ठेन मधुसूदनसरस्वतीस्वामिचरणेन- "**अत एवास्वप्रकाशत्वरूपं दृश्यत्वमपि हेतुः स्वप्रकाशत्वं हि स्वापरोक्षत्वे स्वातिरिक्तानपेक्षत्वं, यत्साक्षादपरोक्षाद् ब्रह्म**।"१

तथा च प्रमारूपं चैतन्यं प्रति करणत्वान्न चक्षुरादौ प्रामाण्यव्यवहारोऽपितु घटाद्याकारवृत्यवच्छिन्नचैतन्यं प्रति करणत्वात् प्रामाण्यव्यवहारश्चक्षुरादीनाम्। तथाहि- चैतन्यं यद्यपि स्वरूपतोऽनादि अतो नेन्द्रियजन्यं तथापि वृत्तिविशिष्टं चैतन्यमिन्द्रियजन्यमेव तदेव च घटादिप्रत्यक्षप्रमेत्युच्यते। ननु वृत्तिविशिष्टचैतन्ये जन्यत्वव्यवहारः किंवा सादित्वव्यवहारः कथं भवतीति चेदुच्यते चैतन्यस्यानादित्वेऽपि चैतन्याभिव्यञ्जिकायाः वृत्तेः विषयेन्द्रियसन्निकर्षादिना जायमानत्वेन सादित्वात् तद्विशिष्टचैतन्येऽपि सादित्वव्यवहारः, तदुक्तं परिभाषायाम् - "**चैतन्यस्यानादित्वेपि तदभिव्यञ्जकान्तः करणवृत्तिरिन्द्रियसन्निकर्षादिना जायते इति, वृत्तिविशिष्टं चैतन्यमादिमदित्युच्यते**।" तथा च उपाधिगतधर्ममुपधेय आरोप्योपहितस्यापि सादित्वव्यवहारः इति ग्रन्थेनानेन लभ्यते, यथा न्यायमते आकाशस्य विभुत्वेनापरिच्छिन्नत्वेपि परिच्छिन्नघटरूपोपाध्यवच्छिन्नत्वेन परिच्छिन्नत्वव्यवहारो भवति तद्वदत्राप्युपहितचैतन्यस्य सादित्वव्यवहारो न तु स्वरूपतश्चैतन्यस्य सादित्वमिति तादृशचैतन्यं प्रति चक्षुरादेः करणत्वात् तेषां प्रामाण्यव्यहारः।

**ज्ञानगतप्रत्यक्षत्वप्रयोजकविचारः**

पूर्वोक्तरीत्या प्रत्यक्षप्रमायाः प्रत्यक्षप्रमाणस्य लक्षणे व्यवस्थिते इदानीमद्वैतिनामभिमतं प्रत्यक्षत्वप्रयोजकं किमिति विचाराय प्राप्तोऽवसरः। कुत इति चेदद्वैतिभिः ज्ञाननिष्ठं ज्ञानत्वमेव ज्ञानस्य प्रत्यक्षलक्षणमिति स्वीकृतं तच्च न प्रत्यक्षप्रमाणलक्षणोपयोगि चक्षुरादेस्तादृशज्ञानं प्रति करणत्वासम्भवात् वृत्तिविशिष्टचैतन्यरूपप्रमाकरणत्वेन चक्षुरादेः प्रत्यक्षप्रमाणत्वव्यवस्थापने व्याप्तिज्ञानादेरपि अबाधितवह्न्यादिवृत्तिविशिष्ट-चैतन्यरूपप्रमाकरणत्वेन प्रत्यक्षप्रमाणत्वापत्तेः न चैतदतिरिच्य किमपि प्रत्यक्षत्वव्यवहारप्रयोजकं वक्तुं शक्यम् इन्द्रियजन्यत्वादेः सुखादिविषया-व्यापकत्वेन प्रयोजकत्वासम्भवात् प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वमपि घटादिप्रत्यक्षविषयेष्वभावात् न प्रत्यक्षत्वप्रकारक-व्यवहारसामान्यप्रयोजकं तस्मात् प्रयोजकान्तराभावात् चैतन्यरूपप्रत्यक्षलक्षणस्य च प्रत्यक्षप्रमाणलक्षणोपयोगित्वाभावात् प्रत्यक्षत्रमाणलक्षणं दुर्निरूप्यमिति चेदत्राद्वैतिनः- ज्ञानं प्रत्यक्षं विषयः प्रत्यक्षः इत्युभयविधव्यवहारप्रयोजकत्वं कस्यचिदपि एकस्य वक्तुं न शक्यते किन्तु भिन्नमेव ज्ञानगतप्रत्यक्षत्वव्यवहारप्रयोजकं भिन्नञ्च विषयगतप्रत्यक्षत्वव्यवहारप्रयोजकम्। तच्च किमिति चेद् अत्र वेदान्तपरिभाषाकाराः-

"**आद्ये प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेदः इतिब्रूमः**"। एकस्यैव चैतन्यस्य कर्तृरूपान्तःकरणावच्छिन्नत्वेन प्रमातृत्वव्यवहारः वृत्तिलक्षणक्रियारूपोपाध्यवच्छिन्नत्वेन प्रमाणत्वव्यवहारः घटादिविषयाभिन्नकर्मरूपोपाध्यवच्छिन्नत्वेन च प्रमेयत्वव्यवहार इति न प्रमातृप्रमाण-प्रमेयभावानुपपत्तेराशङ्कापि।

एवञ्च प्रकृते प्रमाणचैतन्यस्य अर्थात् अन्तःकरणवृत्यवच्छिन्नचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वं ज्ञाननिष्ठं विषयनिरूपितं प्रत्यक्षत्वव्यवहारप्रयोजकम् इति लभ्यते। इदमेव च ज्ञानगतप्रत्यक्षत्वप्रयोजकंप्रत्यक्षप्रमाणलक्षणनिरूपणोपयोगि अतो न प्रत्यक्षप्रमाणलक्षणं दुर्निरूप्यमिति। अस्य समन्वयो- अयं घटः इति प्रत्यक्षस्थले अन्तःकरणस्य चक्षुरादीन्द्रियद्वारा घटरूपविषयदेशगमनेन तदाकारपरिणामरूपवृत्तेः घटसंयोगितया तादृशवृत्यवच्छिन्नचैतन्यघटावच्छिन्नचैतन्ययोः घटवृत्तिरूपोपाध्योरेकदेशस्थत्वेन ऐक्यात् भवति। नन्वेवमनुमित्यादिस्थलेऽपि चक्षुरादीन्द्रियद्वारा पर्वतादावन्तःकरणनिर्गमनेन वृत्तेः विषयसम्बन्धितया तदवच्छिन्नस्यचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वेनोक्तलक्षणस्य तत्रातिव्याप्तिरिति चेदत्रोच्यते- अनुमित्यादिस्थले अन्तःकरणस्य वह्न्यादिविषयदेशगमनं न सम्भवति, वह्न्यादिना सह चक्षुरादेरसन्निकर्षात्। येन विषयेण सह चक्षुरादीनामिन्द्रियाणां सन्निकर्षो भवति तत्रैवान्तःकरणस्य गमनं सम्भवति नान्यत्र। तथा चानुमित्यादिस्थले वह्निना सहेन्द्रियसन्निकर्षाभावात् तत्रान्तःकरणस्यागमनात् वृत्तिवह्निरूपोपाध्योः भिन्नदेशस्थत्वेन उपधेयाभेदाप्रयोजकत्वात् न वह्न्यंशे ज्ञानस्य प्रत्यक्षत्त्वम्। तदुक्तम्- **“अनुमित्त्यादिस्थले तु नान्तःकरणस्य वन्यादिदेशगमनं वहन्यादेश्चक्षुराद्यसन्निकर्षाद्”।**

ननूपाधिविशेषणयोः कार्यान्वयित्वानन्वयित्वाभ्यां वैलक्षण्यस्य सद्भावेऽपि विशेषणवदुपाधेरपि स्वरूपेण भेदकत्वमेव तथा चानुमित्यादिस्थलवत् प्रत्यक्षस्थलेऽपि उपहितचैतन्ययोः मिथो भेदात् कथमुक्तप्रत्यक्षत्वप्रयोजकसद्भाव इति चेदुच्यते नह्युपाधेः स्वरूपतो भेदकत्वं स्वीकर्तुं शक्यते किन्तु भिन्नदेशस्थत्वेनैव भेदकत्वं स्वीक्रियते। भिन्नदेशस्थत्वेनोपाधेर्भेदकत्वानभ्युपगमे मठान्तवर्तिघटावच्छिन्ना-काशान्मठावच्छिन्नाकाशस्य भेदोऽभ्युपगन्तव्यः स्यात्। न च स भेदोऽङ्गीक्रियते किन्तूभयोराकाशयोरभेद एव स्वीक्रियते उपाधेर्भिन्नदेशस्थत्वेन भेदकत्वाभ्युपगमे तु मठघटरूपोपाध्योरेकदेशस्थत्वेनोभयोरैक्यप्रतीतेः निर्वाहः सुतरां संगच्छते। तथा च प्रत्यक्षस्थले वृत्तिविषयरूपयोरुपाध्यो-रेकदेशस्थत्वेन चैतन्यभेदाप्रयोजकत्वात् उक्तप्रयोजकसत्वे न किमपि बाधकम् अनुमितिस्थले चोभयोर्भिन्नदेशस्थत्वेन उपधेयाभेदाप्रयोजक-त्वान्नोक्तप्रयोजकलक्षणगमनप्रयुक्तातिप्रसक्तिः। तदुक्तं वेदान्तपरिभाषायाम्-

**“विभाजकयोरप्यन्तः करणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वात्। अत एव मठान्तर्वर्तिघटावच्छिन्नाकाशो न मठावच्छिन्ना-काशाद्भिद्यते। तथा चायं घट इति प्रत्यक्षस्थले घटाकारवृत्तेर्घटसंयोगितया घटावच्छिन्नचैतन्यस्य तद्दृत्यवच्छिन्नचैतन्यस्य चाभिन्नतया तत्र घटज्ञानस्य घटाकारांशे प्रत्यक्षत्त्वम्”।**

नन्वेवमपि “**अहं सुखी**” इत्यादिप्रत्यक्षस्थले सुखादिज्ञानस्य कथं प्रत्यक्षत्वं स्यात्। सुखादिना सह चक्षुरादीन्द्रियसन्निकर्षाभावेन सुखाद्याकारवृत्तेरनुदयात् तदवच्छिन्नचैतन्यस्य विषयावच्छिन्नचैतन्याभेदाभावेनोक्तप्रयोजकस्यासत्वादिति चेदत्रोच्यते –

बाह्यपदार्थविषयकवृत्युत्पत्तावेव चक्षुरादीनामिन्द्रियाणां कारणत्वं नत्वाभ्यन्तरविषयाणां वृत्युत्पत्तौ। आभ्यन्तरविषयैः सह चक्षुरादीनां सन्निकर्षासम्भवाद् आभ्यन्तरविषयवृत्तिः इन्द्रियसहकारं विनैवोत्पद्यते एवञ्च “अहं सुखी” “अहं दुःखी” इत्यादिज्ञानस्थले सुखादीनामन्तः-करणधर्मत्वेनान्तःकरणदेशस्थत्वात् तदाकारवृत्तेश्च तत्र वर्तमानत्वेन तदुभयावच्छिन्नचैतन्यस्य चैक्यात् “अहं सुखी” इत्यादिज्ञानस्य सुखादिविषयनिरूपितप्रत्यक्षत्वं सुतरां सिद्धयति।

अत्रेदमाशङ्क्यते यत् सुखादिना सहेन्द्रियसन्निकर्षाभावेन वृत्युत्पत्तिः किमर्थं स्वीक्रियते वृत्तिं विनैव तेषामनुभवोऽस्त्विति चेद् यदि आवरणभङ्गार्थं वृत्तिः स्वीक्रियत इत्युच्यते तदा तदपि वक्तुं न शक्यते यतो हि यत्र स्वसत्तायां प्रकाशव्यभिचारित्वं तत्रैवावरणभङ्गार्थं वृत्तिरभ्युपगम इति व्याप्त्या घटादिषु तथा स्वीकर्तुं शक्यत्वेपि सुखादीनां प्रकाशाव्यभिचारित्वात् तत्रावरणभङ्गार्थं वृत्तिर्नाभ्युपगन्तव्येति चेदत्रोच्यते- **सुखादीनामनुभवस्थले वृत्यनभ्युपगमे सुखादीनां चैतन्येनैव प्रकाशप्रसङ्गः स्यात्। एवञ्च चैतन्यलक्षणस्यानुभवस्याविनाशिनः संस्काराजनकत्वेन सुखादिस्मरणं न स्यादतः सुखादीनां स्मरणोपपत्तये तदाकारवृत्तिः स्वीकर्तव्यैव।** ननूपाध्योरेकदेशस्थत्वमात्रेणो-पधेयभेदाप्रयोजकत्वाङ्गीकारे “पूर्वमहं सुखी”त्यादिस्मरणरूपान्तःकरणवृत्यवच्छिन्नचैतन्यस्य तदीयसुखरूपविषयावच्छिन्नचैतन्यस्य चैकदेश-स्थोपाधिद्वयावच्छिन्नत्वेनैक्यात् सुखादिस्मरणस्यापि सुखादिविषयनिरूपितप्रत्यक्षत्वापत्तिः स्यादित्यत उपाधेः स्वरूपेणैव भेदकत्वं स्वीकर्तव्यं तथा च सुखतत्स्मरणरूपोपाधेः स्वरूपेण भेदकत्वात् न “पूर्वमहं सुखी”त्यादिस्मरणस्य प्रत्यक्षत्वापत्तिरिति चेदुच्यते- न ह्युपाध्योरेकदेशस्थत्वमात्रमुपधेयाभेदप्रयोजकमिति स्वीक्रियतेऽपितु एकदेशस्थत्वे सत्येककालिकत्वमपि अपेक्षितम्। तथा च सुखस्मरणाकारवृत्तेः सुखस्य चैकदेशस्थत्वेऽपि स्मृतिविषयस्यातीतत्वनियमात् सुखस्यातीतत्वेन तयोरेककालिकत्वाभावात् नोपधेयाभेदप्रयोजकत्वमिति न सुखादिस्मरणस्य प्रत्यक्षत्वापत्तिः।

अत्रेदमाशङ्क्यते यदुपाध्योरुपधेयाभेदप्रयोजकत्वेन यदेककालिकत्त्वं स्वीकृतं तत्किमेककालोत्पत्तिमत्वमाहोस्वित् उपधेयाभेदसमये उपाध्योः समानकालीनत्वम्। तत्राद्यो न युक्तो घटावच्छिन्नाकाशमठावच्छिन्नाकाशयोर्भेदप्रसङ्गात्। घटमठरूपोपाध्योर्भिन्नकालोत्पत्ति-मत्वेनैककालिकत्वाभावात्। नापि द्वितीयः, उपहिताभेदज्ञाने सति एककालवृत्युपाधिद्वयनिश्चयः, एककालिकोपाधिद्वयज्ञाने सति उपहितभेदज्ञानमिति स्वज्ञप्त्यधीनज्ञप्तिकत्वरूपपरस्पराश्रयतया अन्योऽन्याश्रयत्वापत्तेः। अतो नोपाध्योरेककालिकत्वेनोपधेयाभेदप्रयोजकत्वं वक्तुं

शक्यं। तथा चैकदेशस्थत्वेनैवाभेदप्रयोजकत्वं वक्तव्यम् एवञ्च सति सुखादिस्मरणस्य प्रत्यक्षत्वापत्तिस्तदवस्थैव स्यादिति चेदत्र परिभाषाकारः- **"यदि चैकदेशस्थत्वमात्रमुपधेयाभेदप्रयोजकं तदा पूर्वमहं सुखीत्यादि- स्मृतावतिव्याप्तिवारणाय वर्तमानत्वं विषयविशेषणं देयम्।"**

**अयम्भावः**- एककालिकत्वस्योपधेयाभेदप्रयोजकत्वानभ्युपगमे एकदेशस्थत्वमात्रस्य तदभ्युपगमे "पूर्वमहं सुखी"त्यादिस्मरणे प्रसक्तामतिव्याप्तिं वारयितुं लक्षणघटकविषयरूपोपाधिः वर्तमानत्वेन विशेषणीयः। तथा च वृत्यवच्छिन्नचैतन्यस्य वर्तमानविषयावच्छिन्न-चैतन्याभेदः प्रत्यक्षज्ञानलक्षणं पर्यवस्यति। एवञ्च न पूर्वोक्तस्मृतावतिव्याप्तिः। तत्र स्मरणाकारवृत्तेर्वर्तमानत्वे-ऽपि सुखस्यावर्तमानत्वात्। वृत्यवच्छिन्नचैतन्यस्य वर्तमानविषयावच्छिन्नचैतन्याभेदाभावात्।

वस्तुतस्तु अत्र लक्षणे वर्तमानत्वं विषयविशेषणमनुपादेयमेव। अवर्तमानस्यानुपाधित्वेन विषयोपहितचैतन्येनैवोक्तातिप्रसङ्गवारण-सम्भवात्। न च वर्तमानत्वस्य विषयविशेषणत्वानुपादाने तस्योपलक्षणत्वशङ्का स्यात् अतस्तन्निरासार्थमेव वर्तमानत्वं विषयविशेषणं न तु तस्य लक्षणे प्रवेश इति चेदुच्यते-

अवच्छिन्नपदेनोपहितस्याभिधानाद्विषयनिष्ठोपलक्षणत्वशङ्कानुदयेन वर्तमानत्वं विषयविशेषणं व्यर्थमेव। उपाधेस्तु वर्तमानत्वं परिभाषायां स्वयमेव ग्रन्थकृता प्रतिपादितं तथाहि- **"उपाधिस्तु कार्यानन्वयी व्यावर्तको वर्तमान इति।"**

एवञ्च वर्तमानत्वस्य विषयविशेषणत्वानुपादानेऽपि सुखादिस्मरणेऽतिव्याप्तेः परिहारः सम्भवति। नन्वेवमपि "भवान् धार्मिकः" "त्वमधार्मिक" इत्यादिवाक्यजन्यवृत्यवच्छिन्नचैतन्यं प्रति धर्माधर्मयोः वर्तमानत्वेनोपाधितया धर्माद्यवच्छिन्नचैतन्यस्य तद्वत्यवच्छिन्नचैतन्यस्य चैक्यात् तादृशवाक्यजन्यशाब्दज्ञानादावतिव्याप्तिः स्यादिति चेदत्रोच्यते-

वृत्यवच्छिन्नचैतन्यस्य प्रत्यक्षयोग्यविषयावच्छिन्नचैतन्याभेद एव ज्ञानस्य प्रत्यक्षत्वव्यवहारो भवति न तु सामान्यतो विषयावच्छिन्नचैतन्याभेदेऽतो धर्माधर्मयोग्यतया तादृशविषयावच्छिन्नचैतन्यस्य वृत्यवच्छिन्नचैतन्याभेदेऽपि न तज्ज्ञानस्य प्रत्यक्षत्वव्यवहारः। अत्रेदमाशङ्क्यते यत् सुखादिवत् धर्माधर्मादेरप्यन्तःकरणधर्मत्वाविशेषेण सुखादेरिव धर्माधर्मादेरपि कथं न प्रत्यक्षविषयत्वमिति चेदत्रोक्तं परिभाषाकारेण अन्तःकरणधर्मत्वाविशेषेऽपि किञ्चिद्योग्यं किञ्चिदयोग्यमित्यत्र फलबलकल्प्यः स्वभाव एव शरणम्। अन्यथा न्यायमतेऽप्यात्मधर्मात्वाविशेषेऽपि सुखादिवद्धर्मादेः प्रत्यक्षत्वापत्तिर्दुर्वारा।

**अयम्भावः**-- धर्माधर्मादिवत् सुखादेरपि अन्तःकरणधर्मत्वात् तत्र प्रत्यक्षविषयत्वं स्वीक्रियते धर्माधर्मादिषु च न स्वीक्रियते इत्यत्र पदार्थानां फलबलकल्प्यः स्वभाव एव नियामकः। तथा च सुखस्य नियमेन अहं सुखीत्यादिप्रत्यक्षविषयत्वे विषयस्वभावातिरिक्तं न किमप्यन्यत् तदापरोक्ष्ये नियामकं धर्माधर्मादीनां कदापियपरोक्षप्रतीतिविषयत्वाभावात् प्रत्यक्षाविषयत्वे स्वभाववैलक्षण्यमेव नियामकम्। अत्र योग्यत्वमित्यस्य तत्तदिन्द्रियतत्तत्केवलसाक्ष्यन्यतरयोग्यत्त्वमित्यर्थः। तेन सुखशुक्तिरूप्यादेरिन्द्रियायोग्यत्वेऽपि केवलसाक्षिवेद्यत्वाद्योग्यत्त्वम-स्त्येव। अत्र ग्रन्थे फलबलकल्प्यस्वभावस्यैव विषयाणां योग्यत्वे नियामकत्वमुक्तं ग्रन्थकृता। तत्र फलपदेनानुव्यवसायो ग्राह्यः तथा च स्ववृत्तिसुखादिज्ञानानन्तरं सुखं साक्षात्करोमीत्यनुव्यवसायात् सुखस्य योग्यत्वम्। धर्माधर्मादिप्रतीत्यनन्तरं धर्ममधर्मौ साक्षात्करोमीत्यनुव्यवसायाभावात् न धर्मादेर्योग्यत्वम् इति भावः। न्यायनयेऽप्येवमेव व्यवस्थोपपादनीया। तथा च "त्वं धार्मिकः" "त्वमधार्मिकः" इत्यादिवाक्यजन्यशाब्दज्ञानात्मकपरोक्षवृत्यवच्छिन्नचैतन्यस्य योग्यविषयावच्छिन्नचैतन्याभिन्नत्वाभावान्न "त्वं धार्मिकः" इत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वापत्तिः।

तथा च- निष्कृष्टं ज्ञानगतप्रत्यक्षत्वस्य लक्षणमित्थं पर्यवस्यति - **"तत्तदिन्द्रियतत्तत्केवलसाक्ष्यन्यतरयोग्यतत्तत्साक्षिजन्यतत्तदाकारवृत्यु-पहितविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तत्साक्षिजन्यतत्तदाकारवृत्यवच्छिन्नचैतन्यस्य तत्तद्विषयांशनिरूपितप्रत्यक्षत्वम्"।**

अत्र तत्तदाकारवृत्युपहितत्वस्य विषयविशेषणत्वानुपादाने घटोऽयमिति ज्ञानस्य परिमाणाद्यंशनिरूपितप्रत्यक्षत्वापत्तिः स्यात्तदुपादाने तु घटाकारवृत्तिकाले परिमाणाकारवृत्युपहितविषयस्याभावात् न क्षतिः। एवञ्च यद्यद्विषयनिरूपितं ज्ञाननिष्ठं प्रत्यक्षत्वं विवक्षितं तत्तदाकार-वृत्युपहितत्वमपि विषयस्यापेक्षितमिति भावः। यदि चात्र लक्षणे वृत्तौ तत्तत्साक्षिजन्यत्वविशेषणं नोपादीयेत तथा सति पुनः "अयं घटः" इति ज्ञानस्य परिमाणाद्यंशनिरूपितप्रत्यक्षत्वापत्तिः स्यात् परिमाणादिषु "अयंघटः" इति ज्ञानकाले अस्मदादिवृत्युपहितत्वस्याभावेऽपि परिमाणाद्याकारेश्वरीयवृत्युपहित्तत्त्वस्य सत्वेन तादृशवृत्यवच्छिन्नचैतन्यस्य विषयावच्छिन्न-चैतन्यभेदात् परिमाणद्यंशनिरूपितप्रत्यक्षत्वापत्तिः स्यात् तथा च अयं घट इत्यादिज्ञानकाले परिमाणादीनामपि प्रत्यक्षत्वापत्तिस्स्यात् अतस्तद्वारणाय लक्षणघटकवृत्तिपदार्थे तत्तत्साक्षिजन्यत्वमपि विशेषणं देयम्। तदुपादाने च "अयं घट" इति ज्ञानकाले परिमाणाद्याकारेश्वरवृत्युपहितत्वस्य परिमाणादिविषयेषु सत्वेऽपि अस्मदादिवृत्यु-पहितत्वस्याभावान्नातिप्रसङ्गः। अत्र तत्तत्साक्षिजन्यत्वमित्यस्य हि तत्तत्साक्षिनिष्ठजनकतानिरूपितजन्यतावती या वृत्तिरित्यर्थः।

नन्वत्र साक्षिनिष्ठजनकत्वकथनमयुक्तं साक्षिणः "साक्षी चेता केवलो निर्गुणश्च" इति श्रुत्या निर्धर्मकत्वबोधनात्। अतोऽयुक्तमिदं लक्षणं साक्षिनिष्ठजनकतानिरूपितजन्यत्वानिवेशे च पूर्वोक्तदोषापत्तिस्तदवस्थैवेति चेदत्रोच्यते-

नहि वस्तुतः साक्षिणो जनकत्वमस्ति किन्तु वृत्तिं प्रति साक्ष्युपाध्यन्तःकरणस्य जनकत्वेन तन्निष्ठजनकतायाः साक्षिण्यारोपात् साक्षिणि जनकत्वव्यवहारः। तथा च वास्तविकजनकत्वस्याभावेऽपि आरोपितसाक्षिनिष्ठजनकतामादाय लक्षणस्वरूपनिर्वचनं पूर्वोक्तदोषवारणं च करणीयम्। यद्वा चैतन्यस्यापि विवर्तकारणत्वस्वीकारात् साक्षिनिष्ठकारणताकथनं न विरुध्यते। एवञ्च यद्यत्साक्षिज्ञानस्यापरोक्षत्वं विवक्षितं तत्तत्साक्षिजन्यत्वेन वृत्तिर्विशेषणीया। तेन चैत्रीयान्तःकरणोपहितचैतन्य-रूपसाक्षिजन्यतद्घटीयपरिमाणाद्याकारवृत्तेः मैत्रीयान्तःकरणोपहित-चैतन्यरूपसाक्षिजन्यतद्घटाकारवृत्तेश्चैकदेशस्थत्वेऽपि न मैत्रीयघटज्ञानस्य परिमाणनिरूपितप्रत्यक्षत्वं न वा चैत्रीयज्ञानस्य घटनिरूपितप्रत्यक्षत्वम् आपादयितुं शक्यम्। चैत्रीयान्तःकरणवृत्तेर्मैत्रीयान्तःकरणोपहितसाक्षिजन्यत्वाभावात्। मैत्रीयान्तःकरणवृत्तेश्च चैत्रीयान्तःकरणोपहितसाक्षि-जन्यत्वाभावात्।

अत्र लक्षणे केवलसाक्षियोग्यत्वनिवेशात् न तत्वमस्यादिवाक्यजन्यज्ञानेऽव्याप्तिः। तज्ज्ञानेऽपि केवलसाक्षियोग्यत्वस्य सत्त्वात्। इत्थमिदं ज्ञानस्य प्रत्यक्षत्वव्यवहारप्रयोजकं लक्षणम् अद्वैतिभिः स्वीकृतं एतच्च लक्षणं भवति प्रत्यक्षप्रमाणलक्षणनिरूपणोपयोगीति सर्वमनवद्यम्।

तत्र पूर्वोक्तरीत्या वृत्तौ ज्ञानत्वमुपचर्य वृत्तिरूपज्ञानं प्रति चक्षुरादेः करणत्वेन प्रत्यक्षप्रमाणत्वं तेषां व्यवस्थापनीयम्। अतः प्रत्यक्षप्रमाकरणमिति यदुक्तं प्रत्यक्षप्रमाणलक्षणं तत्समीचीनमेव। विषयगतप्रत्यक्षत्वप्रयोजकं तु विषयस्य प्रमातृसत्तातिरिक्तसत्ताकत्वाभाव एव।

**निष्कर्षः**

एतावता प्रबन्धेन अद्वैतिनां नये प्रत्यक्षस्य चैतन्यात्मकत्वस्वीकारेऽपि न प्रमाणादिव्यवस्था अनुपपन्ना भवतीति सिद्ध्यति। तत्र अद्वैतिनां प्रक्रियाणां श्रुतियुक्त्यनुभवानुसारितया केवलानुभवतर्काद्यधिष्ठित-न्यायादिदर्शनीयप्रक्रियातो भवत्येव वैलक्षण्यम्। किञ्च अन्तःकरणस्य विषयेऽपि श्रुत्यनुरोधादेव न्यायाद्वैतदर्शनयोर्भवति वैमत्यम्। तत्र नैयायिकाः मनसोऽणुत्वं नित्यत्वञ्च स्वीकुर्वन्ति। अद्वैतिनस्तावत् अन्तःकरणस्य मध्यमपरिमाणवत्त्वमनित्यत्वञ्च स्वीकुर्वन्ति। नैयायिकैस्तावज्ज्ञानमात्मनो धर्म इति स्वीक्रियते अद्वैतिभिरन्तःकरणपरिणामरूप-वृत्त्युपहितचैतन्यात्मकत्वं ज्ञानस्य स्वीक्रियते इति भवत्येवानयोः दर्शनयोर्महान्भेदः। ज्ञानगतप्रत्यक्षत्वस्य प्रयोजकविषये च अनितरसाधारणा काचिद्रीतिरद्वैतिभिः स्वसिद्धान्तानुसारेण प्रदर्श्यते। अन्यत्र च नैतादृशी रीतिरवलोक्यते इति शम्।

## सन्दर्भग्रन्थसूची


- श्रीमन्मधुसूदनसरस्वती, अद्वैतसिद्धिः (बालबोधिनी व्याख्या) प्रथम एवं द्वितीय भाग, प्रकाशनवर्षः -2000, प्रकाशकः, रत्नापब्लिकेशन, वाराणसी।
- बृहदारण्यकोपनिषद् (सानुवादशाङ्करभाष्यसहित), श्रीमच्छङ्कराचार्यः. संवत् २०७१, गीताप्रेस, गोरखपुर- २७३००५।
- वेदान्तपरिभाषा (समणिप्रभाशिखामणि- सहिता), श्रीमद्धर्मराजाध्वरीन्द्रः (१९८५), खेमराज श्रीकृष्णदास, अध्यक्ष श्रीवेंकटेश्वर प्रेस, खेमराजश्रीकृष्णदास मार्ग, बम्बई-४०००४।
- सिद्धान्तलेशसङ्ग्रहः, श्रीमदप्पयदीक्षितः (२००६), प्रो० वेम्पटिकुटुम्बशास्त्री कुलपति राष्ट्रियसंस्कृतसंस्थान, नई दिल्ली।
- सिद्धान्तबिन्दुः श्रीमधुसूदनसरस्वतीचरणाः(१९९७), महेश रिसर्च इंस्टीट्यूट, श्रीशंकर मठ, माउण्ड आबू (राज०), श्रीदक्षिणामूर्ति मठ, डी. ४९/९, मिश्र पोखरा, वाराणसी।
- सर्वदर्शनसंग्रहः, श्रीमन्माधवाचार्यः, २००८, चौखम्बा संस्कृत संस्थान, वाराणसी।
- ब्रह्मसूत्रम् शारीरकमीमांसाभाष्यम् (हिन्दी सहित भामती संवलितम्) ।
- महर्षिबादरायणः श्रीमच्छङ्कराचार्यः वाचस्पतिमिश्रः,२००५, चौखम्बा विद्याभवन, चौक, वाराणसी।
- तत्वप्रदीपिका (चित्सुखी), श्रीमच्चित्सुखमुनिः (२००५), चौखम्बा विद्याभवन, वाराणसी।
- तर्कसंग्रहः (न्यायबोधिनी, वाक्यवृत्ति, निरुक्ति, टिप्पणी रामरुद्री, नृसिंहप्रकाशिका, नीलकण्ठप्रकाशिका, पट्टाभिरामप्रकाशिका दीपिका) श्रीमदनन्नम्भट्टः,विक्रमसंवत् २०६३,चौखम्भा संस्कृत संस्थान, वाराणसी।
- तर्कभाषा, श्रीकेशवमिश्रः व्याख्याकारः आचार्य बदरीनाथ शुक्लः (२००७), मोतीलाल बनारसीदास, वाराणसी।
- न्यायसिद्धान्तमुक्तावली किरणावली, श्रीविश्वनाथ पञ्चानन भट्टाचार्यः श्री वल्लभाचार्यः, वि०संवत् २०६३,चौखम्बा संस्कृत संस्थान, वाराणसी।
- न्यायसिद्धान्तमुक्तावली दिनकरी, रामरुद्री,२०४६,श्रीविश्वनाथपंचानन- भट्टाचार्यः दिनकरभट्ट रामरुद्रभट्टाचार्यः, चौखम्भा संस्कृत संस्थान- वाराणसी।


*********************

ISSN 2348-7828

# प्रत्यक्षाभासः

डॉ. भास्करभट्टः जोशि[1]

**शोधसारः**

ज्ञानं द्विविधम्- स्मृतिः अनुभवश्च। अनुभवश्च द्विविधः—यथार्थः अयथार्थश्च। समीचीनं ज्ञानं यथार्थानुभवः। दुष्टं ज्ञानमयथार्थानुभवः। रज्जुं दृष्ट्वा जायमानं 'इयं रज्जुः' इति ज्ञानं यथार्थानुभवः। 'अयं सर्पः' इति ज्ञानं अयथार्थानुभवः।

नैयायिकाः यथार्थानुभवं एवं लक्षयन्ति- 'तद्वति तत्प्रकारकोऽनुभवः यथार्थः' इति। तद्वन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वं यथार्थानुभवस्य लक्षणम्। समन्वयः ज्ञानं कचित् धर्मिणि कञ्चन धर्मं विषयीकरोति। तयोः धर्मी विशेष्यः, धर्मः प्रकारः इत्युच्यते। विशेष्ये विशेष्यता भवति। प्रकारे प्रकारता भवति। विशेष्यतायाः ज्ञानं निरूपकं भवति।

तदभाववति तत्प्रकारकोऽनुभवः अयथार्थः। तदभाववन्निष्ठ-विशेष्यता-निरूपकत्वे सति तन्निष्ठप्रकारता-निरूपकत्वे सति अनुभवत्वम् अयथार्थानुभवस्य लक्षणम्। अत्रापि तत्पदेन प्रकारीभूतः धर्मः ग्राह्यः। रज्जुं दृष्ट्वा 'अयं सर्पः' इति भ्रमः जातः। अत्र 'अयं' इति पदेन रज्जुः उच्यते। तस्यां च सर्पत्वरूपः धर्मः भासते। अतः सर्पत्वं प्रकारीभूतः धर्मः। तत्पदेन सर्पत्वं ग्राह्यम्। तच्च रज्जौ नास्ति। अतः तदभाववती रज्जुः। सा च विशेष्या। विशेष्यता रज्जुनिष्ठा। तया निरूपकं ज्ञानम्। पुनः तत्पदेन सर्पत्वं ग्राह्यम्। तन्निष्ठा प्रकारता। तस्याः च निरूपकं ज्ञानम्। एवञ्च ज्ञाने सर्पत्वाभाववन्निष्ठविशेष्यतानिरूपकत्वं सर्पत्वनिष्ठ-प्रकारतानिरूपकत्वं चास्ति, अनुभवत्वं च विद्यते इति लक्षणसमन्वयः।

एवं, व्याघ्रस्य चित्रं दृष्ट्वा 'अयं व्याघ्रः' इति भ्रमो जातः। अत्र अयम् इति पुरतः स्थितं चित्रम्। तस्मिन् व्याघ्रत्वं भासते। चित्रे च व्याघ्रत्वं नास्ति। अतः तदभाववत् चित्रम्। तच्च विशेष्यम्। विशेष्यता चित्रपटनिष्ठा। तस्याः निरूपकं ज्ञानम्। एवं व्याघ्रत्वं प्रकारः, प्रकारता तन्निष्ठा। तथा च निरूपकं ज्ञानम्। एवञ्चास्मिन् ज्ञाने व्याघ्रत्वाभाववत् चित्रपट-निष्ठविशेष्यता-निरूपकत्वं, निरूपकत्वं अनुभवत्वञ्चास्ति। (प्रत्यक्षाभासोऽपि) प्रत्यक्षस्य आभासः। अर्थात् अयथार्थज्ञानमेव। अस्य विषये चिन्तयामः।

विज्ञानादिनां बाह्यार्थानुमेयवादिनां शुन्यवादिनाञ्च बौद्धानां दर्शने भ्रान्ति-संवृति-साज्ञान-अनुमान-आनुमानिक-स्मरण-अभिलाष-भेदेन[2] प्रमाभासज्ञानं विभक्तं दृश्यते प्रमाणवार्तिक प्रमाणवार्तिकभाष्येषु[3]। स्मृति -प्रत्यभिज्ञान-तर्क-अनुमाना-आगमभेदात् परोक्षज्ञानविभागं तेषां प्रामाण्यञ्च स्वीकर्तृणां जैनानां दर्शने विकल्प-संशयावेव प्रमाभासाविति स्वीकृतम् प्रमेयकमलमार्ताण्ड[4] प्रमाणमीमंसा प्रमेयरत्नाकर[5] प्रमेयरत्नमालादिषु। मीमासायां संशय-विपर्यय- तर्क अनध्यवसाय-विकल्प-अनुवाद-स्मृतयः प्रमाभासा इति वर्णिताः[6]। सांख्यदर्शने[7] "पंचपर्वा अविद्येति विपर्यय-अस्मिता-राग- द्वेष-अभिनिवेशभेदेन प्रमाभासभेदाः वर्णिताः सांख्य प्रवचनभाष्ये[8]।

योगदर्शने[9] च ईश्वरप्रणिधानस्य अन्तरायभूतानां चित्तविक्षेपकराणां व्याधि-अस्त्यान-संशय-प्रमाद-आलास्य-अविरति भ्रान्तिदर्शन-लब्धभूमिकात्व - अनास्थितत्वानां परिगणना, तेषां आविद्यकत्वकथनाच्च तेषामपि प्रमाभासता वर्णिता भवति।। अद्वेतवेदान्तदर्शने तु सोपाधिकनिरुपाधिकभेदेन अप्रमा द्विविधेति दृश्यते। सर्वं विज्ञानं यथार्थमेवेति स्वकर्तरि विशिष्टाद्वैतदर्शने अयथार्थज्ञानमप्रमाज्ञानं प्रमाभासज्ञानं वा न स्वीक्रियते[10]। संशयविपर्यय-भेदेन अप्रमाज्ञानं द्विविधमिति द्वैतदर्शने प्रमाणपद्धति - प्रमाणसंग्रह -प्रमाणचन्द्रिकादौ दृश्यते। कृष्णभक्तिप्रधाने चैतन्यसम्प्रदाये भ्रमः प्रमादो विप्रलिप्सा-करणापाटवञ्चेति अप्रमाहेतवः, तन्मूलकाप्रमाण्यज्ञानञ्च स्वीकृतम् श्रीतत्त्वसन्दर्भव्याख्या-बलदेवविद्याभूषणटीका[11]। वल्लभदर्शने निर्विकल्पक-सविकल्पकभेदेन ज्ञानद्वयं स्वीकृत्य सविकल्पकस्य संशय-विपर्यय-निश्चय-स्मृति-स्वाप्रवृतिभेदात् पञ्चधा विभागः कृतः संशयादिविनिर्मुक्ता चिच्छक्तिर्मानमुच्यते"[12] इति, संशय-विपर्यय-स्मृति-व्यति-रिक्ता प्रमापरपर्याया आत्मचिच्छक्तिरिति प्रमाणसामान्यलक्षणवादिनि शैवदर्शने अप्रमाज्ञानं संशय-विपर्यय-स्मृति-भेदेन त्रिविधं-स्वीकृतम्[13]।

एवं शैवदर्शनेऽपि संशयविपर्ययस्मृतिव्यतिरिक्ताया आत्मचिच्छक्तेः प्रमात्वस्वीकर्तरि संशयादीनां प्रमाभासत्वं स्वीकृतं भवति (शैवपरिभाषा)। शाङ्कराद्वैतवेदान्तदर्शने अयथार्थज्ञानमेव अध्यासनाम्ना वर्णितम्। परत्र पूर्वदृष्टावभास इति लक्षणञ्चोपवर्णितम्। प्रतिपादयिष्यते चेदं विपर्ययनिरूपणावसरे।

अन्यसम्प्रयोगात् अन्यविषयकं ज्ञानं प्रत्यक्षाभासमिति भ्रमज्ञानं प्रत्यक्षाभासशब्देन व्यवह्रियते। प्रत्यक्षज्ञानञ्च भ्रमप्रमाभेदात् द्विविधमिति न्यायसिद्धान्ततत्त्वामृते। तत्र भ्रमज्ञानमेव अयथार्थज्ञानमित्युच्यते। पित्त-दूरत्व-तमो-विद्युत्-मण्डूकवसाञ्जन-अधर्मादिभिर्नाना-

---

[1] विभागाध्यक्षः, न्याय-वैशेषिकविभागः,क.सं.वि., बेङ्गलूरु।

[2] प्रमाणसमुच्चय , प.20

[3] प.332

[4] प.13

[5] प.13

[6] प्रमाणलक्षणे प. 2

[7] सांख्यतत्वकौमुदी कारिका 47

[8] सांख्य प्रवचनभाष्ये (3/37)

[9]योगसूत्र- व्यासभाष्य-तत्त्ववैशरदी (1/30,2/24

[10] यतीन्द्रमतदीपिका प.8

[11] प.12

[12] (प्रस्थानरत्नाकर प.14)

[13] (शैवपरिभाषा प.3)

विधैर्दोषैः पुरोवर्तिनि पदार्थे सत्यवस्तुस्वरूपनिर्धारणं न जायते। परन्तु विपरितात्मकं सन्देहात्मकं वा ज्ञानमुद्भवति - यथा शङ्खे पीतशङ्ख इति, लोहितस्स्फटिक इति, वृक्षे स्थाणुर्वा पुरुषो वेति, चन्द्रे द्विचन्द्र इति, अनात्मनि शरीरे गौरोऽहमिति अम्बरे अञ्जनचूर्णपुञ्जश्यामं शार्वरं तम इति, आदर्शे मुखमिति वंशे उरग इति, धूमवदभिमतैः बाष्पादिभिः पर्वतो वह्निमानिति, विषाणित्वमात्रेण गवयसादृश्याद्वा अगवि गौरिति, प्रतारकवाक्यात् नद्यास्तीरे पञ्च फलानि सन्तीत्यादीनि अयथार्थज्ञानानि जायन्ते। एतानि अतत्वानुभवजनकत्वात् अप्रमा अयथार्थज्ञानम्, अविद्या, मिथ्याज्ञानम् भ्रमः, प्रत्यक्षाभास इत्यादिशब्देन कथ्यन्ते। स्पष्टञ्चेदं न्यायवैशेषिकग्रन्थेषु। तत्र न्यायसूत्रे[1] न्यायभाष्ये च मिथ्याशब्देन, वैशेषिकसूत्रे[2] प्रशस्तपादभाष्ये च अविद्याशब्देन च एतानि निर्दिष्टानि। लक्षणं किमपि न वर्णितम। "इन्द्रियदोषात् संस्कारदोषाच्चाविद्या"[3] इति अविद्याकारणानि प्रतिपाद्य "अदुष्ट विद्या"[4] इति वदता वैशेषिकसूत्रेण दुष्टं ज्ञानमविद्येति सूचितम्। दुष्टत्वञ्च अन्यथाग्राहित्वम्, तदभाववति तत्प्रकारकत्वं वेति वक्तव्यम्। तत एव तद् दुष्टं ज्ञानमिति चोक्तम्।

न्यायकन्दल्यां सन्दिग्धबाधिताध्यवसायात्मिका अविद्येति, देशकालावस्थादिभेदेन अबाध्यमानोऽध्यवसायो विद्येति, तद्विपरीता अविद्येति च वदन्त्या व्योमवत्या देशकालावस्थादिभेदेन बाध्यमानोऽध्यवसाय अविद्येति, गुरुमते विशिष्टव्यवहारकारणं यन्न भवति तादृशं विज्ञानमविद्येति, अतस्मिन् तत्प्रत्यय इति न्यायवार्तिक[5] तर्कभाषा कारिकावलीषु[6] अतत्त्वानुभव अप्रमेति सप्तपदार्थ्याम्, अर्थव्यभिचारि अप्रमाणजन्यं ज्ञानमयथार्थज्ञानम्, अस्य अयथार्थत्वञ्च तदभाववति तत्प्रकारकत्वमिति यथा पुरोवर्तिनि अरजते शुक्त्यादौ इदं रजतमिति रजतत्वारोप इति तर्कभाषायां। तर्कदीपिकायञ्च, यत्र यन्नास्ति तत्र तस्य ज्ञानम्, तदभाववति तत्प्रकारकं ज्ञानम्, स्वसमानाधिकरण-प्रकारानवच्छिन्नविषयताप्रतियोगिज्ञानम्,स्वव्यधिकरणप्रकारानवच्छिन्नविषयताप्रतियोगिज्ञानमप्रमेति च चिन्तामणितर्कदीपिकयोः, तदभाववति तत्प्रकारकोऽनुभव अप्रमेति तर्कसंग्रहे, प्रमाणाभासजन्य अयथार्थानुभव अप्रमेति तर्ककौमुद्याम्, स्वानुयोगिनिष्ठत्व, स्वावच्छिन्नत्व एतत्त्रितयसम्बन्धेन सम्बन्धविशिष्टान्यप्रकारताशालिज्ञानत्वमप्रमात्वमिति गादाधर्यवच्छेदकतानिरुक्तौ, विशेष्यताव्यधिकरणप्रकारकं ज्ञानम-प्रमेति न्यायसिद्धान्तमञ्जर्याम्, मिथ्याज्ञानापरपर्याय अयथार्थज्ञाननिश्चय इति विश्वनाथीयगौतमसूत्रवृत्तौ, "तच्छून्ये तन्मतिर्या स्यात् अप्रमा सा" इति कारिकावल्याम्[7] तदभाववति तत्प्रकारकं ज्ञानं भ्रम इति, तदभाववन्निष्ठविशेष्यतानिरूपिता या तन्निष्ठा प्रकारता तन्निरूपित-ज्ञानत्वमप्रमात्वम्, रजतत्वाभाववच्छुक्तिनिष्ठविशेष्यतानिरूपिता या रजतत्वनिष्ठ प्रकारता तन्निरूपितज्ञानत्वस्य शुक्तौ इदं रजतमित्यत्र सत्वादिति च मुक्तावल्याम्, विपरीतार्थनिर्णय अप्रमेति तर्ककौमुद्याम्, यत्प्रकारिका या विषयता तत्प्रकारक व्यधिकरणविषयताकं ज्ञानं भ्रम इति मथुरानाथीये, तदभाववति तत्प्रकारकं ज्ञानं भ्रम इति पदार्थरत्नमालयाम्, प्रमाभिन्नत्वे सति इन्द्रियत्वेन इन्द्रियजन्यं ज्ञानं भ्रम इति लक्षणराजौ, अन्यख्यातिरप्रमेति वल्लभसम्प्रदायीये प्रमेयरत्नार्णवे, प्रत्यक्षज्ञानस्य भ्रमप्रमाभेदेन द्वैविध्यं स्वीकुर्वन्ति न्यायसिद्धान्ततत्त्वामृते प्रमाभिन्नं ज्ञानं भ्रम इति लक्षणानि निर्दिष्टानि दृश्यन्ते। प्रमाणनयतत्त्वालोके रत्नाकरावतारिकायां च जैनाः अतस्मिन् तदध्यवसायस्समारोप एव अप्रमेति वर्णयन्ति। बौद्धाश्च कल्पनपोढं प्रत्यक्षम्, ततो विकल्पस्त्रिविधोऽपि प्रत्यक्षाभास इति प्रमाणवार्तिकभाष्ये[8] वदन्ति।

तदभाववति तत्प्रकारकं ज्ञानमारोपः, स द्विविधः - आहार्यः, भ्रमश्चेति। तत्र बाधज्ञानसमकालिकेच्छाजन्यज्ञानमारोपः, यथा रजतत्वाभाववतीं शुक्तिं रजतत्वेन जानीयामिति बाधज्ञानसमकालिकेच्छाजन्यम् इदं रजतमिति ज्ञानम्। भ्रमे तु उत्तरकाले नेदं रजतम्, किं तर्हि इयं शुक्तिरिति बाधज्ञानं भवतीति विशेष इति प्रत्यक्षाभास ज्ञानम् वक्तव्यम्। एवमाहर्यज्ञानमपि प्रत्यक्षाभासः, प्रमा भास इति स्वविरोधिधर्म-धर्मितावच्छेदकक-स्वप्रकारकं ज्ञानमाहार्यमिति हेत्वाभाससामान्यनिरुक्तिगङ्गाटिप्पण्यां वर्णितम्। यथा इदं रजतमित्यत्र स्व रजतत्वं, तद्विरोधी धर्मः रजतत्वाभावः स धर्मिताऽवच्छेदको यत्र, एवं स्वं रजतत्वं प्रकारो यत्र तादृशं ज्ञानमियं शुक्ती रजतमिति ज्ञानम्, तदेवाहार्यमिति तस्याप्याभासत्वमुपवर्णितम्।

**अप्रमाभेदाः-** अयथार्थात्मिका चेयमप्रमा संशय-विपर्यय-अनध्यावसाय-स्वप्नभेदेन चतुर्धेति प्रशस्तपादभाष्ये न्यायकन्दल्याम्, सप्तपदार्थ्याञ्च विद्यते। संशयनिश्चय व्यतिरेकेण तर्कज्ञानस्यासंवेदनात्, इन्द्रियार्थसन्निकर्षादिरेव तर्कोत्पत्तौ प्रमाणमिति प्रत्यक्षफलादविशेषाच्च तर्को न ज्ञानान्तरम् परन्तु संशयनिश्चययोरेवान्तर्भाव इति व्योमवत्यां दृश्यते। समानतन्त्रे न्यायदर्शने तर्कस्य प्रतिपादितत्वात् वैशेषिकदर्शने तस्यानभिधानयित्यपि वक्तुं शक्यते। यद्यपि संशयनिर्णयाभ्यां तर्को न भिद्यते, किञ्च अनुमानमेव तर्क इत्यप्याहुः तथापि प्रमाणानामनुग्राहकत्वात् तर्कस्य पृथगुपादानमिति न्यायवार्तिके[9]। ततश्च पश्चात्तनेषु न्यायवैशेषिकग्रन्थेषु तर्कभाषा - तर्कसंग्रह पदार्थरत्नमालादिषु संशय-विपर्यय- तर्क-भेदेन अप्रमा त्रिविधेति वर्णिता। तर्ककौमुद्यां भ्रमसंशयभेदेन अप्रमा द्विविधेत्युक्त्वा संशय विपर्ययतर्कयोरन्तर्भावो वर्णितः। "तत्तप्रपञ्चो विपर्यासः संशयोऽपि प्रकीर्तितः" इति करिकावल्याम्[10] मुक्तावल्याम् अप्रमा संशयविपर्ययभेदेन द्विविधेति वर्णिता। तर्कसंग्रहे अप्रमाजन्या स्मृतिरपि स्वीकृता। ततश्च संशय-विपर्यय- तर्क अयथार्थस्मृतयश्चेति अप्रमाभेदाः न्यायवैशेषिकेषु वर्णिताः। एवं च प्रत्यक्षाभासविचार अस्तिकनास्तिकदर्शनेषु विमृष्टा ते अत्र विचारिताः सन्ति।

********************

[1] 1-1-2

[2] 9-2-10,11

[3] 9-2-10

[4] 9-2-13

[5] 1-1-2

[6] का. 127

[7] का. 127

[8] प. 332

[9] प.17

[10] का.127

ISSN 2348-7828

# विविधशास्त्रदृशा शाब्दबोधकारणीभूताकाङ्क्षाविमर्शः

डा.जगन्नाथशर्मा सापकोटा[1]

**शोधसारः**

पदेन पदार्थोपस्थितौ शाब्दबोधे जननीये आकाङ्क्षायोग्यतासत्तितात्पर्यज्ञानानां सहकारिकारणत्वमिति सकलतन्त्रप्रसिद्धम्। अथ योग्यतातात्पर्यज्ञानयोरभावेऽपि शाब्दबोधस्यानुभाविकत्त्वेन तयोः केवलं शाब्दबोधस्य प्रामाण्यग्रहे सहकारित्त्वम्, न तु तज्जनने इति केषाञ्चन मतेऽपि योग्यताज्ञानं प्रामाण्यग्रहोपकारकं विद्यत एव। इत्थं शाब्दग्रहे तत्प्रामाण्यग्रहे वा सहकारकत्वेन प्रसिद्धेषु सहकारिकारणेषु प्रथमोपस्थिताङ्क्षां प्रकाशयितुमयं शोधो विधीयते। तदर्थं शाब्दबोधस्य सर्वप्रथमं स्वरूपम् परिचाय्य न्यायमीमांसाव्याकरणादिशास्त्र-सिद्धान्तानुगुणं तस्यान्वयप्रकारं प्रदर्श्य तत्रैव च शाब्दबोधे आकाङ्क्षाया अभावे शाब्दबोधस्यानुदयात् अन्वयव्यतिरेकेण तस्या कारणत्त्वमुपपाद्य तस्या आकाङ्क्षायाः विविधशास्त्रदृशा स्वरूपं लक्षणञ्च स्फुटं विवेचयिष्यते।

**कुञ्जिशब्दाः – शाब्दबोधः, आकाङ्क्षा, कारणम्, योग्यता, पदार्थोपस्थितिः, शब्दशास्त्रम्।**

**शोधोद्देश्यम्**

शाब्दबोधसहकारिकारणेष्वन्यतममिदं कारणमाकाङ्क्षा नाम। आकाङ्क्षया नियमित एव शाब्दबोधोऽपूर्वो भवति इत्यत्र न कस्यचिदपि दार्शनिकस्य विवादं पर्यालोचयामः।अत एव ह्ययं शाब्दबोधसहकारिकारणेषु प्राथम्येन परिगण्यते।अतः एतस्य विषये बहूनां दार्शनिकानां बहूनि मतानि विद्यन्ते, तत्तन्मतानां तत्र तत्र लेखादिषु कार्याणां सिद्धत्त्वेऽपि निखिलदर्शनसम्मताकाङ्क्षाविषयस्य सर्वांशतोऽवगमनाय निखिलतद्तद्ग्रन्थावलोकनश्रम एव शरणम्।अत एवास्मिन्विषय आकाङ्क्षाख्ये विविधानां मतानामुल्लेखनपुरस्सरं यथायुक्ति विवेचनमिह विधास्यते। तदेव चास्यापूर्वत्त्वे प्रयोजकं भवति। येनैतद्विषयकजिज्ञासवोऽनायासेनैवाकाङ्क्षां परिचेष्यन्ति।विशेषतश्चैताः संशीतयो लेखेनास्य समाहिताः भविष्यन्ति –

- शाब्दबोधस्याकाङ्क्षाज्ञाननियम्यत्त्वे किं प्रमाणम् प्रयोजनञ्च ?
- विविधदर्शनरीत्या शाब्दबोधप्रकारः कथम् ?
- विविधदर्शनरीत्या आकाङ्क्षास्वरूपं किम् ?
- कुतः आकाङ्क्षायाः ज्ञातत्वे एव कारणत्त्वम् न स्वरूपतः ?
- आकाङ्क्षा पदनिष्ठा उतार्थनिष्ठा ?
- आकाङ्क्षाया अर्थनिष्ठत्त्वे इदं पदं साकाङ्क्षमिति व्यवहारः कथम् ?
- पदयोः सम्बन्धाभावादाकाङ्क्षाया पदनिष्ठत्त्वे का युक्तिः ?

**विषयप्रवेशः**

शब्दस्यायम्(अर्थः) शाब्दः,शब्दजन्यप्रतीतिविषय इति यावत्। तस्य बोधः शाब्दबोधः। केषुचिच्छब्देषु श्रुतेषु तेषामर्थज्ञानेन परस्परं विशेष्यविशेषणभावापन्नः विलक्षण एकः बोधः जायते स एव च शाब्दबोधः इति सकलतन्त्रप्रसिद्धिः। तेषाञ्चार्थानां परस्परं विशेष्यविशेषणभावसम्बन्धः क्वचित् सम्बन्धान्तरमूलको भवति क्वचिच्च इतरसम्बन्धानवच्छिन्नविशेष्यविशेषणभावात्मको भवति। यथा राज्ञः पुरुषः इत्यादौ राजा पुरुषे विशेषणम्, पुरुषः विशेष्यः।अत्र विशेष्यविशेषणभावसम्बन्धः स्वस्वामिभावसम्बन्धमूलको वर्तते। अत्र राजा स्वामी पुरुषः स्वम्। एवञ्च उभयोः परस्परं विशेष्यविशेषणभावः सम्बन्धः। नीलो घटः इत्यत्र नीलपदार्थघटपदार्थयोः परस्परमितर-सम्बन्धानवच्छिन्नविशेष्यविशेषणभावः सम्बन्धः। अत्र अभेदसम्बन्धाङ्गीकर्तृमते तावत् अभेदसम्बन्धावच्छिन्नविशेष्यविशेषण-भावसम्बन्धः, तदनङ्गीकर्तृमते इतरसम्बन्धानवच्छिन्नविशेष्यविशेषणभावसम्बन्धः। तत्र सर्वं वाक्यं क्रियया समाप्यते इत्यतः पदसमूहः वाक्यम् तदा भवति यदा तत्र एकं वा तिङन्तं भवेत्। अत एव "एकतिङ् वाक्यम्"[2] इति वाक्यलक्षणम् सम्भवति। ननु यदि एकतिङ्वाक्यमिति लक्षणम्, तदा देवदत्तः पचति भवति इति भष्यकारीयप्रयोगे तिङन्तद्वयस्य सत्वेन उत्तरसंख्यायाः पूर्वसंख्याबाधकत्वेन च तस्य एकवाक्यत्वं न स्यात्। नैष दोषः। एकशब्दस्य प्रधानार्थकस्यापि प्रसिद्धत्वेन अत्र च तादृशस्यैव च ग्रहणात् देवदत्तः पचति भवति इति वाक्येऽपि सामान्यक्रियायाः सत्तारूपाया प्राधान्येन प्रधानतिङन्तविशिष्टत्वेन एकवाक्यत्वं सूपपादम्। एवञ्च लोके क्रियावाचकपदविशिष्टस्यैव पदसमूहस्य प्रयोगेण तज्जन्यबोधः एव शाब्दबोध इति कथ्यते। वृक्षः इत्यादावपि अस्तिर्भवन्तीपरः अप्रयुज्यमानोऽप्यस्ति इति भाष्यप्रामाण्यात् अस्तिक्रियायाः अध्याहारः वर्तत एव। एवञ्च सर्व वाक्यं क्रियया समाप्यते इति सङ्गतमेव। क्रिया साधनाधीना भवति। साधनत्वं नाम कारकत्वम्।कारकत्वं

[1] सहप्राध्यापकः, नेपालसंस्कृतविश्वविद्यालयः,महेशसंस्कृतगुरुकुलम्, देवघट्टः, नेपालदेशः

[2].कात्यायनवार्तिकम्.१२०१॥

नाम क्रियाजनकत्वम् ।एवञ्च क्रिया अवश्यं कारकान्तरमाक्षिपत्येव। कारकाणि च स्वजन्यक्रियायामन्वयं प्राप्नुवन्ति। एवञ्च क्रियाकारकयोः मध्ये नित्यसाकाङ्क्षत्वेन परस्परमन्वयः, तत्र उभयोः परस्परमन्वये सति किञ्च प्रधानम्? किञ्चाप्रधानम् इति। अस्मिन् विषये वैमत्यं वर्तते। तत्र तावत् नैयायिकाः प्रथमान्तमुख्यविशेष्यकबोधमङ्गीकुर्वन्ति। तेषां मते प्रथमान्तार्थः मुख्यविशेष्यतया भासते। तथा हि देवदत्तः गृहं गच्छति इत्यत्र द्वितीयायाः कर्मत्वमर्थः, धातोः गमनम् अर्थः। जनकत्वञ्च संसर्गमर्यादया भासते।लटः वर्तमानत्वमर्थः आख्यातस्य च कृतिः अर्थः, तयोः सम्बन्धश्च संसर्गमर्यादया भासते। रथो गच्छति इत्यादौ तु आख्यातस्य कृतौ शक्तिस्वीकारे रथे कृत्यसम्भवेन बाधात् व्यापारः अर्थः। गमनार्थस्य आख्यातार्थकृतौ अनुकूलत्वसम्बन्धेनान्वयः, आख्यातार्थस्य च कृतेः आश्रयतासम्बन्धेन प्रथमान्तार्थे अन्वयः। एवञ्च उत्तरदेशसंयोग-रूपगमनानुकूलग्रामनिष्ठकर्मत्वनिरूपकव्यापारानुकूलकृतिमान् देवदत्तः इति शाब्दबोध उपपद्यते। कर्मणि प्रयोगस्थले कर्मणि प्रथमा भवति इत्यतः तादृशस्थले कर्मणः प्रथमार्थस्यैव मुख्यविशेष्यतया भानम्। अथ मीमांसकनां नये भावनामुख्यविशेष्यकबोधः। सा च भावना शाब्दी भावना आर्थी भावना इति द्विविधा वर्तते।तत्र शाब्दी भावना लिङ्गांशेनाभिधीयते।आर्थीभावना च आख्यातत्वांशेनाभिधीयते। तेषां मते च आख्यातार्थः भावना, सा च कृतिरूपैव तत्र प्रवृत्तिरूपकृतिःआख्यातांशेनाभिधीयते, प्रवृत्त्यनुकूलव्यापाररूपा कृतिस्तु लिङ्गांशेनाभिधीयते।तत्र प्रकृतिप्रत्ययार्थयोः मध्ये प्रत्ययार्थः प्रधानम् इति न्यायवशात्, तेषां मते भावनायाः प्रत्ययार्थस्य प्राधान्येन भानं भवति। तत्रार्थी भावना प्राधान्येन भासते। एवञ्च भावनामुख्यविशेष्यकबोधः। यद्यपि वैयाकरणा अपि भावनामुख्यविशेष्यकबोधवादिनः, तथापि तेषां मते भावना पदेन व्यापारमात्रम् विवक्षितम् न तु कृतिमात्रम्, न वा तेषां मते कृतिः आख्यातवाच्यः। अपि तु धातूनामनेकार्थत्वात् आन्तरिकः बाह्यश्च व्यापारः धातुनैवाभिधीयते इत्यतः कृतिरपि धातुवाच्यैव। एवञ्च मीमांसकमते नैयायिकमते च आख्यातार्थः कृतिः तुल्यः परन्तु मीमांसकाः कृतिमुख्यविशेष्यकबोधमङ्गीकुर्वन्ति, नैयायिकास्तावत् प्रथमान्तार्थमुख्यविशेष्यकबोधमङ्गीकुर्वन्ति।

शाब्दिकास्तावत् व्यापारमुख्यविशेष्यकबोधमेवाङ्गीकुर्वन्ति। तेषां मते धातोः फले व्यापारे च शक्तिः। तत्र उभयोः स्थलभेदेन प्राधान्यमप्राधान्यञ्च भवति, परन्तु क्रियामुख्यविशेष्यकबोध एव सर्वसम्मतः। तत्र क्रियापदेन फलव्यापारयोरुभयोरपि स्वीकारात्। यथा रामः अस्ति इत्यत्र पश्यामः- अस्तीत्यत्र अस्धातोः सत्तानुकूलव्यापारोऽर्थः। तिप्प्रत्ययस्य लट्त्वतिङ्त्वैकवचनरूपैः कालकर्तृसंख्यारूपार्थाः प्रतीयन्ते। लट्त्वेन वर्तमानकालस्य तिङ्त्वेन कर्तुः एकवचनप्रत्ययेन एकत्वस्य च भानम्। वर्तमानकालस्य आधेयतासम्बन्धेन धात्वर्थे व्यापारेऽन्वयः।तिङर्थः कर्ता, कर्ता च व्यापाराश्रयः व्यापारस्य धातुलभ्यत्वात् "अनन्यलभ्यः शब्दार्थः" इति न्यायेन आश्रयमात्रं तु तिङर्थः। उक्तं हि -

**आश्रयोऽवधिरुद्देश्यं सम्बन्धः शक्तिरेव वा**

**यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः ॥**[1]

तिङर्थाश्रये प्रथमाया अभेदेन सम्बन्धेनान्वयः। तिङर्थस्याश्रयस्य(आख्यातार्थस्य) आधेयतासम्बन्धेन धात्वर्थेऽन्वयः। एकत्वसंख्यायाः आश्रयतासम्बन्धेन तिङर्थाश्रयेऽन्वयः।तथा च- रामाभिन्नैकाश्रयनिष्ठवर्तमानकालिकसत्तानुकूलव्यापारः॥ इति शाब्दबोधः। तथैव हरिं भजति इत्यत्र- हर्यभिन्नैकाश्रयनिष्ठप्रीत्यनुकूलदेवदत्ताभिन्नैकाश्रयनिष्ठवर्तमानकालिकव्यापारः॥ इति शाब्दबोधः प्राचीनानां वैयाकरणानां मते। नवीना-स्तावत् द्वितीयायाः आश्रये न शक्तिः अपि तु द्वितीयायाः कर्मत्वशक्तिः अर्थः शक्तिशक्तिमतोरभेदोपचारात् शक्तिमानर्थः इत्यतः तेषां मते शाब्दबोधः एवं भवति – हर्यभिन्नैककर्मत्वशक्तिमन्निष्ठकारकत्वैरूपितक्रियात्वाश्रयीभूतप्रीत्यनुकूलदेवदत्ताभिन्नैककर्तृनिष्ठवर्तमानकालिक-व्यापारः इति।

तथैव हरिः सेव्यते इत्यत्र प्राचीनानां मते (सेवधातोः भजधातोश्च समानार्थकत्वेन) पूर्वोक्तरीत्यैव बोधः। नवीनानां मते धात्वोः समानार्थकत्वेऽपि फलमुख्यविशेष्यक एव बोधः। तथा हि- देवदत्तेन हरिः सेव्यते इत्यत्र नवीनमते- देवदत्ताभिन्नैककर्तृत्व-शक्तिमन्निष्ठकारकत्व-निरूपितक्रियात्वाश्रयीभूतवर्तमानकालिकव्यापारप्रयोज्यहर्यभिन्नैककर्मत्वशक्तिमन्निष्ठा प्रीतिः इति शाब्दबोधः।

अत्र च महाभाष्यकाराणां वैयाकरणमते एव सम्मतिः वर्तते।तत्रापि नवीनानां मते एव भाष्यकाराशयः इति अभिगम्यते। सर्वप्रथमं तु व्यापारमुख्यशालिबोधः वैयाकरणसामान्यमते प्रसिद्धः। अत्र च सर्वप्रथमं प्रमाणं भावप्रधानमाख्यातम् इति वचनमेव। अत्र आख्यातमित्यनेन तिङन्तं स्वीक्रियते। एवञ्च तिङन्तं भावप्रधानमित्यनेन व्यापारमुख्यविशेष्यकबोधशालि इति अभिप्रायो गम्यते।

अयञ्च सर्वविधोऽपि शाब्दबोधः विविधेषु कारणेषु सत्स्वेव सम्भवति, तथा हि कस्मादपि पदसमूहात् शाब्दबोधप्रतीतौ -

**पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।**

**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥**[2]

इत्यभियुक्तोक्तकारणैस्सहाकाङ्क्षायोग्यतातात्पर्यादिज्ञानान्यप्यपेक्षितानि भवन्ति।सर्वप्रथमं हि वाक्ये श्रुते पदज्ञानं ततः पदार्थज्ञानं ततः पदार्थज्ञानरूपव्यापारानन्तरं शाब्दबोधः फलं समुपजायते।परन्तु क्वचित् एतेषु त्रिविधेषु सत्स्वपि शाब्दबोधः न भवति, यथा 'घटः

[1].वैयाकरणमतोन्मज्जनकारिका.सं-२४॥ [2].कारिकावली.का.सं-८१॥

कर्मत्वमानयनं कृतिः' इत्यादौ पदसमूहे। घटमानय इति वाक्यात् ये पदार्थाः उपतिष्ठन्ते, ते एव हि अस्मात् वाक्यादपि उपतिष्ठन्ते। परन्तु घटमानय इति पदसमूहश्रवणानन्तरं यः पुरुषः कम्बुग्रीवादिमत्पदार्थस्य आनयने प्रवर्तते स्म, स इदानीं 'घटः कर्मत्वमानयनं कृतिः' इति वाक्यश्रवणानन्तरं नैव प्रवर्तमानो दृश्यते, अत्रेदं रहस्यं वर्तते यत् तस्य पुरुषस्य एतादृशपदसमूहश्रवणानन्तरं शाब्दबोधः एव न जातः, तर्हि ज्ञानाभावे इच्छाभावेन प्रवृत्त्यभावः। परन्तु पदज्ञानपदार्थज्ञानानां सत्वेऽपि शाब्दबोधः कुतो न जातः इति प्रश्नोऽत्र जागर्ति, तस्य प्रश्नस्य उत्तरं भवति आकाङ्क्षाभाव एव अत्र कारणम् इति। शाब्दबोधे यथा पदज्ञानादीनां कारणत्वं वर्तते तद्वत् आकाङ्क्षाया अपि कारणत्वं वर्तते, तादृश्या आकाङ्क्षाया अभावादेवात्र शाब्दबोधः न जातः इति। का नाम आकाङ्क्षा इत्यत्र उदयनाचार्यादिभिः दार्शनिकान्तरैश्च बहुधा अस्याः परिचयः प्रदत्तो वर्तते। तात्पर्यटीकाकारोऽपि ब्रूते यत् - "तस्मात् पदानि कृतसङ्केतानि स्वार्थान् स्मारयन्ति, आकाङ्क्षायोग्यतासत्तिसध्रीचीनानि अदृष्टपूर्वं वाक्यार्थं बोधयन्ति, न संगतिग्रहणमपि प्रतीक्षन्त इति दूरेऽनुमानात् भवन्ति।" [1]इति।

**न्यायशास्त्रदिशा आकाङ्क्षाविमर्शः**

आकाङ्क्षाविषये श्रीमद्भिः विश्वनाथपञ्चाननभट्टाचार्यैः कारिकावल्यामभिधायि[2]-

**यत्पदेन विना यस्याननुभावकता भवेत्।**
**आकाङ्क्षा वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्॥इति॥**

घटमानय इति वाक्यात् यः शाब्दबोधः जायते, सः घटः कर्मत्वमानयनं कृतिः इति वाक्यात् नैवानुभवसिद्धः। इह शाब्दबोधस्य अनुभवाभावो यो लोकप्रसिद्धः सः अमादिपदाभावप्रयोज्यः, यदि कर्मत्वमिति पदस्य स्थाने अम्पदं स्यात्तदा शाब्दबोधो भवति, परन्तु साम्प्रतमम्पदाभावात् शाब्दबोधो न भवतीत्यतः शाब्दबोधाभावे अम्पदाभावः प्रयोजकः, एवञ्च अम्पदाभावप्रयोज्योऽत्र शाब्दबोधानुभवाभावः।

इह विचार्यते, आकाङ्क्षायाः शाब्दबोधे कारणत्त्वे अकाङ्क्षाभ्रमे सति शाब्दबोधोऽनुभवसिद्धो विरुद्ध्येत। कस्यचित् पुरुषस्य घटः कर्मत्वमानयनं कृतिः इति वाक्यादपि शाब्दबोधः भवति चेत् तत् केन वारयितुं शक्येत। एवञ्च तत्र वाक्ये आकाङ्क्षा नास्ति तथापि शाब्दबोधः जायते, अस्यानुभवस्य समर्थनाय अकाङ्क्षाज्ञानं शाब्दबोधे कारणमिति वक्तव्यम्, इदानीं तु वस्तुगत्या आकाङ्क्षाया अभावेऽपि तत्र आकाङ्क्षाज्ञानस्य सत्त्वेन शाब्दबोधः जायते इति वक्तुं शक्यते। परन्तु इदानीम् आकाङ्क्षाज्ञानं नाम 'यत्पदस्य यत्पदविरहप्रयोज्यशाब्द-बोधजनकत्वाभाववत्वं तत्पदे तत्पदवत्वज्ञानम्'। घटमानय इति वाक्ये आकाङ्क्षाज्ञानं नाम घटपदस्य अम्पदविरहप्रयोज्यशाब्दबोधजनक-त्वाभाववत्वं वर्तते इत्यतः घटपदे अम्पदवत्वज्ञानम् आकाङ्क्षाज्ञानम् भवति। परन्तु घटमानय इति वाक्यश्रवणानन्तरं घटपदस्य अम्पदविरहप्रयोज्यशाब्दबोधजनकत्वाभाववत्वज्ञानस्य बिलम्बे कार्ये शाब्दबोधे बिलम्बोऽनुभूयेत, परन्तु नैव प्रतीयते। एवञ्च कथं कार्यकारणभावोऽनयोर्वक्तुं शक्यते? इति।

अत्रोच्यते, अकाङ्क्षाभ्रमस्थल आकाङ्क्षाभावेऽप्याकाङ्क्षाज्ञानस्य सत्त्वेन शाब्दबोधो निर्वहणीय एव, तथापि आकाङ्क्षाज्ञाने घटकतया यत् अम्पदविरहप्रयोज्यशाब्दबोधजनकत्वाभावः वर्तते तस्य स्वरूपत एव कारणत्वमङ्गीक्रियते न तु तज्ज्ञानस्य।

अयमत्राशयः- द्विविधो हि कारणत्वव्यवहारो भवति, एकः स्वरूपत एव कारणत्वात् तत्र जायमानः व्यवहारः। यथा दाहं प्रति वह्नेः। अत्र हि वह्निः दाहं जनयति इति ज्ञानं विनापि तस्य स्पर्शे दाहः जायते।द्वितीयश्च व्यवहारो ज्ञानपूर्वकः। यथानुमितिं प्रति लिङ्गस्य, अत्र लिङ्गस्य ज्ञानमेव कारणम्।यदि लिङ्गं स्वरूपत एव कारणं स्यात्तदा अतीतानागतादिलिङ्गस्थले लिङ्गस्य स्वरूपतोऽभावेन "इयं यज्ञशाला अतीतवह्निमती अतीतधूमात्" इत्याद्यनुमितयः न सम्पद्येरन्। उक्तञ्च कारिकावल्यामपि -

**अनुमायां ज्ञायमानलिङ्गन्तु करणं न हि।**
**अनागतादिलिङ्गेन न स्यादनुमितिस्तदा॥** [3]इति॥

अतः एतादृशस्थले लिङ्गस्य ज्ञानद्वारा एव कारणत्वं वर्तते इति अङ्गीकर्तव्यम्॥ अत्रापि प्रश्नकर्त्रा आकाङ्क्षाघटकस्य यत्पदस्य यत्पदविरहप्रयोज्यशाब्दबोधजनकत्वाभावस्य ज्ञानद्वारा कारणत्वमिति मत्त्वा प्रश्नः कृतः, परन्तु उत्तरं तु आकाङ्क्षाघटकस्य तस्य स्वरूपत एव कारणत्वमङ्गीक्रियते, यथा दाहं प्रति अग्नेः वर्तते। एवञ्च तस्य ज्ञानस्य कारणत्वाकल्पनात् न तज्ज्ञानबिलम्बेन शाब्दबोधबिलम्बापत्तिरूपदोषः।

एवञ्च आकाङ्क्षाज्ञानस्य शाब्दबोधस्य कार्यकारणभावः एवं वक्तव्यः:- यथा घटमानय इत्यत्र कर्मत्वविशेष्यकाधेयतासम्बन्धावच्छिन्नघट-निष्ठप्रकारतानिरूपकशाब्दबोधत्वावच्छिन्नं प्रति(नाम घटनिष्ठं कर्मत्वम् इति बोधं प्रति) घटपदोत्तराम्पदज्ञानं कारणम् इति।

अत्र प्रश्नः एवं सति कलशमानय इति वाक्यश्रवणानन्तरमपि पूर्वोक्तस्य कर्मत्वविशेष्यकाधेयतासम्बन्धावच्छिन्नघटनिष्ठप्रकारतानिरूपक-

---

[1]. न्यायवार्तिकतात्पर्यटीका.१.१.७, पृ-३७२॥

[2]. कारिकावली.का.सं-८४॥

[3]. कारिकावली.का.सं-६७॥

शाब्दबोधस्य जायमानत्वेन तत्र च कारणत्वेन घटपदोत्तराम्पदाभावेन व्यभिचारः इति। अत्र उच्यते तर्हि कारणं परिष्क्रियते, न केवलं घटपदोत्तराम्पदज्ञानं कारणमपि तु घटार्थकपदोत्तराम्पदज्ञानं कारणम् इति। एवञ्च पूर्वोक्तस्थले घटपदोत्तराम्पदस्याभावेऽपि घटार्थककलशपदोत्तराम्पदस्य सत्त्वेन कारणस्यापि सत्त्वात् न व्यभिचारदोषः। इति।

ननु तथापि घटस्य आनयनम् इति कृदन्तप्रयोगे षष्ठ्याः कर्मत्वार्थकतया घटनिष्ठं कर्मत्वमिति कर्मत्वविशेष्यकाधेयतासम्बन्धावच्छिन्नघटनिष्ठप्रकारतानिरूपकशाब्दबोधः अत्रापि इष्यते परन्तु अत्र घटार्थपदोत्तराम्पदं नास्ति, अपि तु घटार्थकपदोत्तरङस्पदं वर्तते। एवञ्च कारणाभावेऽपि कार्यस्य सत्त्वेन व्यभिचारः स्यात् इति चेत्, तर्हि कारणे इतोऽपि परिष्कारः क्रियते कर्मत्वविशेष्यकाधेयतासम्बन्धावच्छिन्नघटनिष्ठप्रकारतानिरूपकशाब्दबोधत्वावच्छिन्नं प्रति घटपदार्थकपदोत्तरकर्मत्वपदार्थकपदज्ञानं कारणमिति। पूर्वोक्तस्थले घटार्थकपदोत्तराम्पदस्याभावेऽपि घटार्थकपदोत्तरकर्मत्वार्थकङस्पदस्य सत्वेन कारणस्यापि सत्त्वात् न व्यभिचारः इति।

ननु इदानीमपि मौनिश्लोकादीनां आकाङ्क्षादिमत्वं न स्यात् तत्र मौनिना पदानामनुच्चारणेन पदस्य अभावेन पदे पदवत्त्वरूपाकाङ्क्षाया वक्तुमशक्यत्वादिति चेत्, तन्न आकाङ्क्षालक्षणे पदपदस्य पदज्ञानपरत्वेनादोषात्। मौनिश्लोकादौ पदस्याभावेऽपि पदज्ञानं तु सम्भवति इत्यतः न तेषु आकाङ्क्षाभावापत्तिरूपदोषापत्तिः।पदज्ञानं तु तत्र लिप्यादिना अनुमितमिति अनुमित्यात्मकं ग्राह्यम्।

ननु एवमपि 'अयमेति पुत्रो राज्ञः, पुरुषोऽपसार्यताम्' इत्यादिप्रयोगस्थले शाब्दबोधाभावदशायां राजपदस्य पुत्रपदेनेव पुरुषपदेनापि आकाङ्क्षायाः सत्त्वेन 'राज्ञः पुरुषः' इति शाब्दबोधापत्तिः इति चेत् तन्न, यतो हि न केवलमाकाङ्क्षाज्ञानमात्रं शाब्दबोधकारणम्, योग्यताज्ञानादीनामपि शाब्दबोधे कारणत्वस्याङ्गीकारेण तत्र तात्पर्यज्ञानस्यापि प्रवेशेन अत्र राज्ञः पुरुषपदार्थेनान्वये तात्पर्यस्याभावेन राज्ञः पुरुषः इति शाब्दबोधापत्तिरूपदूषणस्य असत्त्वात्।

मूर्धन्यप्रामाणिकनैयायिकाः गदाधरभट्टाचार्याः अपि स्वग्रन्थे आकाङ्क्षाज्ञानस्य कारणत्वमङ्गीकृतवन्तः। ते हि स्वग्रन्थे व्युत्पत्तिवादे शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते इति अभिधाय पुनः एकपदार्थविशेष्यकापरपदार्थप्रकारककिञ्चित्संसर्गकशाब्दबुद्धित्वावच्छिन्नं प्रति तत्तत्पदसमभिव्याहाररूपाकाङ्क्षाज्ञानं कारणमिति अभिहितवन्तः। इदं तु सामान्यतः आकाङ्क्षायाः शाब्दबोधे कार्यकारणभावः।ततः परं विशेषेण कार्यकारणभावा अपि तैः सूचिताः।

एवं हि आशयः यत् न केवलं घटमानय इत्यादाविव घटपदे अम्पदवत्त्वम् इति रूपेण प्रकृतिप्रत्यययोरेव आकाङ्क्षा भवति, अपि तु अन्यत्रापि आकाङ्क्षा सम्भवति- यथा अभेदसंसर्गकनीलादिप्रकारकघटादिविशेष्यकशाब्दबोधे नीलादिपदाव्यवहितोत्तरघटादिपदवत्त्वम्, नीलादिघटादिपदयोः समानविभक्तिकत्वम् वा च आकाङ्क्षा। तथैव कर्तृत्वकर्मत्वाद्यर्थकषष्ठ्या शाब्दबोधजनने कृदन्तपदसमभिव्याहारोऽपि आकाङ्क्षा। एवमाख्यातेन भावकर्मत्वयोर्विवक्षायां यगात्मनेपदसमभिव्याहारोऽप्याकाङ्क्षा। अत एव हि भट्टाचार्यैः आकाङ्क्षाविषये अभिहितम्- **स च क्वचिदभेदः, क्वचिच्च तदतिरिक्त एव आधाराधेयभावप्रतियोग्यनुयोगिभावविषयविषयिभावादिः**[1]। इति।

**मीमांसाशास्त्रदिशा आकाङ्क्षाविमर्शः**

आकाङ्क्षा नाम मीमांसकानां मते प्रतिपत्तुः जिज्ञासा एव। प्रतिपत्ता नाम ज्ञाता। सा हि जिज्ञासा अन्यसाकाङ्क्षा भवति। तस्याः जिज्ञासायाः उत्पत्तौ किं बीजमिति चेत्, अत्र केचन अविनाभावः तत्र कारणमिति कथयन्ति।अयं हि तेषामाशयः यः पदार्थः येन पदार्थेन सह अविनाभावेन भवति सः एकस्य पदार्थस्य ज्ञानानन्तरमपरं पदार्थं स्मारयति।तदा आकाङ्क्षा उत्पन्ना इत्यभिप्रायः। यथा क्रियाकारकयोः। तत्र हि कारकं क्रियाजनकम् भवति इत्यतः कारके श्रुते तज्जन्यायाः क्रियायाः आकाङ्क्षा जायते। क्रियां श्रुत्वा पुनः तज्जनकस्य कारकस्य आकाङ्क्षा जायाते। कारकं हि क्रियाजनकं भवति। एवञ्च अविनाभावस्य सत्वेन आकाङ्क्षा नाम प्रतिपत्तुः जिज्ञासा उदेति इति। तत् न सम्यक्, एवं सति जिज्ञासाया अविरामः स्यात्, यतो हि त्वन्मते हि अविनाभाव एव हि जिज्ञासोत्पत्तौ प्रयोजकः, तथा सति कारके न केवलं क्रिया एव अविनाभावेन वर्तते, अपि तु तद्गतगुणा अपि अविनाभावेन भवन्त्येव, तेषु गुणेषु पुनः अन्ये गुणादयः इति एवं रूपेण अविनाभावस्यैव प्रतिपत्तृजिज्ञासारूपाकाङ्क्षाप्रयोजकत्वे अनवस्था प्राप्नोति। ननु कारकगतगुणादीनां प्रयोजनाभावेनैव तद्विषयिणी जिज्ञासा नोदेति इति वदामः तथा च जिज्ञासोदयं प्रति न केवलं अविनाभावः कारणमपि तु सप्रयोजनकत्वे सति अविनाभावः कारणमिति, एवं सति नैवानवस्थादोषः इति चेत्, तथा सति सर्वत्र कारकस्य ज्ञानानन्तरं क्रियायाः ज्ञानस्य प्रयोजनवत्वस्य वक्तुमशक्यत्वेन प्रयोजनाभावस्थले क्रियाया आकाङ्क्षा न स्यात्, न चेष्टापत्तिः, तथा सति क्रियायाः अध्याहारं विनैव शाब्दबोधे सति भावनामुख्यविशेष्यकबोधस्य सिद्धान्तसिद्धस्य अपलापापत्तिः।

अथ च अविनाभावस्यैव आकाङ्क्षाप्रयोजकतवे नीलं सरोजमित्यादौ या आकाङ्क्षा इष्यते सा न सिद्ध्येत्, यतो हि तत्र नीलपदार्थसरोजपदार्थयोः अविनाभावस्य वक्तुमशक्यत्वात्। सर्वत्र सरोजं नीलमेव भवतीति वक्तुं न शक्यते। अपि तु नीलभिन्नमपि सरोजम्

[1]. व्युत्पत्तिवादः.पृ.१॥

अन्यत्र भवति।अतः नेदं मतं युक्तम्। तर्हि मीमांसकमतं वास्तविकं किमिति चेत्, वस्तुतः प्रतिपत्तुः जिज्ञासा एव आकाङ्क्षा परन्तु तस्याः प्रयोजकमविनाभावो न। अपि तु अभिधानापर्यवसानम्, अभिधेयापर्यवसानञ्च एतादृशजिज्ञासायाः कारणम्।

अभिधानापर्यवसानात् जिज्ञासा यथा घटमित्यादौ। अन्विताभिधानवादिनः अभिहितान्वयवादिनः इति द्वौ वादिनौ मीमांसके प्रसिद्धौ। तत्र तावत् अन्विताभिधानवादे घटादिशब्दाः अन्विते शक्ताः। यतो हि यथा घटमानय इत्युच्यमाने कम्बुग्रीवात्मकपदार्थः, कर्मत्वम्, कृतिः तेषां सम्बन्धाः निष्ठत्वादयश्च प्रतीयन्ते। तथा च एतेऽर्थाः पदाल्लब्धा इति वक्तव्यम्, यदि पदादलब्धा अप्यर्थाः शाब्दबोधे भासन्ते इत्युच्यते तर्हि घटशब्दात् पटपदार्थबोधापत्तिः ,अतः पदजन्यप्रतीतिविषयः एव पदार्थः इति वक्तव्यम्। एवमुच्यमानेऽपि घटशब्दोच्चारणे कृते शब्दस्याकाशवृत्तित्वात् आकाशस्याक्षेपे तस्य पदजन्यप्रतीतिविषयत्वाच्च शाब्दबोधे भानापत्तिः। अतः न केवलं पदजन्यप्रतीतिविषयः एव पदार्थः। अपि तु शक्त्या पदजन्यप्रतीतिविषयः एव पदार्थः इति वक्तव्यम्। एवमुच्यमाने यद्यन्विते शक्तिः नोपगम्यते तर्हि घटमानय इति वाक्ये प्रतीयमानः घटकर्मत्वयोः सम्बन्धः निष्ठत्वरूपः शाब्दबोधविषयो न स्यात्,तस्य पदागम्यत्वात्। अतः लोकप्रसिद्धिमङ्गीकृत्य यथा निष्ठत्वादिसम्बन्धः शाब्दबोधविषयः स्यात् तथानुसृत्यान्विते शक्तिरङ्गीकार्या। एवञ्च वाक्ये अन्वितस्य (सम्बन्धविशिष्टस्यैव) पदस्य सत्ता वर्तते। अस्यामवस्थायां यदि अम्पदं न प्रयुज्यते तर्हि कथं वा अन्विताभिधानस्य सिद्धान्तः उपपद्यते, यतो हि सम्बन्धः द्विष्ठः अनुयोगिनः अप्रसिद्धौ नैव सम्भवति इत्यतः अन्विताभिधानसिद्धान्तपरिरक्षणाय च आकाङ्क्षा अत्र जायत एव सा एव अभिधानापर्यवसानात्। अभिधानस्य पर्यवसानाभावेन इयमाकाङ्क्षा उत्थिता इत्यभिप्रायः।

अभिहितान्वयवादिनां मतेऽपि अभिधानापर्यवसानादेव आकाङ्क्षा।एतेषां मते हि घटादिशब्दाः केवलं कम्बुग्रीवादिमत्पदार्थादीनामेव बोधकाः।अस्मिन् पक्षे यथा घटमानय इत्युच्यमाने घटशब्दात् कम्बुग्रीवात्मकपदार्थः अम्पदात् कर्मत्वम्, तिप्पदात् कृतिःप्रतीयते। तथा च एतेऽर्थाःपदाल्लब्धाः। अत एव एतेषां शाब्दबोधे भानं जायते। परञ्च अन्योपि अर्थः वर्तते यस्य शाब्दबोधे अपदार्थत्वेऽपि भानं जायते। स च सम्बन्धरूपः। यथात्र घटकर्मत्वादीनां निष्ठत्वादिकम्। ननु एवं यदि पदादलब्धा अप्यर्थाः शाब्दबोधे भासन्ते इत्युच्यते तर्हि घटशब्दात् पटपदार्थबोधापत्तिः स्यात्,अतः शक्त्या पदजन्यप्रतीतिविषयः एव पदार्थः इति वक्तव्यम्। एवमुच्यमाने सति सम्बन्धानां कथं शाब्दबोधे भानं स्यात् इति चेत् खलु इति चेत् सत्यम् वृत्या पदजन्यप्रतीतिविषयः एव पदार्थः इति न्यायः अवश्यं वक्तव्यः। परन्तु लौकिकप्रसिद्ध्यनुसारेण लौकिकव्यवहारसंगमनाय चायं न्यायः प्रकारविशेष्ययोरेव इति वक्तव्यम्। तथा हि शाब्दबोधे त्रिविधा विषयता प्रसिद्धा वर्तते। प्रकारताख्या, विशेष्यताख्या संसर्गताख्या चेति। यथा अयं घटः इति शाब्दबोधे कम्बुग्रीवात्मकपदार्थःविशेष्यतया भासते। तन्निष्ठं घटत्वं प्रकारतया, तयोः सम्बन्धः समवायरूपश्च संसर्गतया। तासु त्रिविधविषयतासु केवलं प्रकारविशेष्यताख्यविषयतास्थल एवायं नियमः न तु संसर्गताख्यविषयतायाम्। एवञ्च संसर्गः पदाद्गम्य एव भवेत् इत्यत्र नियमाभावात् निष्ठत्वादिरूपस्य तस्य संसर्गमर्यादया भानमङ्गीक्रियते। अत एव हि अभिहितम् गदाधरभट्टाचार्यैः-शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते इति।[1] एतेषां मतेऽपि घटमित्यत्र अम्पदाभावे पदार्थस्य पदार्थान्तरेण अन्वयासामर्थ्यात् तस्य उपपादनाय प्रतियोगिजिज्ञासायाः युक्तत्वात् प्रकरणादिवशेन योग्यप्रतियोगिनः अध्याहारस्य वक्तुं शक्यत्वेन अभिधानापर्यवसानात् जिज्ञासा इति युक्तमेव।

द्वितीया भवति अभिधेयापर्यवसानात् जिज्ञासा- यथा विश्वजिता यजेत इत्यादौ। अत्र हि कार्यमुपात्तमित्यतः नैव अभिधानापर्यवसानं वर्तते, तथापि कर्ता नैव उपात्तोऽत्र, न हि नियोज्यभेदं विना कार्यं पर्यवस्यति, न हि अनुष्ठानं विना कार्यमवतिष्ठते।एवञ्च अत्र कर्ता कः इति प्रतिपत्तुः जिज्ञासा उदेति सा एव आकाङ्क्षा, तत्र पूर्ववत् प्रकरणादिकं मीमांसकपथमवलम्ब्य स्वर्गकामः कर्ता अध्याह्रियते। तदेयमाकाङ्क्षा शान्ता भवति। एवञ्च क्वचिदभिधानापर्यवसानात्, क्वचिच्च अभिधेयापर्यवसानाच्च जायमाना जिज्ञासा आकाङ्क्षाख्या शाब्दबोधे अध्याहारादिना जिज्ञासाशमिका कारणमिति मीमांसकानां सिद्धान्तः।स्पष्टं सर्वमिदं प्रकरणपञ्चिकायाम्॥[2]

**शब्दशास्त्रदिशा आकाङ्क्षाविमर्शः**

व्याकरणमहाभाष्यानुगुणमाकाङ्क्षा न पदनिष्ठा अपि तु अर्थनिष्ठा। तथा हि समर्थः पदविधिः[3] इति सूत्रे परस्परव्यपेक्षायाम् सामर्थ्यमेके इति अभिधाय का पुनः शब्दयोः व्यपेक्षा? न ब्रूमः शब्दयोरिति॥ किं तर्हि? अर्थयोः। इह राज्ञः पुरुष इत्युक्ते राजा पुरुषमपेक्षते। ममायमिति, पुरुषोऽपि राजानमपेक्षते अहमस्येति॥[4] इति अभिहितम्। अस्माच्च भाष्यात् आकाङ्क्षा साक्षात् अर्थे एवाभिहिता भवति।यद्यपि कस्मिंश्चिदर्थे ज्ञाते अस्यान्वयी अर्थः कः इति जिज्ञासायाम् अर्थान्तरस्योपस्थितिः इति आकाङ्क्षायाः इच्छारूपत्वेन इच्छायाश्च वक्तृनिष्ठत्वेन आकाङ्क्षा वक्तृनिष्ठा भवति, तथापि वक्तृनिष्ठाया आकाङ्क्षायाः अर्थे आरोपणं कृत्वायं प्रयोगः इत्यतः अर्थनिष्ठत्वव्यवहारः। ननु यदि आरोप एव कार्यः तर्हि शब्दे

[1]. व्युत्पत्तिवादः.पृ.६॥

[2]. प्र.पं.पृ.३८४-३८८ ॥

[3].पाणिनिसूत्रम्, २.१.१॥

[4].कात्यायनवार्तिकव्याख्याभाष्यम् वा.सं- ११९४॥

एवारोपः क्रियताम्, किमर्थे एवेत्यत्र विनिगमकमिति चेत्, तदपि न लोके अर्थबोधे सत्येव जिज्ञासा जायते, अस्यान्वयी अर्थः कः इति इत्यतः अर्थे आकाङ्क्षा वक्तुं शक्या न तु पदे इत्यभिप्रायः।इयं च आकाङ्क्षा अस्यान्वयी अर्थः कः इत्याकारिका इच्छैव। इयमेव जिज्ञासा इत्यभिधीयते। जिज्ञासायाञ्चास्यामेकपदार्थे अपरपदार्थव्यतिरेकप्रयुक्तस्यान्वयबोधाजनकत्वस्य ज्ञानम्। तदैव अस्य पदार्थस्यापरपदार्थः एतदन्वयी कः इति जिज्ञासा समुत्पद्यते। अत एव हि राज्ञः पुरुषः इत्यत्र पुरुषपदे समुच्चारिते सति तु तद्विषयिणी जिज्ञासा नैवोत्पद्यते।यथा घटमानय इति वक्तव्ये घटः कर्मत्वमानयनम् कृतिः इति यदि अभिधीयते तदा हि घटपदार्थस्य कर्मत्वविशिष्टस्य अस्यान्वयी अर्थः कः जिज्ञासायां कारकाणां क्रियायामेवान्वयात् क्रियाया एवोपस्थितेः सम्भवेन तदर्थे आकाङ्क्षा। तथैव क्रियायाश्च मदन्वयी पदार्थः कः इति आकाङ्क्षा भवति इत्यतः तस्याश्च कारकेन्वयः। एवञ्च अनयोः परस्परमाकाङ्क्षायाः सत्वेन परस्परमन्वयबोधो जायते, अन्यथा अनाकाङ्क्षितानामन्वये सति अनाकाङ्क्षितार्थप्रतिपादकत्वेनान्वयबोधानुपपत्तिः।

**उपसंहारः**

शाब्दबोधस्य नियतकारणनियम्यत्त्वसंसाधकेषु साधनेष्वन्यतममिदं साधनमाकाङ्क्षा नाम। आकाङ्क्षायाः शाब्दबोधे कारणत्त्वं सर्वदार्शनिकप्रसिद्धं विद्यते। क्वचिच्चाकाङ्क्षाया अभावेऽपि शाब्दबोध आकाङ्क्षाभ्रमाज्जायत इत्यतः आकाङ्क्षाज्ञानं शाब्दबोधे कारणं न तु केवलमाकाङ्क्षेति दार्शनिका मन्यन्ते। तस्या आकाङ्क्षाया विविधदर्शनेषु भिन्नभिन्नस्वरूपकत्त्वेऽपि शाब्दबोधे कारणत् न केषाञ्चनापि विवादं पर्यालोचयामः। एवञ्च तादृशशाब्दबोधकारणीभूताकाङ्क्षायाः विविधशास्त्रदृशा विमर्शनमिह प्रबन्धे विहितम्। आकाङ्क्षाज्ञानञ्च शाब्दबोधं नियमयति।आकाङ्क्षाज्ञानस्य शाब्दबोधं प्रति कारणत्वादेव ‘दश दाडिमानि षडपूपा’ इत्यादौ न शाब्दबोधः, न वा घटमानय इत्यस्माज्जायमानशाब्दबोधः घटः, कर्मत्त्वम्, आनयनम्, कृतिः इत्यस्मात् पदसमूहाज्जायते।इयञ्चाकाङ्क्षा पदनिष्ठा इति केचन मन्यन्ते साकाङ्क्षमिदं पदमिति व्यवहारात्।अर्थानामेव परस्परमाकाङ्क्षितत्त्वमिति मते त्वियमर्थनिष्ठा।क्रियाकारकयोः परस्परमाकाङ्क्षितत्त्वादेवान्वयबोध इति सिद्धान्तः।सर्वेषामपिपदार्थानामाकाङ्क्षितानामेव परस्परं सम्बन्ध इति विनाकाङ्क्षं शाब्दबोधः नैव कल्पनायोग्य इति शिवम्॥

**सन्दर्भग्रन्थाः**


- अष्टाध्यायी, पाणिनिः, सम्पादकः- गोपालदत्तपाण्डेयः, प्रकाशकः-चौखम्बासुरभारतीप्रकाशनम्, वर्षम्- २०१८॥
- न्यायसिद्धान्तमुक्तावली, विश्वनाथपञ्चाननः, हरिरामशुक्लः , चौखम्बाप्रकाशनम् वि.सं २०७२॥
- वाक्यपदीयम्,भर्तृहरिः, सुरेन्द्रमिश्रः,संपूर्णानन्दसंस्कृतविश्वविद्यालयः,वि.सं २०३७॥
- व्याकरणमहाभाष्यम्, पतञ्जलिः, भार्गवशास्त्री, चौखम्बासंस्कृतप्रतिष्ठानम्, २०१४॥
- परिभाषेन्दुशेखरः, नागेशभट्टः,गोविन्दनरहरिः वैजापुरकरः,चौखम्बासंस्कृतप्रतिष्ठानम् वि.सं.२०३९॥
- लघुमञ्जूषा, नागेशभट्टः, माधवशस्त्रीभण्डारी, चौखम्बासंस्कृतसीरिजम् वि.सं.२०४६॥
- वैयाकरणसिद्धान्तकौमुदी,श्रीमद्भट्टोजिदीक्षितः, गिरधरशर्मा,मोतीलालबनारसीदासः १९७९॥
- शाब्दबोधमीमांसा, रामानुजताताचार्यः, राष्ट्रियसंस्कृतसंस्थानम्,२००५॥
- व्युत्पत्तिवादः(रामानुजताताचार्यविरचितविद्वन्मनोरमासमवेतः),गदाधरभट्टचार्यः, हरेकृष्णशतपथी, राष्ट्रियसंस्कृत-विद्यापीठम्, तिरुपतिः, २०११॥


*********************

ISSN 2348-7828

# महाभाष्यटीकासूक्तिरत्नाकरस्य समीक्षात्मकमध्ययनम्

डा.प्रियव्रतमिश्रः[1]

**शोधसारः**

वैयाकरणमहाभाष्यस्य अनेकाष्टीकाः कालान्तरे व्यरचिषत। विद्यमानास्वियं टीका सूक्तिरत्नाकराख्या शेषनारायणविरचिता अत्यन्तं प्राशस्त्यं भजते। दौर्भाग्यात् सेयं टीका न क्वापि समुपलभ्यते। पुण्यपत्तनवास्तव्याः प्रथितयशस्काः पण्डितवामनशास्त्रिभागवतवर्याः टीकायाः अस्याः प्रथमद्वितीये आह्निके महता परिश्रमेण समासाद्य समपादयन्। शोधपत्रेऽस्मिन् विस्तरेण टीकायाः कुतः प्राप्तिः? के भागाः कथङ्कारं समुपलब्धा इति चर्च्यन्ते। के विषयाः अत्र चर्चिताः ? कथञ्च अन्यटीकापेक्षया अस्याः वैशिष्ट्यमिति सविस्तरं चर्चिष्यते। टीकाया वैशाल्यं वैशिष्ट्यञ्च प्रतिपाद्यते।

**कुञ्जिशब्दाः – सूक्तिरत्नाकरः, हस्तलेखः, शेषनारायणः, आनन्दाश्रमः, हस्तलिखितसङ्ग्रहः, सूचीकटाहन्यायः।**

**वाङ्मुखम्-**

भगवत्पतञ्जलिविरचितस्य व्याकरणमहाभाष्यस्य प्रायशः चतस्रः प्राचीनाष्टीकाः व्याकरणनिकाये प्रसिद्धाः। तत्र श्रीमद्भर्तृहरिविरचित्ता दीपिका[2] सप्तमशतके रचिता। ततः एकादशशतके कैयटोपाध्यायेन "प्रदीप"[3] नाम्नी टीका व्यलेखि। ततः सप्तदशशतकपूर्वार्धे लिखिता श्रीमतः भट्टोजिदीक्षितस्य "शब्दकौस्तुभ"[4] नामा। सप्तदशशतकस्योत्तरार्धे सर्वतन्त्रस्वतन्त्रेण नागेशभट्टेन "उद्योत"[5] नाम्नी टीका व्यरचि। तत्र टीकासम्प्रदाये शेषनारायणेन विरचिता सूक्तिरत्नाकरटीका आकारेण एताः चतस्रः टीकाः अतितरामतिशेते। टीकेयं महता प्रयत्नेन पण्डितप्रवरेण व्याकरणपारङ्गतेन श्रीवामनशास्त्रिभागवतेन सम्पादिता आद्याह्निकद्वयञ्च राष्ट्रियसंस्कृतसंस्थानस्य वित्तीयसाहाय्येन पुणेस्थ-आनन्दाश्रमसंस्थया च १९९९ तमे संवत्सरे प्रकाशितम्।

टीकायाः अस्याः चतस्रः प्रतयः खण्डशः सम्प्राप्ताः पण्डितवर्येण वामनशास्त्रिभागवतमहोदयेन। तत्रादौ पुणे नगरे सम्पादकमहोदयेन प्रथमाध्यायप्रथमपादस्य षष्ठमाह्निकमारभ्य प्रथमाध्यायान्तं यावत् प्राप्तम्। प्रथमाध्यायप्रथमपादस्य प्रथमानि पञ्चाह्निकानि लेखकेन शेषनारायणेनावश्यं लिखितानि स्युः ततश्च द्वितीयाध्यायाद्याह्निकानां कियान् भागो लिखितः स्यादिति जिज्ञासमानाः सम्पादकमहोदयाः नैकग्रन्थालयहस्तलिखितग्रन्थानां सूचीग्रन्थेभ्योऽज्ञासिषुः यत् "लन्दननगरे इण्डिया आफिसग्रन्थालये, बडोदाराजकीयग्रन्थालये चास्य लघीयस्यौ हस्तलिखिते स्तः इति। ततः बर्लिननगरे एकस्मिन् ग्रन्थालयेऽपि कश्चन भागः समुपलभ्येत इति वार्तां प्रापुः।

(अ)सर्वप्रथमं पुणे नगरे प्रथमाध्यायप्रथमपादस्य षष्ठं सप्तमं च इति द्वे आह्निके सम्पूर्णे अष्टमम् अपूर्णं नवमं च नाधिगतम्।एवं नवाह्निके सार्धाह्निकद्वयमेव समवापि। प्रथमाध्यायस्य द्वितीय-तृतीय-चतुर्थपादानां सर्वाणि नवानि आह्निकानि सम्पूर्णानि सन्ति। प्रथमाध्यायस्य महाभाष्याह्निकानि चतुर्णां पादानां यथाक्रमं ९+३+२+४= आहत्य अष्टादश सन्ति। तेषु सार्धैकदशाह्निकानां सूक्तिरत्नाकरटीकायाः हस्तलेखः अस्मिन् "अ" पुस्तकेऽस्ति। आहत्य पृष्ठानि त्रिशतोत्तरपञ्चपञ्चाशत् (३५५), प्रतिपृष्ठम् अष्टादश पङ्क्यः, प्रतिपङ्क्ति प्रायः पञ्चचत्वारिंशत् अक्षराणि।

(आ) लन्दननगरीयं छायारूपेण (जेरोक्स) सम्प्राप्तम्। तत्र प्रथमाध्यायस्य प्रथमपादनवाह्निक्यां प्रथमं द्वितीयं तृतीयं चतुर्थं अष्टमं नवमं चेति षड् आह्निकानि मध्ये मध्ये खण्डितानि अपूर्णानि सन्ति। सप्तत्युत्तरशतं (१७०) पृष्ठानि सन्ति।

(इ)बर्लिननगरीयं छायारूपं तु प्रथमाध्याय-प्रथमपादस्य षष्ठम् आह्निकमारभ्य प्रथमाध्यायचतुर्थपादान्तं द्वादश आह्निकानि द्वितीयाध्यायस्य प्रथम-द्वितीय-तृतीयपादानां सम्पूर्णानि अष्टौ आह्निकानि, चतुर्थाध्याय-प्रथमपादस्य चत्वारि, षष्ठाध्याय-प्रथमपादस्य सार्धचत्वारि इति सङ्कलय्य सार्धाष्टाविंशतिः (२८ १/२) सार्धदशशतम् (१०५०) पृष्ठानि।

(ई) बडोदा-प्राच्यविद्या-संस्थासङ्ग्रहालये अपूर्णं त्रुटितं केवलं सप्तनवति (९७) पृष्ठात्मकं वर्त्तते इति ज्ञायते। तत्र कोऽध्यायः? कानि आह्निकानि ? इत्यादिविवरणं सम्पादकेन न प्राप्तम्।

एवमधिगतेष्वप्येतेषु त्रिषु हस्तलेखेषु प्रथमाध्याय-प्रथमपाद-प्रथमाह्निकस्योपक्रमे बहूनि पृष्ठानि न क्वाप्यन्यतमे प्राप्तानि। कस्यापि ग्रन्थस्योपक्रम एव यदि लब्धः स्यात् तर्हि महती विप्रतिपत्तिस्तस्य प्रकाशने जायते। यतः उपक्रमे अनुबन्धचतुष्टयादीन् बहून् विषयान् प्रायः

[1] सहाचार्यो व्याकरणविभागः,संस्कृतविद्याधर्मविज्ञानसङ्कायः, काशीहिन्दूविश्वविद्यालयः, वाराणसी।

[2] . व्याकरणशास्त्र का इतिहास. प.युधिष्ठिर मीमांसक- प्रथमभागः

[3] तत्रैव

[4] तत्रैव

[5] तत्रैव

ISSN 2348-7828

उपन्यस्यति ग्रन्थकारः। ततः पुणेस्थ -प्रा.कृ.श्री.अर्जुनवाडकरमहाभागस्य निर्देशानुसारेण आनन्दाश्रमस्थहस्तलिखितसंग्रहात् उपक्रमभागोऽपि अधिगतः।

**सूक्तिरत्नाकरटीकाविशेषाः –**

तत्रादौ षोडशश्लोकात्मकं विस्तृतमामुखं विराजते, यत्र चतुर्षु श्लोकेषु गजाननः, चण्डिका,कामाक्षी जगद्गुरुः कृष्णश्च यथाक्रमं प्रार्थिताः वन्दिताश्च। ततः चतुर्षु श्लोकेषु ग्रन्थकृत् शेषनारायणः स्ववंशपरम्परां वंश्यगुणकृतिविशेषसमन्वितां वर्णयति। ततश्चतुर्षु यस्य प्रेरणया पण्डितः शेषनारायणः टीकामेतामरीरचत् तस्य फरींदराजस्य गुणप्रशंसा यथा-

**[1]श्रीमत्फरींदपरराजराजः श्रीशेषनारायणपण्डितेन।**

**फणीन्द्रभाष्यस्य सुबोधटीकाम् अकारयद् विश्वजनोपकृत्यै ॥**

तदूर्ध्वं चतुर्षु श्लोकेषु गुरुवन्दनं, स्वटीकास्वरूपं, तत्रापूर्वता, विनम्रभाव इत्यादि सर्वं यथोचितं प्रस्तुतम्। इतः पूर्वं व्याकरणनिकाये महाभाष्यस्य चतस्रः प्राचीनाष्टीकाः उपलभ्यन्ते इति पूर्वमेवोदलेखि। प्रस्तुता टीका *“सूक्तिरत्नाकरः”* आकारेण पृष्ठप्रमाणेन एताः सर्वाः चतस्रः टीकाः अतितरामतिशेते। प्रथमाह्निकस्य *“दीपिका”* भाण्डारकर-प्राच्यविद्या-संशोधनमन्दिरद्वारा केवलरूपा मुद्रिता उपलभ्यते। तत्र मुद्रितानि पृष्ठानि अष्टात्रिंशत् (३८) सन्ति। अन्यासु अवशिष्टासु तिसृषु शब्दकौस्तुभनामा यद्यपि टीका इति संज्ञां नार्हति , यतः शब्धकौस्तुभे निबन्धसदृशी व्याख्यासरणिः समाश्रिता वर्त्तते। तथापि तत्र टीकासदृशं व्याख्यानमपि लभ्यते। अपि च महाभाष्यटीका इत्येव समाख्या व्याकरणसम्प्रदाये शब्दकौस्तुभविषये रूढा व्यवह्रियते। सेयं शब्दकौस्तुभटीका बहुभ्यः संवत्सरेभ्यः पूर्वं केवलं मुद्रिता सम्प्राप्तं च पुनर्मुद्रिता। तस्याः प्रथमाह्निकपृष्ठानि त्रिंशत् (३०) सन्ति। अवशिष्टे द्वे महाभाष्यटीके – कैयटोपाध्यस्य प्रदीपः स्वतन्त्ररूपेण मुद्रिता नास्ति। नागेशभट्टलिखिता उद्योतनामा न केवलस्य महाभाष्यस्य वर्त्तते,यतः तत्र टीकायां बहुत्र कैयटटीकापि व्याख्याता। अपि च उद्योतस्यापि केवलस्य मुद्रितं पुस्तकं नैव वर्त्तते। अतः तयोः प्रदीपोद्योतयोः पृष्ठपरिमाणं ज्ञातुं न कोऽप्युपायः।तथापि पण्डितवरैः गुरुप्रसादशास्त्रिमहोदयैः प्रदीपकौस्तुभोद्योत इति प्राचीनं टीकात्रयं, स्वयं लिखिता च “राजलक्ष्मी” नाम्नी टीका एताभिश्चतुसृभिः टीकाभिः संवेष्टिता महाभाष्यनवाह्निकी प्रकाशितास्ति। तत्र चतुष्टीकायुतस्य महाभाष्यस्य प्रथमाह्निकस्य अष्टसप्ततिः (७८) पृष्ठानि सन्ति। सूक्तिरत्नाकरस्य केवलस्य प्रथमाह्निकं प्रायः पञ्चनवतिः (९५) पृष्ठानि स्युः। टीकाया अस्या महति विस्तरे द्वे कारणे स्तः। तत्रैकम्- अयं मीमांसान्यायादिशास्त्रान्तरीयं सन्दर्भं बहुत्र सोपप्लवं सप्रमाणं च विमृशति। भाष्यीयशब्दार्थविषयेऽपि प्रायशः बहून् सर्वान् वा विकल्पानुपन्यस्य तत्र कोऽर्थः कुतश्च इत्यादि सोदाहरणं वितनोति। यथा उपक्रमे भाष्ये “[2] अथेत्ययं शब्दः....” इति महाभाष्यविवरणावसरे इति शब्दस्य यावन्तोऽर्थाः सम्भविनः तान् सर्वान् सप्रयोगमुपन्यस्याविवक्षितानर्थान् व्युदस्य विवक्षितमर्थं निश्चिनोति।

द्वितीयं तावदयं तत्र तत्रोदाहृतेषु रूपेषु आमूलचूलं सर्वां व्याकरणशास्त्रीयप्रक्रियां ससूत्रादिप्रमाणनिर्देशं बालबोधाय वाचकस्य पुरः उपन्यस्यति। अन्ये भाष्यटीकाकारास्तावदत्र विषये प्राय उदासते। ते कदाचिदेवं मन्वीरन् महाभाष्याभ्यासका अन्ये प्रौढाः अन्ये च रूपसिद्धिमात्रमभिलषन्तः बालाः। तैस्तावद् बालैः काशिका-सिद्धान्तकौमुद्यादिग्रन्थानधीत्यानन्तरं महाभाष्ये प्रयतनीयम्। अतः शब्दप्रक्रियाविमर्शः नाम बालानां सुखबोधाय न प्रौढानामिति। एतयोः द्वयोः विस्तरकारणयोः प्रथममेव बहुत्रोपलभ्यते।

यथाकारतः तथा गुणतः सिद्धान्तविमर्शतोऽपि सूक्तिरत्नाकरोऽयं न केवलं महाभाष्यटीकाः किन्तु सर्वानेव पाणिनीयान् विदुषोऽतिशेते। तदत्र कानिचन निदर्शनानि उपस्थाप्यन्ते।

महाभाष्ये शब्दस्वरूपचिन्तायां प्रथमाह्निके उपक्रमे एव [3]“ सामान्यभूतं, स शब्दः (म.१-१-९) इति प्रयोगः। तदत्र “सामान्यं स शब्दः” इत्येतावतैव विवक्षितार्थलाभे “भूत”शब्दप्रयोगोऽतिरिक्तः समेषामेव टीकाकृतां महतीं शिरःपीडां जनयति। प्राचीनः टीकाकारः भर्तृहरिः “ भूतशब्द उपमावाची” इति समर्थयते, प्रदीपे कैयटोऽपि तमेवानुसरति। परं तत्र सूक्तिरत्नाकरः समर्थतरं समर्थयते यत् “ भूतशब्दः परमार्थवाची सामान्यस्यापोहरूपतां प्रतिक्षेप्तुमुपात्तः। *तस्याघटादिव्यावृत्त्यात्मनो घटोऽयं घटोऽयमित्याद्यनुगताकारप्रत्ययविधिमुखप्रवृत्त-शब्दविषयत्वायोगादप्रामाणिकत्वात् इत्यादि ज्ञेयम्।* एवमयं प्राक्तनाभ्यां टीकाकाराभ्यामनुसृतं समर्थनं दूरीकृत्यान्यत् सन्तोषाधायकं समर्थनमुपन्यस्यति।

---

[1] .सूक्तिरत्नाकरस्य प्रथमाध्यायान्तपुष्पिकायाम्

[2] महाभाष्ये पस्पशाह्निके

[3] महाभाष्ये पस्पशाह्निके

यद्यपीदं समर्थनं मूललेखकस्य महाभाष्यकारस्याभिप्रायविषयः स्यादेवेति वचनं साहसमात्रमेव स्यात् यतः सामान्यस्यापोहरूपता या विशिष्य बौद्धैः समर्थिता, नैयायिकैश्च प्रतिक्षिप्ता, सर्वोऽयं विमर्शः महाभाष्यकारकालादनन्तरं स्यात्। अतः महाभाष्यकारस्य स ज्ञातचरः स्यादिति वक्तुमशक्यम्। तेनात्रत्यं भूतशब्दार्थसमर्थनमैतिहासिकदृष्ट्या कदाचिद् विसंगतमेव स्यात्। तथापि सूक्तिरत्नाकरे उपन्यस्तोऽयं विस्तरः प्राचीनार्वाचीनटीकाभ्यो विशिष्यते इति सत्यम्। प्राचीनाष्टीकाकाराः इतिहासविषये विशिष्य कालपौर्वापर्यादिविषये नितरामुदासते। तेषां तामुदासीनतामनास्थां वाभ्युपेत्य इदं सर्वथा स्थाने एव इत्यपि वक्तुं सुशकम्। अथवा 'कविः करोति काव्यानि रसं जानाति पण्डितः' इति न्यायेन मूललेखकस्य सर्वथा अज्ञातमनभिप्रेतमविवक्षितमपि व्यक्तीकर्तुमर्हन्ति प्रभवन्ति वा समर्थतराष्टीकाकारा इत्यपि टीकाकारचापलमिदं कश्चिद् वैतण्डिकः समर्थयेत।

तत्रभवान् नागेशभट्टः उद्द्योतटीकायाम् 'भूत' शब्दप्रयोगं समर्थयितुं प्रवृत्तः श्रीमतः तत्रभवतः भर्तृहरेर्मतमनुसृत्य कैयटेन प्रदीपटीकायां कृतं विवरणं दूषयित्वा स्वमतं 'भूत' शब्दविषये एवमुपन्यस्यति – 'नेदं युक्तम्। किं तु स्वरूपवाची सः'। इदं च बहुनांशेन सूक्तिरत्नाकरमेवानुसरतीति भाति।

द्वितीयमत्रोदाहरणम् - व्याकरणाध्ययनस्य सप्रयोजनतां विवृण्वन् महाभाष्यकारः [1]'सक्तुमिव तितउना...' इत्यादि-ऋङ्मन्त्रमुदाहरति। तत्र तृतीये चरणे '*अत्रासखायः सख्यानि जानते*' इत्यत्र पदपाठकारः, ऋग्वेदभाष्यकारः सायणः, अन्येऽपि च सर्वे महाभाष्यटीकाकाराः *'अत्र सखायः'* इति पदविभागम् 'अत्रा' इत्यत्र 'ऋचि तुनुघ... '(६.३.१३३) इत्यनेन दीर्घं समर्थयन्ते। अत्र व्याकरणे साधुशब्दान् जानानाः तानेव प्रयुञ्जानाः सखायः मित्रभावं प्रतिजानते इत्यर्थापयन्ति च।

सूक्तिरत्नाकरः पारम्परिकममुं तृतीयचरणार्थं दीर्घादिप्रक्रियां च प्रथममुपन्यस्यति, अनन्तरं 'अपरे तु' इत्युपक्रम्य स्वमतं सिद्धान्तरूपेणोपसंहरति 'अत्रासखायः सखिरहिताः वैयाकरणाः सख्यानि जानते अनुभवन्ति' इति। यदि पूर्वमेव सख्यमापन्नाः व्याकरणेन साधुशब्दप्रयोगद्वारा सख्यं प्रतिजानीरन् तर्हि कः महिमा व्याकरणस्य तत्र, परं यदि पूर्व सख्यहीनाः सख्यमनुभवेयुः तहि तद् व्याकरणाभ्यासस्यैव फलमिति वक्तुं शक्यमित्यमभिप्रायं मनसिकृत्य इदमर्थान्तरं तदनुसारम् 'असखायः' अतस्तदन्यथाकरणे न कापि विप्रतिपत्तिः। महाभाष्यकारोऽपि 'न लक्षणेन पदकाराः इति पदच्छेदं च स उपन्यस्यति। प्राचीनपरम्परामाश्रित्य पदपाठः नापौरुषेयः, अनुवर्त्याः, पदकारैर्नाम लक्षणमनुवर्त्यम्' इत्येवं पदपाठस्य पौरुषेयत्वमतः परिवृत्तिसहत्वमपि प्रतिपादयति।

यद्यपि असखायः इति पदविभागे अर्थौचित्यमर्थसंगतिः सामर्थ्यं वा 'सखाय' इतिपदविभागापेक्षया अधिकं प्रतिभाति, तथापि स्वरविषयिणी व्यवस्था वैदिकपरंपरायां बहूनि संवत्सरसहस्राणि आकुमारि आकाश्मीरं चानादित्वेन संरक्षिता परिपालिता च उच्छिद्येत। नञ्समासे 'अव्यये नञ् कुनिपातानाम्' (वा ६.२.२) इत्यनेन प्रकृतिस्वरः उदात्तः स्यात्। वैदिकपरम्परायां रूढेन स विरुध्येत। यद्यपि नञ्समासे 'राजाहःसखिभ्यष्टच्' [2]इत्यनेन प्राप्तः टच् [3]'नञस्तत्पुरुषात्' इत्यनेन निषिध्यते। अतः समासे टच्-प्रत्ययापत्तिर्नास्ति। तथापि स्वरविरोधः अनिवार्य एव। स्वरोऽपि पदपाठवत् पौरुषेयः केवलं 'अग्निमीळे...' इत्यादिवर्णपदानुक्रम एवापौरुषेयः इति वचनं तावत् वैदिकपरंपरायां कुठाराघात एव स्यात्। अतः 'असखायः' इति पदविभागः न परंपरामनुसरति, अतः अशास्त्रीयः, अस्वीकार्य एव इति सूक्तिरत्नाकरविवरणमत्रत्यं प्रतिक्षेप्तुं शक्यम्। तथापि अनेन सूक्तिरत्नाकरकारेण नवीनः पन्थाः अन्याः सायनाचार्यादिटीकाः अत्यन्तं चिराय रूढाः उपेक्ष्य विरुध्य वोपन्यस्तः अस्य टीकाकारस्य विशेषमन्याभ्यः टीकाभ्यः नियतं साध्नुयात्।

अस्य टीकाकर्तुः टीकान्तरातिशये तृतीयमुदाहरणम् - प्रथमाह्निके वार्त्तिककृत् प्रयुक्तस्य [4]'धर्मनियमः' इति समासस्य महाभाष्ये 'धर्माय नियमः' इति विग्रहः कृतः। तत्र च नायं शास्त्रप्रमाणितः समासविग्रहः, किंतु समासस्य अर्थविवरणवाक्यमिदम्। समासस्य शास्त्रानुसारी विग्रहस्तु 'धर्मस्य नियमः' इत्येव साधुः। अस्मिन् विषये प्रायः सर्वेऽपि टीकाकाराः, पाणिनीया विद्वत्परंपरा चापि सर्वथा ऐकमत्यं भजन्ते। केवलं काशिकाटीका- 'पदमञ्जरी'कारः हरदत्तः, सूक्तिरत्नाकरकारः शेषनारायणश्चायं मतमिदं निरस्य अर्थप्रतीतिं सर्वलोकव्यवहारं च प्रमाणीकृत्य अयं [5]'चतुर्थी तदर्थार्थ...' इति प्रमाणितः तादर्थे चतुर्थीतत्पुरुष एव, षष्ठीतत्पुरुषः विवक्षितार्थविसंवादीति प्रतिपादयतः। तत्र सूत्रे

---

[1] महाभाष्ये पस्पशाह्निके

[2] अ.५.४.९१

[3] अ.५.४.७१

[4] महाभाष्ये पस्पशाह्निके

[5] अ.२.१.३६

'तादर्थ्य प्रकृतिविकृतिभाव एव' इति टीकाकृन्मतं न प्रामाणिकमिति तौ साध्रुतः। सूक्तिरत्नाकरे शेषनारायणः उपक्रम एव व्याकरणप्रयोजनं विमृशति -

तत्र सूत्रकारः भगवान् पाणिनिः व्याकरणशास्त्रप्रयोजनविषये सर्वथा मूकीभावमवलम्बते। वार्तिककारः कात्यायनः 'शास्त्रेण धर्मनियमः', 'शास्त्रपूर्वके प्रयोगे धर्मः' इत्यादिभिः प्रयोजनं सूचयति। महाभाष्यकारः पतञ्जलिस्तु प्रयोजनपृच्छां विधाय मुख्यानि आनुषङ्गीणि च बहूनि प्रयोजनानि सोदाहरणं व्याख्याति। प्रमाणभूतानां त्रयाणां मुनीनां प्रयोजनविमर्शे त्रैविध्यमयं सूक्तिरत्नाकरकारः शेषनारायणः 'तत्र उत्तममध्यममन्दाधिकारिणोऽध्यायकास्त्रिविधाः, तदनुसृत्येदं त्रैविध्यम्' इति यत् समर्थयते तन्न केवलं व्याकरणाध्यायकेष्वेव, किंतु दिक्कालाद्यनवच्छिन्नेषु सर्वेष्वेव अध्यायकेषु कर्तव्यपरेषु वा नित्यसमवेतं सर्वत्र संवदतीति प्रेक्षावतामपरोक्षं प्रतीयते।

महावैयाकरणः, पाणिनिपरंपरायां शेखरायमाणः नागेशभट्टः महाभाष्य- टीकायाम् उद्द्योते प्रयोजनविवरणे इदं त्रैविध्यं सूक्तिरत्नाकरीयं न केवलं सिद्धान्तरूपेणोपन्यस्यति, किंतु बहून् वाक्यांशानपि पदशोऽक्षरशोऽनुवदति। उभयत्र टीकयोः अत्र बहुतरकं साम्यमालोच्य कोऽपि तर्करसिक एवमनुमिनुयात् यदेकस्यामधीती एवापरः स्यादिति। अर्थात् श्रीमान् नागेशभट्टः अवश्यं सूक्तिरत्नाकरं ज्ञातवान्, यतः सूक्तिरत्नाकरस्य कालः नागेशकालात् पूर्वं सार्धशतं संवत्सरान् स्यादिति आपाततः भाति।

एवं विस्तरः, विशेषमतसमर्थनं, परंपरया स्वीकृतस्य परं व्यवहारादिविरुद्धस्य मतस्य सप्रमाणं निर्देशः, खण्डनं, न्याय्यस्य मतान्तरस्य प्रतिपादनम् इत्यादिभिः विशेष- गुणैरियं टीका यदि प्रकाशिता विदुषां पुरतः स्थापयिष्यते, तर्हि नूतनाभ्यासकानां संशोधन-पराणां विशेषाभ्यासकानां चेत्युभयेषामपि लाभाय संतोषाय च भवेदिति द्रढीय आशासे।

**टीकाकारस्य देशकालौ**

अथाधुना टीकाकारस्य देशकालौ विचार्येते। टीकाया उपक्रम श्लोकेषु ग्रन्थकारो लिखति यत् शेषवंशीयः नारायणः श्रीनृसिंहपौत्रः श्रीकृष्णपुत्रः वीरेश्वरस्यानुजः चौधरीवंशीयस्य फिरिंदाख्यस्य राज्ञः प्रेरणया टीकामिमां व्यरी रचत् इति।

शेषवंशीया विद्वांसः विशिष्य पाणिनीयव्याकरणपरंपरायां खिस्ताब्द- गणनायाः पञ्चदश-षोडश-शतकयोः बहव आसन्। तेषु प्रसिद्धतमः रामचन्द्राचार्यः [1]'प्रक्रियाकौमुदी' इति पाणिनिसूत्रटीकां वैयाकरणनिकाये प्रसिद्धां व्यरचयत्। तस्य रामचन्द्राचार्यस्य पौत्रः विठ्ठलेशः प्रक्रियाकौमुदीग्रन्थे प्रसादनामां टीकां लिखितवान्। सेयं प्रक्रियाकौमुदी प्रसादटीकासमन्विता बॉम्बे संस्कृत अँड प्राकृत सीरिजमध्ये एकोनविंशतिशताधिक पञ्चविंशतितमे (१९२५) ऐशवीये संवत्सरे डॉ. व्ही. जी. परांजपे, सेक्रेटरी ओरिएण्टल रिसर्च इन्स्टिटयूट द्वारा प्रकाशिता वर्तते।

तत्राङ्ग्लभाषायां लिखितप्रस्तावनायां प्रस्तावनालेखकः श्रीमान् आर्. पी. त्रिवेदी लिखति यत् अस्यैव रामचन्द्राचार्यस्य प्रक्रियाकौमुदीलेखकस्य भ्राता नृसिंहाचार्यः नामासीत्। तस्य नृसिंहाचार्यस्य श्रीकृष्णनामा पुत्रः आसीत्। तेन प्रक्रियाकौमुद्यां प्रकाशनाम्नी टीका लिखिता इति वैयाकरणपरं परायां प्रथितम्। इयं च प्रकाशटीका यद्यपि प्रसादटीकावत् न प्रसिद्धा नापि प्रकाशितपूर्वा तथापि तदात्वे विदुषामभ्यासविषय आसीत्, यतः अस्याः उल्लेखः भट्टोजीदीक्षितादीनां ग्रन्थेषु बहुत्रोपलभ्यते। अयं च प्रकाशटीकालेखकः श्रीकृष्णः कंसवधः, श्रीकृष्णकौतूहलम्, पदचन्द्रिका इत्यादीन् षडपरान् ग्रन्थानरचयत्, इत्यपि परंपरायां प्रथितम्।

इदमेकीयं मतं प्रथमत उपन्यस्य अनन्तरं श्रीमान् त्रिवेदी -महोदयः सिद्धान्तरूपं मतान्तरमेव समर्थयते, यत् यद्यपि प्रक्रियाकौमुदीग्रन्थस्य रचयितुः रामचन्द्राचार्यस्य भ्राता नृसिंहाचार्यः तत्पुत्रश्च श्रीकृष्णनामासीदिति शेषवंशीय- नामावली प्रमाणयति, तथापि प्रकाशटीकालेखकः श्रीकृष्णः न शेषरामचन्द्राचार्य- वंशीयः, यतः रामचन्द्राचार्यः आन्ध्रदेशीयः ऐशवीयचतुर्दशशतकोत्तरार्धे पञ्चदशशतकस्य पूर्वार्धे लब्धावस्थितिः आसीत्। प्रकाशटीकालेखकः श्रीकृष्णः षोडशशतकपूर्वार्धे संजातः महाराष्ट्राभिजनश्चासीत्। अतो देशतः कालतो विसंवादान्नायं श्रीकृष्णः रामचन्द्राचार्यस्य प्रक्रियाकौमुदीलेखकस्य भ्रातृव्यपुत्रः इति वक्तुं शक्यम्। अपि चायं श्रीकृष्णः प्रकाशटीकायां विठ्ठलेशलिखितायाः प्रसादटीकाया उल्लेखं ''प्राञ्चः केचित्' इति कालतः संबन्धतश्च दूरतामुदासीनभावमाश्रित्य करोति। यदि चायं श्रीकृष्णः पूर्वमुपन्यस्तमेकीयमतमनुसृत्य रामचन्द्राचार्यवंशीयस्तस्य भ्रातृव्यपुत्रः स्यात् तर्हि तथा कालतो दूरतां न निर्दिशेत् नापि स्ववंशसंबन्धमाप्ततां वा निवीत।

[1] . व्याकरणशास्त्र का इतिहास प. युधिष्ठिरमीमांसकः

ततश्चेदं प्रमाणपूतमभ्युपेतव्यं यत् प्रकाशटीकालेखकस्तथैव कृष्णकौतूहलाद्यपरग्रन्थरचयिता श्रीनृसिंहतनुजः श्रीकृष्णः सूक्तिरत्नाकरटीका- लेखकस्य नारायणपण्डितस्यैव पिता। सूक्तिरत्नाकरस्योपक्रमश्लोके श्रीकृष्णकौतूहलग्रन्थं तथैव पदचन्द्रिकां स्वपितृकृतिमिति नारायणपण्डितः स्वयमुल्लिखत्येव।

लन्दन-नगरीयहस्तलिखितान्ते संवत् १६७५ इति कालनिर्देश उपलभ्यते। स किं मूलटीकालेखनस्य उताहो प्रतिलिपिलेखनस्य इति द्वैतं संभवति। अपि च अयं समयनिर्देशः सर्वथा प्रमाणरूप इत्यङ्गीकर्तुमर्हः न वा इति अपि संदेहावसरः अस्य सूक्तिरत्नाकरस्य प्रमाणकालनिर्णयाधिगमे। यथायं टीकाकारः बहुत्र कैयटं नाम्ना निर्दिशति, क्वचन तत्प्रतिपादितं सिद्धान्तं समर्थनार्थं प्रतिक्षेपार्थं वोल्लिखति, न तथा क्वापि पाणिनीयव्याकरणे नितरां प्रसिद्धं महावैयाकरणं भट्टोजीदीक्षितं, पातञ्जले महाभाष्ये कृतभूरिपरिश्रमं नागेशभट्टं वोल्लिखति, तेनेदमनुमातुं शक्यं यदयं कैयटोपाध्यायादनन्तरं तथैव भट्टोजीदीक्षितसमयात् पूर्वम्, अर्थात् ख्रिस्ताब्दगणनायां द्वादशशतकादूर्ध्वं सप्तदशशतकात् पूर्वं लब्धजनुष्कः स्यात् इत्येवाभ्युपेतव्यमापतति। कैयटोपाध्यायेन लिखिता महाभाष्ये प्रदीपनामा टीका वैयाकरणानां परंपरायामतीव प्रसिद्धा वर्तते। तस्याः कैयटप्रदीपटीकाया बह्व्यः विवरणादयः टीकाः सन्ति। तासां प्रदीपटीकानां प्रकाशनमपि अद्यत्वे 'महाभाष्य-प्रदीप- व्याख्यानानि' इति संकेतेन पाण्डेचरीस्थया कयाचन फ्रेञ्चसंस्थया उपक्रान्तं वर्तते। सूक्तिरत्नाकरः क्वचन विवरणटीकामुल्लिखति। यथा द्वितीयाह्निके उपक्रमे 'अइउण्' इत्यादिषु स्वरसन्ध्यभावे विवरणमतमुपन्यस्य खण्डयति - 'यत् पुनः संहिताया अविवक्षणादिति विवरणाभिधानम् तत् प्रकृतासंगतम् (सूक्तिरत्नाकर आह्निक २, पृ. ९७, पङ्क्ति १४)। इदं च विवरणमतमद्यत्वे मुद्रिते 'महाभाष्यप्रदीपव्याख्यानानि ' इत्यस्मिन् ग्रन्थे प्रथमे भागे पृ. ११३ पं. १२ इत्यत्र उपलभ्यते। महाभाष्यप्रदीपविवरणटीकायाः समयः तत्रैव संस्कृतोपोद्घाते पृ. XVI विमृश्य निर्णीतोऽस्ति संवत् १५२५-तः १५७५। अर्थात् ऐशवीयपञ्चदशशतकोत्तरार्धम्, अथवा षोडशशतकस्य पूर्वार्धम्। तस्माद् विवरणकालादनन्तरमयं सूक्तिरत्नाकरलेखकः संजातः स्यात् इति शेषनारायणविदुषः समयः षोडशशतकस्य पूर्वार्ध एव तदुत्तरं वा स्यात्। अतो नायं दृढतरप्रमाणेन, द्विर्बद्धं सुबद्धं भवतीति न्यायेन, अस्य सूक्तिरत्नाकरलेखकस्य सूक्तिरत्नाकरटीकालेखकः शेषनारायणः प्रक्रियाकौमुदीलेखकस्य रामचन्द्राचार्यस्य भ्रातृव्यपुत्रः नापि आन्ध्रदेशीयेन शेषवंशेनास्य कोऽपि संबन्धः। यत् स्ववंश्यवर्णनं कृतमुपलभ्यते तदनुसारं तद्वंशीया त्रिपुरुषानूका नामावली यथा –




**सन्दर्भग्रन्थसूची**

1. व्याकरणशास्त्र का इतिहास – प.युधिष्ठिरमीमांसक , रामलाल कपूर ट्रस्ट,सोनीपत. १९८४
2. सूक्तिरत्नाकरः – स. वामनशास्त्री भागवत, आनन्दाश्रम संस्था, पुणे, १९९९
3. वैयाकरणमहाभाष्यम् – स. भार्गवशास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००२
4. काशिका – वामनजयादित्यौ, संस्कृतपरिषद्,ओस्मानिआ विश्वविद्यालय,२००८

**********************

ISSN 2348-7828

# गुणदीर्घोत्त्वानामपवादः

डॉ. गणेश्वर नाथ झा[1]

**शोधसारः**

गुणदीर्घोत्त्वानामपवाद अस्यां पङ्क्तौ समागतोऽपवादशब्दः अपवादपर एव। यत्तु कैश्चित् अपवादशब्दस्य बाधकत्वोपलक्षकत्वमङ्गीकृत्य गुणस्य परत्वाद्बाधकत्वमिष्यते स्म तदस्मिन् लेखे सयुक्तिकं सप्रमाणञ्च खण्डयित्वा श्रीभट्टोजिदीक्षितैरभिप्रेतस्य अपवादपदार्थस्य निरूपणं कृतं वर्तते। अत्र लेखे अन्यतमत्वावच्छिन्नव्यापकतावद्विषयताकशास्त्राणाम् **ऋतो ङिसर्वनामस्थानयोः, प्रथमयोः पूर्वसवर्णः, ऋत उत्** इति त्रयाणां शास्त्राणाम् **अचि र ऋत** इति सूत्रेण विधीयमानरेफादेशेन अपवादत्वादेव बाधकत्वं प्रतिपादितं वर्तते।

**कुञ्जिशब्दाः** - विषयता, व्यापकता, व्याप्यता, अवच्छेदकता, अपवादः, उत्सर्गः, कार्ययोगी, घटकत्वम्, उद्देश्यता,विधेयता.

**विषयप्रस्तावना**

एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवतीति श्रुत्यनुरोधेन प्रक्रियाज्ञानपूर्वकसाधुशब्दानां प्रयोगे एव पुण्यप्राप्तिपूर्वकस्वर्गप्राप्तेः प्रतिपादनात् पुण्यजनकतावच्छेदकरूपसाधुत्वज्ञानाय भगवता पाणिनिना अष्टाध्यायी विरचिता। तत्र शब्दानां प्रतिपत्तौ प्रतिपदपाठस्वीकारे महद्गौरवं भवेद् अतो भगवता भाष्यकृता – "अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं हि श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम"। अतः केनचिल्लघुनोपायेन शब्दाः प्रतिपत्तव्याः। स चोपायः कः? इत्याकाङ्क्षायां भाष्यकारैरेवोक्तं "किञ्चित्सामान्यविशेषवल्लक्षणं प्रवर्तव्यम्। येन अल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किम्पुनस्तत् उत्सर्गापवादौ"। अयम्भावः – शब्दसाधुत्वज्ञानाय कश्चिदुत्सर्गः कर्तव्यः कश्चिद्विशेषः। उत्सर्गापवादयोर्मध्ये सामान्येनोत्सर्गशास्त्राणां प्रवृत्तिः विशेषेण चापवादशास्त्राणां प्रवृत्तिः स्वीकर्तव्या। अतो भगवता पाणिनिना उत्सर्गापवादतयैव शास्त्राणि प्रणीतानि वर्तन्ते। अनेनैव पथा शब्दानां साधुत्वज्ञानं चिकीर्षितं वर्तते। तथाहि स्त्रियां वर्तमानस्य त्रिशब्दस्य प्रातिपदिकार्थगतबहुत्वविवक्षायां त्रि जस् इति स्थिते त्रिचतुरोः स्त्रियां तिसृचतसृ इति शास्त्रेण त्रिशब्दस्य स्थाने तिस्रादेशे कृते तिसृ जस् इति स्थिते इको यणचीति सूत्रेण यणादेशे प्राप्ते तं प्रबाध्य ऋतो ङिसर्वनामस्थानयोरिति सूत्रेण गुणे प्राप्ते अचि र ऋत इति शास्त्रेण रेफादेशो भवति अपवादत्वात्। एवमेव स्त्रियां विद्यमानात् त्रिशब्दात् कर्मगतबहुत्वविवक्षायां शस्प्रत्यये कृते त्रि शसिति जाते तिस्रादेशे कृते तिसृ शस् इति जाते अनुबन्धलोपे तिसृ अस् इत्यत्र इको यणचीतिसूत्रेण यणादेशः प्राप्तः तं प्रबाध्य प्रथमयोः पूर्वसवर्ण इति शास्त्रेण पूर्वसवर्णदीर्घे प्राप्ते अचि र ऋत इति सूत्रेण रेफादेशो भवति अपवादत्वात्। एवमेव प्रियतिसृशब्दात् अपादानगतैकत्वविवक्षायां ङसि प्रत्यये कृते अनुबन्धलोपे प्रियतिसृ अस् इति स्थिते यणादेशे प्राप्ते तं प्रबाध्य ऋत उदितिसूत्रेण उत्त्वे प्राप्ते अचि र ऋत इतिसूत्रेण रेफादेशो भवति अपवादत्वात्। एषु त्रिषूदाहरणेषु अस्माभिर्दृष्टं यत् ऋतो ङिसर्वनामस्थानयोः प्रथमयोः पूर्वसवर्ण ऋत उत् इति त्रीण्यपि शास्त्राण्युत्सर्गभूतानि भगवता पाणिनिना प्रणीतानि। अपवादभूतञ्च अचि र ऋत इतिशास्त्रं प्रणीतम्। अतः शब्दसाधुत्वज्ञानाय उत्सर्गापवादतया लक्षणानां प्रवृत्तिस्वीकारे अचि र ऋत इतिसूत्रेण विधीयमानो रेफादेशो गुणदीर्घोत्त्वानामपवादो भवति। अत्र लेखे सूत्रघटकपदानां सार्थक्यविचारः, गुणदीर्घोत्त्वानामपवाद इति वाक्यघटकापवाद-पदार्थविचारश्च करिष्यते। तत्रादौ अचि र ऋत इति सूत्रस्य सिद्धान्तभूतमर्थं विचार्य सूत्रघटकपदानां सार्थक्यविचारः प्रस्तूयते। तथाहि -

त्रिपदात्मकं रेफादेशविधायकं सूत्रमिदम्। अत्र सूत्रे अचीति सप्तम्यन्तं पदं र इति प्रथमान्तं पदम् ऋत इति षष्ठ्यन्तं पदम्। इह सूत्रे अष्टन आ विभक्तात्यस्मात्सूत्रात्'विभक्तौ' इति सप्तम्यन्तं पदमनुवर्तते। "त्रिचतुरोस्स्त्रियां तिसृचतसृ" इत्यस्मात्सूत्रात् 'तिसृचतसृ' इति पदमनुवर्तते। अङ्गस्येत्यधिक्रियते च। सूत्रस्थाचीत्यस्य अनुवृत्तविभक्तावित्यस्य विशेषणत्वात् अभेदसम्बन्धावच्छिन्नप्रकारताप्रयोजकं यदल्बोधकं सप्तम्यन्तं पदं तत् तदादेरुपस्थापकमित्यर्थिकया यस्मिन्विधिस्तदादावल्ग्रहण इति परिभाषया तदादिविधौ अचीत्यस्य अजादौ इत्यर्थो जायते। तस्य चाभेदसम्बन्धेन विभक्तौ इत्यत्रान्वयः। अर्थवशाद्विभक्तेर्विपरिणाम इति नियमात् पूर्वसूत्रादनुवृत्तं तिसृचतसृ इति पदं षष्ठ्यन्ततया विपरिणम्यते। अस्याः षष्ठ्याः अवयवावयविभावसम्बन्धबोधकत्वम्। अनेनैव सम्बन्धेन तिसृचतसृपदार्थस्य ऋत्पदार्थेऽन्वयः। ऋत इत्यत्र या षष्ठी सा निवर्त्यनिवर्तकभावरूपसम्बन्धार्थिका। विभक्तौ इत्यत्र औपश्लेषिकाधिकरणबोधकसप्तम्याः सत्त्वात् औपश्लेषिकाधिकरणबोधक-सप्तम्यन्तपदघटिते शास्त्रे निर्दिष्टे पूर्वस्येति पदद्वयमुपतिष्ठते इत्यर्थिकायाः तस्मिन्निति निर्दिष्टे पूर्वस्येतिपरिभाषाया उपस्थित्या सूत्रार्थो जायते यत् – अजादिविभक्त्यव्यवहितपूर्वत्वविशिष्टस्य अङ्गावयवतिसृचतसृशब्दावयवस्य ऋतस्स्थाने रेफादेशस्स्यात्। अमुमेवार्थं मनसि निधाय श्रीभट्टोजिदीक्षितैः सिद्धान्तकौमुद्यामस्य सूत्रस्यार्थोऽभिधायि – "एतयोः ऋकारस्य रेफादेशस्स्यादचि"।

[1] केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरघुनाथकीर्तिपरिसरः,देवप्रयागः,उत्तराखण्डः।

**सूत्रघटकपदसार्थक्यविचारः**

अत्र सूत्रे यदि अचीति पदं न दीयते तथा सति सूत्रार्थस्स्यात् – "विभक्त्यव्यवहितपूर्वत्वविशिष्टस्याग्गावयवतिसृचतसृशब्दावयवस्य ऋअतस्स्थाने रेफादेशस्स्यात्"। तथा च तिस्रः पश्येत्यादौ रेफादेशस्य प्रवृत्त्येष्टसिद्धावपि तिसृभिरित्यादौ अनिष्तस्थलेऽपि हलादिविभक्तिपरकत्वेन रेफादेशः प्रवर्तेत। ततथा च तिसृभिः तिसृभ्यः इत्यादीनामिष्टरूपाणां सिद्धिर्न स्यात्। सूत्रेऽचीतिपदोपादाने तु यस्मिन्विधिस्तदादावल्ग्रहणे इतिपरिभाषया तदादिविधेः प्रवृत्त्या अजादिविभक्त्यव्यवहितपूर्वत्वविशिष्टस्य अङ्गावयवतिसृचतसृशब्दावयवस्य ऋतस्स्थान एव रेफादेशस्स्यात्। तथा च तिसृ भिस् इत्यवस्थायाम् अजादिविभक्तिपरकत्वाभावेन रेफादेशस्य प्रातिरेव नास्तीत्यतो न दोषः। ननु सूत्रे अचीतिपदं व्यर्थमेव यतोहि तिसृभिः इत्यादौ हलादिविभक्तौ परतः यदि रेफादेशस्स्यात्तदा न तिसृचतसृ इति दीर्घविधायकशास्त्रस्य वैयर्थ्यं प्रसज्येत। अतः न तिसृचतसृ इति शास्त्रारम्भसामर्थ्यात् हलादिविभक्तौ परतः रेफादेशस्य प्रवृत्तिर्न भविष्यति। तथा च अचीति पदं सूत्रे व्यर्थमेवेति चेदत्रोच्यते – हलादिविभक्तौ परतो रेफादेशस्य प्रवृत्तावपि न तिसृचतसृ इति सूत्रस्य वैयर्थ्यं न वर्तते। तथाहि –'तिसृ नाम्' इति स्थिते प्रकृतसूत्रेण रेफादेशः प्राप्तः नामीतिसूत्रेण दीर्घश्च प्राप्तः। तत्रोभयोः शास्त्रयोरन्यत्रान्यत्रलब्धावकाशयोः युगपदेकस्मिन् तिसृ नाम् इति लक्ष्ये प्राप्तत्वेन विप्रतिषेधस्य सत्त्वात् विप्रतिषेधे परं कार्यमिति शास्त्रेण यद्यपि परत्वात् रेफादेशः प्राप्तस्तथापि सन्निपातलक्षणविधिरनित्यं तद्विघातस्येति परिभाषया सन्निपातविरोधात् नामि परतः तिसृशब्दावयवस्य ऋकारस्य स्थाने रेफादेशो न भविष्यति। यतोहि यं ह्रस्वान्ताङ्गं निमित्तीकृत्य ह्रस्वनद्यापो नुडिति सूत्रेण नुडागमो जातः स एव नुडागमः हलादित्वसम्पादनपूर्वकह्रस्वान्ताङ्गस्य विनाशे निमित्तं न भविष्यति उपजीव्यविरोधात्। तथा च तिसृ नाम् इति स्थिते अजन्ताङ्गस्य दीर्घः स्यान्नामीत्यर्थकेन नामीतिसूत्रेण प्राप्तस्य दीर्घस्य निषेधार्थं न तिसृचतसृ इति सूत्रं सप्रयोजनमेव। नामीति सूत्रारम्भसामर्थ्यात् नामीतिसूत्रविषये सन्निपातपरिभाषा न प्रवर्तते इति अजन्तपुँल्लिङ्गप्रकरणे सिद्धान्तकौमुद्यां स्पष्टम्। अतो नामीतिसूत्रेण दीर्घकर्तव्यतायां सन्निपातविरोधो नोद्भावनीयः।

**रपदसार्थक्यविचारः**

अचि र ऋत इति सूत्रे रपदाभावे विधेयबोधकपदस्याभावात् सूत्रस्य विधायकत्वासम्भवेन विध्यानर्थक्यं प्रसज्येत। तथा च तिस्रस्तिष्ठन्ति चतस्रः पश्येत्याद्यभीष्टप्रयोगाणां सिद्धिर्न स्यात्। अतः सूत्रस्य विधायकत्वसम्पादनपूर्वकेष्टप्रयोगसिद्धिसम्पादनाय सूत्रे विधेयबोधकस्य 'रः' इति पदस्योपादानं कृतं वर्तते।

**ऋत इति पदस्य सार्थक्यविचारः**

अत्रेदं विचार्यते अचि र ऋत इति सूत्रे त्रिचतुरोः स्त्रियां तिसृचतसृ इति पूर्वसूत्रात् तिसृचतसृ इति पदमनुवर्तते। अर्थवशाद्विभक्तेर्विपरिणामः इति न्यायेन षष्ठ्यन्ततया विभक्तेः विपरिणामश्च क्रियते। विपरिणमिते तिसृचतस्रोरिति पदे स्थानषष्ठी स्वीक्रियते। तथा च सूत्रार्थो भविष्यति – " तिसृचतसृशब्दयोः रेफादेशस्स्यादजादिविभक्तौ परतः"। अस्यां स्थितौ तिसृचतसृशब्दयोः स्थानषष्ठीस्वीकारेण अल्समुदायबोधकशब्दोत्तरश्रूयमाणा या स्थानपदार्थनिरूपितसम्बन्धार्थिका षष्ठी तदन्तं यत्पदं तत्पदघटिते शास्त्रे अन्त्यस्य अल इति पदद्वयमुपतिष्ठते इत्यर्थिकया अलोऽन्त्यस्येति परिभाषया अजादिविभक्तौ परतः तिसृचतसृशब्दावयवस्य अन्त्यत्वविशिष्टाल्पदबोध्यस्य ऋकारस्य स्थाने एव रेफादेशो भविष्यति। तथा च ऋत इति पदस्याभावेऽपि ऋकारस्य स्थाने रेफादेशस्य सिद्धत्वेन सूत्रे ऋत इति पदं व्यर्थमेव स्यादिति चेदत्रोच्यते – ऋत इति षष्ठ्यन्तस्य सूत्रे उपादानाभावे द्वे पदे एव सूत्रेऽवशिष्टे भविष्यतः। अचीतिनिमित्तबोधकं पदं तथा र' इत्यादेशबोधकं पदम्। आदेशताया निरूपकांशे नित्यसाकाङ्क्षत्वात् स्थानिबोधकस्य पदस्य सूत्रेऽनुवृत्तिः कर्तव्या भविष्यति। अस्यां स्थितौ स्थानिबोधकतया पूर्वसूत्रात् 'त्रिचतुरोः' तथा 'तिसृचतसृ' इत्यनयोरुभयोः पदयोरनुवृत्तिस्संभवति। तत्र कतरस्य पदस्यानुवृत्तिर्भवेदित्याकाङ्क्षायां पूर्वसूत्रे त्रिचतुरोरितिपदं स्थानिबोधकतया क्लृप्तं वर्तते। तिसृचतसृपदस्य तु आदेशबोधकत्वं निश्चितं वर्तते। यदि अत्र सूत्रे तिसृचतसृ इत्यस्य पदस्यानुवृत्तिं कृत्वा स्थानिबोधकत्वमुच्यते तर्हि पूर्वसूत्रे क्लृप्तादेशबोधकस्य परित्यागः कृतो भवेत्। आदेशबोधकस्य तिसृचतसृ इति पदस्य कार्ययोगित्वञ्च न सम्भवेत्। यदि च त्रिचतुरोः इति पदस्यानुवृत्तिः क्रियते तर्हि तस्य तु स्थानित्वं क्लृप्तमेव वर्तते अतः क्लृप्ताभावकल्पनाऽपेक्षया अक्लृप्तकल्पनाया अन्याय्यत्वात् इति नियमेन पूर्वक्लृप्तस्थानिबोधकपदस्य त्रिचतुरोरित्यस्यैव सूत्रेऽनुवृत्तिर्भवेत्। तथा च सूत्रार्थस्स्यात् – "त्रिचतुरोः स्थाने रेफादेशस्स्यादजादिविभक्तौ परतः"। एवञ्च तिसृचतसृशब्दावयवस्य ऋकारस्य स्थाने रेफादेशस्य प्रवृत्तिरेव न भवेत्। अतः तिसृचतसृशब्दस्य स्थाने रेफादेशस्य प्रतिपत्त्यर्थं सूत्रे ऋत इति पदस्योपादानं कृतं वर्तते। उपादीयमाने च ऋत इति षष्ठ्यन्तपदे पूर्वसूत्रे कार्ययोगितया निर्दिष्टस्य त्रिचतुरोरितिपदस्य ऋत पदार्थेन साकं सम्बन्धाभावादेवानुवृत्तिर्न भविष्यति। यतोहि त्रिशब्दावयवत्वं चतुश्शब्दावयवत्वं वा ऋत्पदबोध्ये ऋकारे बाधितं वर्तते। अतः सूत्रे तिसृचतसृशब्दस्यैवानुवृत्तिर्भविष्यति। तिसृचतसृशब्दावयवत्वं तु

ॠकारेऽबाधितं वर्तते। यदि ॠत इति पदं सूत्रे नोपादीयेत तथा सति त्रिचतुरोरित्यस्याप्यनुवृत्तिस्सम्भाव्येत। तथा च हलादिविभक्तिपरतः त्रिचतुरोः स्थाने तिसृचतसृ इत्यादेशौ भविष्यतः। त्रिचतुरोस्स्थाने रेफादेशो भविष्यति अपवादत्वात्। अयम्भावः – त्रिचतुरोस्स्त्रियां तिसृचतसृ इति सूत्रे अष्टन आ विभक्तौ इति सूत्रात् विभक्तौ इति पदमनुवर्तते। तथा च विभक्तित्वावच्छेदेन अजादिहलादिविभक्तौ परतः स्त्रियां विद्यमानयोः त्रिचतुरोस्स्थाने तिसृचतसृ इत्यादेशौ प्रसक्तौ। अथ च येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीतिन्यायेन त्रिचतुरोः स्त्रियां तिसृचतसृ इति शास्त्रकर्तृकावश्यप्राप्तौ 'अचि र' इति शास्त्रमारभ्यते अतः अचि र इतिशास्त्रं पूर्वशास्त्रस्यापवादो भविष्यति। एवञ्च हलादिविभक्तौ परतः तिसृचतसृ इत्यादेशौ भवतः, अजादिविभक्तौ परतः रेफादेशो भविष्यति अपवादत्वात्। अत्र दीक्षितानां नये अचि र इति शास्त्रस्यापवादत्वनिरासाय, तिसृचतसृशब्दयोस्स्थाने रेफादेशस्य प्रतिपत्तिसम्पादनाय च ॠत इति पदस्य सूत्रे उपादानं कृतं वर्तते इति वक्तुं शक्यम्।

**ॠत इत्यत्र तपरकरणस्य सार्थक्यविचारः**

अत्रेदं विचार्यते – तिसृचतसृशब्दयोस्स्थाने रेफादेशस्य प्रतिपत्त्यर्थं ॠत इति षष्ठ्यन्तस्य सूत्रे उपादानं कृतं इति पूर्वमभिहितम्। अत्र सूत्रे तिसृचतसृशब्दस्य अनुवृत्तिं कृत्वा ॠत्पदार्थेऽवयवावयविभावसम्बन्धेन तिसृचतसृपदार्थस्यान्वयोऽभीष्टो वर्तते। अस्यां स्थितौ तिसृचतसृशब्दावयवस्य दीर्घप्लुतॠकारस्य अप्रसिद्धत्वात् ॠत इत्यत्र कृतं तपरकरणं व्यर्थमेव। यतोहि यत्र तपरकरणं क्रियते तत्र असमकालस्य व्यावृत्तिर्भवति समकालस्य च ग्रहणं भवति तत्र प्राप्ताप्राप्तविवेकन्यायेन तपरस्तत्कालस्येति शास्त्रस्य असमकालव्यावृत्तौ एव विधेयता पर्यवस्यति। प्रकृतस्थले असमकालदीर्घप्लुतॠकारौ उभावपि तिसृचतसृशब्दावयवतयाऽप्रसिद्धौ अतः अप्रसिद्धस्य व्यावृत्त्यर्थम् ॠत इत्यत्र कृतं तपरकरणमनावश्यकमेवेति चेदत्रोच्यते – ॠत इत्यत्र तपरकरणाभावे अचि र उः इति सूत्रस्वरूपं स्यात्। अस्यां स्थितौ उरिति उशब्दस्य प्रथमैकवचनान्तरूपम् अथवा ॠशब्दस्य षष्ठ्येकवचनान्तरूपमिति सन्देहे जाते व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति परिभाषया शिष्टकृताद्व्याख्यानादेवान्यतराद्यर्थस्य निर्णयः कर्तव्यो यत् उरिति षष्ठ्येकवचनान्तमेव न तु प्रथमैकवचनान्तम्। एवञ्च शिष्टकृद्व्याख्यानाश्रयणे मनोव्यापाररूपं गौरवं प्रसज्येत। तपरकरणे कृते तु पूर्वसन्देहो नोदेति। अतः सन्देहनिवृत्त्यर्थं शिष्टकृद्व्याख्यानस्यावश्यकतैव नास्ति। यद्यपि तपरकरणपक्षे मात्राकृतं गौरवं भवति तथापि मात्राकृतगौरवापेक्षया शिष्टकृद्व्याख्यानाश्रयणरूपमनोव्यापाररूपगौरवस्य गुरुतरगौरवतया भगवता पाणिनिना मात्राकृतं गौरवम्,एवादृतम्। अत एव अभियुक्तैरुच्यते – न कण्ठताल्वाद्यभिघातकृतमेव गौरवं गौरवमित्यादर्तव्यं न तु ज्ञानकृतं गौरवम्। अर्थात् यत्र मात्राकृतगौरवापेक्षया मनोव्यापाररूपगौरवं गुरुतरं भवति तत्र लाघवानुरोधेन मात्राकृतं गौरवमेव शास्त्रकृद्भिराश्रीयते।

**गुणदीर्घोत्वानामपवादः**

सिद्धान्तकौमुद्यां श्रीभट्टोजिदीक्षितैरुक्तम् –गुणदीर्घोत्वानामपवाद इति। अस्य व्याख्यानं मनोरमायां कृतं यत् तिस्रस्तिष्ठन्तीत्यत्र ॠतो ङिसर्वनामस्थानयोरिति सूत्रेण गुणः प्राप्तः, तिस्रः पश्य इत्यत्र प्रथमयोः पूर्वसवर्ण इति सूत्रेण पूर्वसवर्णदीर्घः प्राप्तः। प्रियतिस्र आगतः प्रियतिस्रः स्वमित्यत्र ॠत उत् इति सूत्रेण उत्त्वं च प्राप्तम्। अस्यां स्थितौ अचि र ॠत इति सूत्रेण विधीयमानः रेफादेशः बाध्यसामान्यचिन्तापक्षे त्रिभिः शास्त्रैर्विधीयमानानां गुणदीर्घोत्त्वानाञ्चापवादः। अत्र स्थले यदि बाधविशेषचिन्तापक्ष आश्रीयते तर्हि मध्ये पठितापवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् इति न्यायेन प्रथमयोः पूर्वसवर्णदीर्घः इति सूत्रेन विधीयमानस्य पूर्वसवर्णदीर्घस्य अथ च ॠत उत् इति सूत्रेण विधीयमानस्योत्त्वस्य रेफादेशेन बाधस्स्यात् न तु ॠतो ङिसर्वनामस्थानयोरिति सूत्रेण विधीयमानस्य गुणस्य।यदि च अनन्तरस्य विधिर्भवति प्रतिषेधो वा इति न्यायाश्रयणं क्रियते। तर्हि ॠत उदितिसूत्रेण विधीयमानस्य उत्त्वस्यैव बाधको रेफादेशो भवेन्न तु गुणदीर्घयोः। अतोऽत्र बाध्यसामान्यचिन्तापक्ष एव भट्टोजिदीक्षितैराश्रितो न तु बाध्यविशेषचिन्तापक्षः।

अत्रेयं जिज्ञासा भवति बाधस्थले द्वौ पक्षौ स्तः बाधसामान्यचिन्तापक्षः बाधविशेषचिन्तापक्षश्च। तत्र कतरः पक्षः कुत्राश्रयणीय इत्याकाङ्क्षायां दीक्षितैः मनोरमायामुक्तं – सामान्यविशेषपक्षौ च जातिव्यक्तिपक्षवल्लक्ष्यानुरोधेन व्यवस्थितौ इति कैयटादौ स्थितम्। अर्थात् यत्र बाध्यसामान्यचिन्तापक्षमाश्रित्य सकलेष्टसिद्धिर्भविष्यति तत्र बाध्यसामान्यचिन्तापक्ष आश्रीयते यत्र बाध्यविशेषचिन्तापक्षमाश्रित्य उत्सर्गापवादभाव इष्टस्तत्र बाध्यविशेषचिन्तापक्ष एव आश्रीयते।

अत्र गुणदीर्घोत्त्वानामपवाद इति वाक्ये अपवादशब्दः अपवादपर एव भट्टोजिदीक्षितैरभिप्रेतः। अन्यैस्तु अपवादशब्दो बाधकत्वोपलक्षकः। एवञ्च पूर्वविप्रतिषेधेन गुणमपि बाधते इत्याशयो वर्ण्यते। तत्र मनोरमाकारैः अपवादशब्दो न बाधकत्वोपलक्षक इति सयुक्तिकं मनोरमायां निरूपितम्। किन्त्वत्रेदं विचारणीयं वर्तते यत् भट्टोजिदीक्षितानां कीदृशोऽपवादपदार्थोऽभिमतो वर्तते येन गुणदीर्घोत्त्वानामपवाद अस्याः पङ्क्तेः सङ्गतिर्भवेत्। अतः ईषदत्र अपवादपदार्थो निरूप्यते –

सिद्धान्तकौमुद्यां भट्टोजिदीक्षितैः "परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः" इति वाक्यं निगदितम्। अनेन च वाक्येन पूर्वपूर्वापेक्षयोत्तरोत्तरस्य बलवत्त्वं बोधितम्। तथा चापवादस्य सर्वापेक्षयोत्तरत्वेन सर्वापेक्षया बलवत्त्वम्। किन्तु अपवादस्य बलवत्त्वे हेतुस्तु नोक्तः। अतः सङ्ग्राहकवाक्यघटकस्य चरमस्य पदस्यार्थ निष्कृष्य प्रमाणयितुं श्रीमद्भिर्भट्टनागेशैरनुमितिरूपा परिभाषा निगदिता "अन्तरङ्गादपि अपवादो बलवान्"। तत्रापवादस्वरूपो हेतुरपवादशब्देनैवोक्तः। एवञ्च अपवादः परनित्यान्तरङ्गापेक्षया बलवान् अपवादत्वादित्यनुमानप्रयोगः। अत्र यद्यपि पक्षतावच्छेदकहेत्वोरैक्येन प्राचीनानां नये उपनयवाक्याच्छाब्दबोधो न स्यात् तथापि नवीनानां नये विधेयांशे यत्र किञ्चिदधिकमवगाहते तत्र शाब्दबोधो भवत्येव। अत्रोपनयवाक्यम् अपवादो बलवत्त्वव्याप्यापवादत्ववान्। अत्र पक्षतावच्छेदकमपवादत्वं तस्मिन्नपवादत्वे बलवत्त्वव्याप्यत्वस्याधिकस्य भानात् बलवत्त्वव्याप्यापवादत्ववान् अपवाद इत्युपनयवाक्याच्छाब्दबोधः स्यादेवातः अपवादः पराद्यपेक्षया बलवान् अपवादत्वादित्यनुमानप्रयोगः सुष्ठपपद्यत एव। अस्मिन्ननुमानप्रयोगे घटकीभूतो योऽपवादः सः क इत्याकाङ्क्षायां श्रीमद्भिर्नागेशैः परिभाषान्तरं निगदितं **"येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति"** इति। अत्र येनेत्यत्र कर्तर्यर्थे तृतीयाविभक्तिः नाप्राप्तशब्दघटकप्राप्तशब्दे **"नपुंसके भावे क्त"** इति सूत्रेण भावे क्तप्रत्ययः। एवञ्च न प्राप्तमप्राप्तम् इति नञ्तत्पुरुषसमासोत्तरं न अप्राप्तं नाप्राप्तमिति पुनः नञ्तत्पुरुषसमासः। किन्तु अप्राप्तमित्यस्य नञा सह समासे स्वीक्रियमाणे "नलोपो नञ" इत्यनेन सूत्रेण नञ्घटकस्य नकारस्य लोपः स्यात् लोपे सति तस्मान्नुडचि इति सूत्रेण नुडागमे कृते अनाप्राप्तमित्यनिष्टं प्रसज्येत तद्वारणाय पृषोदरादित्वाद् नञोऽवयवस्य नस्य लोपाभावः कल्पनीयः। यद्वा अत्र निषेधार्थकेन नशब्देन अप्राप्तमित्यस्य सह सुपा इति सूत्रेण समासः। एवञ्च अस्मिन् पक्षे नलोपो नञ इत्यस्य सूत्रस्य प्राप्तिरेव नास्ति। अत्र निषेधार्थकेन नद्वयेन प्राप्तपदार्थप्राप्तौ आवश्यकत्वमुक्तं भवति। एवञ्च येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीत्यस्य वाक्यस्य यच्छास्त्रकर्तृकावश्यप्राप्तिकालिकं यच्छास्त्रकर्मकारम्भणं तच्छास्त्रं तस्य बाधकम् इत्यर्थो निष्पद्यते। प्रकृते आवश्यकत्वञ्च व्यापकत्वमेव। तत्र व्यापकत्वस्य व्याप्यतांशे नित्यसाकाङ्क्षत्वात् किं निष्ठव्याप्यतानिरूपिता व्यापकता ग्राह्या इत्याकाङ्क्षायां प्रत्यासत्त्या अपवादत्वेनाभिमतशास्त्रीयप्राप्तिनिष्ठव्याप्यतानिरूपिता व्यापकता गृह्यते। एवञ्चात्र तच्छास्त्रीयप्राप्तिनिष्ठव्यापकतानिरूपित-व्याप्यतावत्प्राप्तिमत् यच्छास्त्रं तत्तस्य बाधकं भवतीति वाक्यार्थो निष्पद्यते अर्थात् तच्छास्त्रीयप्राप्तिव्याप्यप्राप्तिकं शास्त्रं तस्य बाधकम्। अत्र प्राप्तिर्नाम लक्ष्ये उद्देश्यतावच्छेदकसम्बन्धः, प्रवृत्तिर्नाम लक्ष्ये विधेयसम्बन्ध इति प्राप्तिप्रवृत्त्योर्भेदः। एवञ्च उद्देश्यतावच्छेदकसम्बन्धरूप-प्राप्त्योर्व्याप्यव्यापकभावे तेन सम्बन्धेनोद्देश्यतावच्छेकयोरपि व्याप्यव्यापकभावो भवत्येव। यथा आद्गुणः वृद्धिरेचीत्यादौ आद्गुण इत्येतच्छास्त्रीयोद्देश्यतावच्छेदकम् अजव्यवहितपूर्वत्वविशिष्टावर्णत्वं तस्य सम्बन्धः स्वरूपसम्बन्धः, वृद्धिरेचीत्येतच्छास्त्रीयोद्देश्यतावच्छेदकम् एजव्यवहितपूर्वत्वविशिष्टावर्णत्वं तस्य सम्बन्धः स्वरूपसम्बन्धः। एवञ्च अनुयोगितासम्बन्धेन एजव्यवहितपूर्वत्वविशिष्टावर्णत्वप्रतियोगिक-स्वरूपसम्बन्धस्य अनुयोगितासम्बन्धेन अजव्यवहितपूर्वत्वविशिष्टावर्णत्वप्रतियोगिकस्वरूपसम्बन्धो व्यापको भवति। एवञ्च यत्र यत्र एजव्यवहितपूर्वत्वविशिष्टावर्णत्वप्रतियोगिकस्वरूपसम्बन्धोऽनुयोगितासम्बन्धेन वर्तते तत्र तत्र अजव्यवहितपूर्वत्वविशिष्टावर्णत्वप्रतियोगिक-स्वरूपसम्बन्धोऽनुयोगितासम्बन्धेन वर्तत एव इति कृत्वा उद्देश्यतावच्छेदकसम्बन्धरूपप्राप्त्योर्व्याप्यव्यापकभावः।

अत्र इदमवश्यमवधेयं यदुद्देश्यतावच्छेदकतावच्छेदकसम्बन्धयोर्व्याप्यव्यापकभावे सति तेन सम्बन्धेन उद्देश्यतावच्छेदकधर्मयोरपि व्याप्यव्यापकभावो भवत्येव तथा च प्रकृते आद्गुणः वृद्धिरेचीत्यनयोः सूत्रयोः उद्देश्यतावच्छेदकतावच्छेदकस्वरूपसम्बन्धेन- एजव्यवहितपूर्वत्व-विशिष्टावर्णत्वाजव्यवहितपूर्वत्वविशिष्टावर्णत्वरूपोद्देश्यतावच्छेदकधर्मयोः व्याप्यव्यापकभावो भवति। उद्देश्यतावच्छेदकतावच्छेदकसम्बन्धेन उद्देश्यतावच्छेदकधर्मयोर्व्याप्यव्यापकभावस्वीकारदेव परिभाषेन्दुशेखरे पूर्वग्रन्थेन साकम् उत्तरग्रन्थस्य न विरोधः। तथाहि मूले श्रीमद्भिर्नागेशभट्टैः यच्छास्त्रकर्तृकावश्यप्राप्तौ यो विधिरारभ्यते इति पूर्वग्रन्थेन प्राप्तिरूपोद्देश्यतावच्छेदकतावच्छेदकसम्बन्धे आवश्यकत्व-रूपव्यापकत्वमुकत्वा तस्य विवरणावसरे विशेषशास्त्रोद्देश्यविशेषधर्मा-वच्छिन्नवृत्तिसामान्यधर्मावच्छिन्नोद्देश्यताकशास्त्रस्य विशेषधर्मा-वच्छिन्नोद्देश्यताकशास्त्रेण बाध इति उत्तरग्रन्थेन सामान्यरूपव्यापकत्वम् उद्देश्यतावच्छेदकधर्मे बोधितम्। यदि च अयं नियमो ग्रन्थकृतामभिमतो न स्यात्तर्हि विवरणविवियमाणभूतयोः पूर्वग्रन्थोत्तरग्रन्थयोः परस्परं विरोधः स्यादेव। इत्थञ्च परिभाषायाः तच्छास्त्रीयोद्देश्यतावच्छे-दकव्याप्योद्देश्यतावच्छेदककं शास्त्रं तस्य बाधकं भवति इत्यर्थो निष्पद्यते। अमुमेवार्थं मनसिकृत्य मूले श्रीमद्भिः नागेशभट्टैः विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिसामान्यधर्मावच्छिन्नो-द्देश्यताकशास्त्रस्य विशेषधर्मावच्छिन्नोद्देश्यताकशास्त्रेण बाध इति वाक्यमुक्तम्। अस्मिन् वाक्ये पर्यायत्रयं विशेषपदं समागतम्। तत्र प्रथमविशेषशब्देनापवादत्वेनाभिमतं शास्त्रं ग्राह्यं द्वितीयतृतीयविशेषपदाभ्यां व्याप्यरूपोऽर्थो ग्राह्यः। वाक्यघटकसामान्यपदेन पूर्वोक्तः व्यापकरूपोऽर्थो ग्राह्यः। तथा च अस्य वाक्यस्य अपवादत्वेनाभिमतशास्त्रीयोद्देश्यतावच्छेदकधर्मरूपो यो व्याप्यधर्मः तद्धर्मावच्छिन्नवृत्तिः यः सामान्यधर्मः अर्थात् व्यापकधर्मः तद्धर्मावच्छिन्नोद्देश्यताकशास्त्रस्य अर्थात् व्यापकधर्मावच्छि-

न्नोद्देश्यताकशास्त्रस्य व्याप्यधर्मावच्छिन्नोद्देश्यताकशास्त्रेण बाध इत्यर्थः। तथाहि 'दादेर्धातोर्घः' 'हो ढः' इत्यनयोः सूत्रयोर्मध्ये उत्सर्गापवादभावो वर्तते। तत्रापवादत्वेनाभिमतविशेषशास्त्रं दादेर्धातोर्घ इति शास्त्रं तदीयोद्देश्यतावच्छेदकधर्मः पदान्तत्वविशिष्टझल्परकत्वविशिष्ट-दादिधात्ववयवत्वविशिष्टहत्वं तद्धर्मावच्छिन्नः पदान्तत्वविशिष्टझल्परकत्वविशिष्ट-दादिधात्ववयवत्वविशिष्टः हकारः तद्वृत्तिः सामान्यधर्मः धात्ववयवहत्वरूपो धर्मः तद्धर्मावच्छिन्नोद्देश्यताकशास्त्रस्य हो ढः इति शास्त्रस्य विशेषधर्मावच्छिन्नोद्देश्यताकशास्त्रेण दादेधातोर्घः इति शास्त्रेण बाधो भवति। एवञ्च धुगित्यादौ घत्वमेव प्रवर्तते न तु ढत्वम्। किन्त्वत्रेदं जिज्ञास्यते यत् सामान्यविशेषपदार्थमहिम्नैव व्यापकधर्मे व्याप्याधिकरणनिरूपितवृत्तित्वरूपं विशेषणं लभ्यत एव। यदि व्यापकीभूतधर्मे व्याप्याधिकरणनिरूपितवृत्तित्वं न स्यात्तर्हि तस्य व्यापकत्वमेव भज्येत। अतो ग्रन्थकृद्भिः कण्ठरवेण सामान्यधर्मे विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तित्वरूपं विशेषणमुपात्तमिति चेदुच्यते प्रायः शब्दशास्त्रे उद्देश्यतावच्छेदकतावच्छेदकसम्बन्ध एव व्यापकतावच्छेदकसम्बन्धतया व्याप्यतावच्छेदकसम्बन्धतया च दृष्टः। अतः सर्वत्र स एव सम्बन्धः व्याप्यतावच्छेदकसम्बन्धतया व्यापकतावच्छेदकसम्बन्धतया च ग्राह्य इति भ्रमवारणाय सामान्यधर्मे वृत्तित्वान्तं विशेषणं ग्रन्थकारैः शब्दत उपात्तम्। अन्यथा अजादेर्द्वितीयस्येत्यनेन शास्त्रेण एकाचो द्वे प्रथमस्य इति शास्त्रस्य बाधो न स्यात्। यतोहि ऊर्णनावेत्यत्र एकाचो द्वे प्रथमस्येत्येतच्छास्त्रीयोद्देश्यतावच्छेदकं प्रथमैकाच्त्वं स्वरूपसम्बन्धेन ऊरित्यत्र वर्तते द्वितीयैकाच्त्वं तु 'नु'इत्यत्र वर्तते अतः प्रथमैकाच्त्वद्वितीयैकाच्त्वयोः सामानाधिकरण्यस्याभावात् तयोर्व्याप्यव्यापकभावाभावादत्र प्रथमैकाच्त्वावच्छिन्नो-द्देश्यताकशास्त्रस्य द्वितीयै-काच्त्वावच्छिन्नोद्देश्यताकशास्त्रेण बाधो न स्यात्। तादृशविशेषणस्य शब्दत उच्यमाने तु कालिकातिरिक्तो यः सामानाधिकरण्यसम्पादकः सम्बन्धः सोऽपि व्यापकतावच्छेदकसम्बन्धतया स्वीकर्तुं शक्यत इति विशेषो लभ्यते। प्रकृतस्थले स्वाश्रयोत्तरत्वरूपसम्बन्धः सामानाधिकरण्यसम्पादको भवति अतो व्यापकतावच्छेदकसम्बन्धतया स्वाश्रयोत्तरत्वरूपसम्बन्धोऽपि स्वीकर्तुं शक्यते। तथा च प्रकृते व्यापकीभूतधर्मः प्रथमैकाच्त्वं तच्च स्वाश्रयोत्तरत्वसम्बन्धेन 'नु' इत्यत्र वर्तते, तथाहि स्वं प्रथमैकाच्त्वं तदाश्रयः ऊरिति तदुत्तरत्वं नु इत्यत्र। तत्रैव च स्वरूपसम्बन्धेन द्वितीयैकाच्त्वस्यापि सत्त्वेन प्रथमैकाच्त्वद्वितीयैकाच्त्वयोः सामानाधिकरण्यमुपपद्यते। तथा च एकाचो द्वे प्रथमस्य इति शास्त्रस्य अजादेर्द्वितीयस्य इति शास्त्रेण बाधो भवति। अत्रेदं जिज्ञास्यते यदुद्देश्यतावच्छेदकधर्मयोर्व्याप्यव्यापकभावो बाधप्रयोजक इति वदतां ग्रन्थकृतां क आशयः किं साक्षादुद्देश्यतावच्छेदकधर्मयो-र्व्याप्यव्यापकभावो बाधप्रयोजको वासाक्षात्परम्परोभयसाधारण्येणोद्देश्यतावच्छेदक-धर्मयोर्व्याप्यव्यापक-भावो बाधप्रयोजको वा। तत्र आद्यः कल्पः स्वीकर्तुं न शक्यते, यतोहि हयवरडितिसूत्रभाष्ये भगवता भाष्यकृता "नेमौ रहौ कर्यिणौ द्विर्वचस्य। किन्तर्हि? निमित्तमिमौ रहौ द्विर्वचनस्य" इत्युक्तम्। अत्र भगवता हकारं दृष्टान्तीकृत्य रेफे द्वित्वनिष्ठविधेयता-निरूपितोद्देश्यताश्रयत्वाभावो बोधितः। तथा च यथा हकारो द्वित्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयत्वाभाववान् द्विर्वचननिमित्तत्वात् तथा रेफोऽपि द्वित्वनिष्ठविधेयतानिरूपितो-द्देश्यताश्रयत्वाभाववान् द्विर्वचननिमित्तत्वात्। एवञ्च रेफनिष्ठनिमित्ततया यर्पदबोध्यरेफनिष्ठकार्यितायाः बाधो भाष्यकृता उक्तः। तथा चोक्तभाष्येण अचो रहाभ्यां द्वे इत्येतच्छास्त्रीयपरम्परयोद्देश्यतावच्छेदकरेफत्वापेक्षया अनचि चेत्येतच्छास्त्रीय-साक्षादुद्देश्यतावच्छेदकयर्त्वस्य व्यापकत्वात् यर्त्वावच्छिन्नकार्यितायाः रेफत्वावच्छिन्ननिमित्ततया बाधो बोधितस्तद्भाष्यमाद्यपक्षस्वीकारेऽसङ्गतं स्यात्। तस्मात्साक्षादुद्देश्यतावच्छेदकधर्मयोर्व्याप्यव्यापकभावो बाधप्रयोजक इति वक्तुं न शक्यते। यदि च साक्षात्परम्परासाधारण्येण व्याप्यव्यापकभावो बाधप्रयोजक इत्युच्यते तथा च नेमौ रहौ कार्यिणौ द्विर्वचनस्य इति भाष्यम् अस्मिन् पक्षे सङ्गच्छत इत्युच्यते चेदत्रोच्यते उक्तभाष्यस्य सङ्गतत्वेऽपि अनुशतिकादिषु पुष्करसच्छब्दपाठसामर्थ्यात् आदिवृद्धिरन्त्योपधावृद्धी बाधते इति भाष्योक्तबाध्यबाधकभावोऽसङ्गतः स्यात्। तथाहि पुष्करे तीर्थविशेषे सीदतीति पुष्करसद् पुष्करसदोऽपत्यमित्यर्थे बाह्वादिभ्यश्च इत्यनेन पुष्करसच्छब्दादिञि पुष्करसद् इञ् इति स्थिते "अत उपधाया" इत्यनेन उपधाभूतस्य सकारोत्तरवर्त्यकारस्य स्थाने वृद्धिः प्राप्ता तथा च तद्धितेष्वचामादेरिति शास्त्रेण प्रातिपदिकावयवस्याद्यत्वविशिष्टस्याचस्स्थाने वृद्धिः प्राप्ता। एवञ्च "अत उपधायाः" "तद्धितेष्वचामादेः" इत्याभ्यां सूत्राभ्यामेव वृद्ध्योः कृतयोः पौष्करसादिरिति प्रयोगस्य सिद्धौ अनुशतिकादिगणे पुष्करसच्छब्दपाठस्य वैयर्थ्यमाशङ्क्य भगवता भाष्यकृतोक्तम् आदिवृद्धिरन्त्योपधावृद्धी बाधते। एवञ्च प्रकृते तद्धितेष्वचामादेरित्यनेन सूत्रेण विधीयमानया वृद्ध्या उपधावृद्धेर्बाधादत्रोपधावृद्धिर्न स्यात् तदर्थम् अनुशतिकादिगणे पुष्करसच्छब्दस्य पाठः सार्थको भवति। अत्र साक्षात्परम्परासाधारण्येनोद्देश्यतावच्छेदकधर्मयोर्व्याप्यव्यापकभावो बाधप्रयोजक इति स्वीकारे तु इदं भाष्यमसङ्गतं स्यात् यतो हि प्रकृते परम्परया तद्धितेष्वचामादेरित्येतच्छास्त्रीयोद्देश्यतावच्छेदकं तद्धितसंज्ञकञिणित्प्रत्ययान्यतरत्वमेवम् अचोऽञ्णितीत्ये-तच्छास्त्रीयोद्देश्यतावच्छेदकं ञिणित्प्रत्ययान्यतरत्वम् "अत उपधाया" इत्येतच्छास्त्रीयोद्देश्यतावच्छेदकं ञिणित्प्रत्ययान्यतरत्वम्। एवञ्च ञिणित्प्रत्यायान्यतरत्वापेक्षया तद्धितसंज्ञकञिणित्प्रत्ययान्यतरत्वस्य व्याप्यत्वात्तद्धितसंज्ञकञिणित्प्रत्ययान्यतरत्वावच्छिन्नोद्देश्यताक-शास्त्रेणतद्धितेष्वचामादेरित्यनेनञिणित्प्रत्ययान्यतरत्वावच्छिन्नोद्देश्यताकयोश्शास्त्रयोः अचोऽञ्णिति अत उपधाया इत्यनयोरनेनैव न्यायेन बाधे सिद्धे भगवता भाष्यकृता अनुशतिकादिगणे पुष्करसच्छब्दपाठसामर्थ्याद् आदिवृद्धिरन्त्योपधावृद्धी बाधते इति यदुक्तं तद्भाष्यमिदानीमसङ्गतं

स्यात्। अतः साक्षात्परम्परासाधारण्येन उद्देश्यतावच्छेदकधर्मयोर्व्याप्यव्यापकभावो बाधप्रयोजक इत्ययमपि पक्षः स्वीकर्तुं न शक्यते इति चेदत्रोच्यते विशेष्यविशेषणदलप्रविष्टयावत्पदार्थसङ्कुचितयोरुद्देश्यतावच्छेदकधर्मयोर्व्याप्यव्यापकभावो बाधप्रयोजकः। एवं स्वीकारे न कोऽपि दोषः। तथाहि तद्धितेष्वचामादेरित्येतच्छास्त्रीयविशेष्यविशेषणदलप्रविष्टयावत्पदार्थसङ्कुचितमुद्देश्यतावच्छेकम् अज्घटितप्रातिपदिकाव्यवहितोत्तरत्वविशिष्टतद्धितसंज्ञकञिणित्प्रत्ययान्यतरत्वं अचोऽञ्णितीत्येतच्छास्त्रीयविशेष्यविशेषणदलप्रविष्टयावत्पदार्थसङ्कुचितमुद्देश्यतावच्छेदकम् अजन्ताङ्गाव्यवहितोत्तरत्वविशिष्टञिण्णित्प्रत्ययान्यतरत्वम् अत उपधाया इत्येतच्छास्त्रीयविशेष्यविशेषणदलप्रविष्टयावत्पदार्थसंकुचितोद्देश्यतावच्छेदकम् अङ्गावयवयादुपधावधिकञिणित्प्रत्ययान्यतरत्वम्। इदानीम् अचोऽञ्णितीत्येतच्छत्रीयोद्देश्यतावच्छेदकव्यापकत्वम् अत उपधाया इत्येतच्छास्त्रीयोद्देश्यतावच्छेदकव्यापकत्वञ्च तद्धितेष्वचामादेरित्येतच्छास्त्रीयोद्देश्यतावच्छेदके नास्ति। तथाहि मरुतोऽपत्यं मारुतिरित्यत्र मरुच्छब्दात् इञ् प्रत्यये कृते मरुत् इ इत्यवस्थायाम् अचोऽञ्णिति अत उपधाया इत्येतच्छास्त्रीयोद्देश्यतावच्छेदकाभाववति तद्धितेष्वचामादेरित्येतच्छास्त्रीयोद्देश्यतावच्छेदकस्य अर्थात् अज्घटितप्रातिपदिकावधिकपरत्वविशिष्टतद्धितसंज्ञकञिणित्प्रत्ययान्यतरत्वस्य सत्त्वाद् अज्घटितप्रातिपदिकावधिकपरत्वविशिष्टतद्धितसंज्ञकञिणित्यत्ययान्यतरत्वं व्यापकं न भवति, अतोऽनेन न्यायेन बाधो न सिद्ध इति कृत्वा भगवता भाष्यकृता अनुशतिकादिगणे पुष्करसच्छब्दपाठसामर्थ्याद्यो बाध्यबाधकभाव उक्तः तत्सङ्गच्छते। नेमौ रहौ कार्यिणौ द्विर्वचनस्य किन्तर्हि निमित्तं द्विर्वचनस्य इति भाष्यमपि अस्मिन् कल्पे सुतरां सङ्गच्छते। तथाहि अचो रहाभ्यां द्वे इत्येतच्छास्त्रीयविशेष्य-विशेषणदलप्रविष्टयावत्पदार्थसङ्कुचितोद्देश्यतावच्छेदकम् अजव्यवहितोत्तरत्वविशिष्टयरव्यवहित- पूर्वत्वविशिष्टरेफत्वम् 'अनचि च' इत्येतच्छास्त्रीयविशेष्यविशेषणदलप्रविष्टयावत्पदार्थसङ्कुचितोद्देश्यतावच्छेदकञ्चअजव्यवहितोत्तरत्वविशिष्टमथ च अजभावाव्यवहित-पूर्वत्वविशिष्टं यर्त्वम्। एवञ्च अनचि चेत्येतच्छस्त्रीयोद्देश्यतावच्छेदकाजव्यवहितोत्तरत्वविशिष्टाजभावाव्यवहितपूर्वत्वविशिष्टवत्त्वापेक्षया अचो रहाभ्यां द्वे इत्येतच्छास्त्रीयोद्देश्यतावच्छेदकाजव्यवहितोत्तरत्वविशिष्टयरव्यवहितपूर्वत्वविशिष्टरेफत्वस्य व्याप्यतया भगवता भाष्यकृता रेफत्वावच्छिन्ननिमित्ततया यर्त्वावच्छिन्नकार्यितायाः यो बाधः कृतः तद्भाष्यं सुतरां सङ्गच्छते। यद्वा उद्देश्यतापदेनात्र शाब्दबोधीया विषयता गृह्यते, शाब्दबोधीया विषयता च सङ्कुचितैव भवति तावतापि भवति भाष्यस्य सङ्गतिः। यतो हि यदि शाब्दबोधीया विषयता गृह्यते तर्हि तद्धितेष्वचामादेरित्येतत्सूत्रजन्यशाब्दबोधीया विषयता प्रातिपदिकनिष्ठविशेष्यतानिरूपितस्वाव्यवहितोत्तरत्वसम्बन्धावच्छिन्नतद्धितसंज्ञकञिणित्प्रत्ययत्वावच्छिन्नप्रकारताख्यविषयता अचोऽञ्णितीत्येतत्सूत्रजन्यशाब्दबोधीयाविषयता अजन्ताङ्गनिष्ठस्वाव्यवहितपूर्वत्वसम्बन्धावच्छिन्नञिणित्प्रत्ययत्वावच्छिन्नञिणित्प्रत्ययनिष्ठप्रकारताख्यविषयता अतउपधाया इत्येतत्सूत्रजन्यशाब्दबोधीया विषयता उपधाभूतान्निष्ठविशेष्यतानिरूपिताव्यवहितपूर्वत्वसम्बन्धावच्छिन्नञिण्णित्प्रत्ययत्वावच्छिन्नप्रकारताख्यविषयता। एवञ्च अचोऽञ्णिति अत उपधाया इति शास्त्रद्वयजन्यशाब्दबोधीयविषयत्वाभावाधिकरणे 'मरुत् इ' इत्यत्र इञ्प्रत्यये तद्धितेष्वचामादेरित्येतत्सूत्रजन्यशाब्दबोधीयविषयतायाः सत्त्वात् तद्धितेष्वचामादेरित्येतच्छास्त्रजन्यशाब्दबोधीया विषयता अचोऽञ्णिति अत उपधाया इत्युभयशास्त्रीयशाब्दबोधीयविषयतायाः व्यापिका न भवति इति कृत्वा न बाधः। तथा च पाठसामर्थ्यादेव बाध्यबाधकभावो वक्तव्यः। अत्रेदं किञ्चिच्चिन्त्यते यद् व्याकरणशास्त्रे यत्र तद्व्यक्तित्वेन अन्यतरत्वेन व्यापकतामादाय बाध्यबाधकभावः तत्र तद्व्यक्तित्वमेव व्यापकतावच्छेदकं भवति। यत्र तु तद्व्यक्तित्वमादाय व्याप्यव्यापकभावो न सम्भवति तत्र अन्यतरत्वेनापि व्यापकता गृह्यते। यत्र च अन्यतरत्वेन अन्यतमत्वेन च व्यापकत्वं प्राप्तं तत्र अन्यतरत्वेनैव व्यापकत्वं ग्राह्यं न तु अन्यतमत्वेन। यथा 'इको यणचि' 'आद्गुणः' इत्यनयोश्शास्त्रयोबाध्यत्वम् अकः सवर्णे दीर्घ इत्यनेन शास्त्रेण अभीष्टम्। तद्यथा श्रीश इत्यत्र अकः सवर्णे दीर्घ इति शास्त्रस्य यणबाधकत्वं दैत्यारीत्यत्र च गुणबाधकत्वमभीष्टम्। किन्तु अत्र तद्व्यक्तित्वेन रूपेण इको यणचीत्येतच्छास्त्रजन्यशाब्दबोधीया विषयता अकः सवर्णे दीर्घ इत्येतच्छास्त्रजन्यशाब्दबोधीयविषयतापेक्षया व्यापिका न भवति। अतोऽत्रान्यतरत्वेन रूपेण व्यापकतामादाय बाध्यबाधकभावो वक्तव्यः। एवञ्च यत्र यत्र अकस्सवर्णे दीर्घ इत्येतच्छास्त्रजन्यशाब्दबोधीयविषयता तत्र तत्र 'इको यणचि' 'आगुणः' इत्येतदन्यतरशास्त्रजन्यशाब्दबोधीयविषयता वर्तते अतोऽन्यतरत्वेन रूपेण व्याप्यव्यापकभावो वक्तव्यः। तथा च अन्यतरत्वावच्छिन्नव्यापकतावद्विषयताकशास्त्रस्य तद्व्यक्तित्वावच्छिन्नव्याप्यतावद्विषयताकशास्त्रेण बाधो भवति। परन्तु एवमुच्यमाने यथा अकस्सवर्णे दीर्घ इत्यनेन शास्त्रेण 'इको चणचि' 'आद्गुणः' इत्यनयोश्शास्त्रयोर्बाधो भवति तद्वत् 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यस्यापि शास्त्रस्य बाधः स्यात्। यतो हि यत्र यत्र अकस्सवर्णे दीर्घ इत्येतच्छास्त्रजन्यशाब्दबोधीया विषयता तत्र तत्र 'इको यणचि' 'आद्गुणः' 'एरनेकाचोऽसंयोगपूर्वस्य' इत्येतदन्यतमशास्त्रजन्यशाब्दबोधीयविषयता वर्तते इति कृत्वा अन्यतमत्वावच्छिन्नशाब्दबोधविषयतायाः व्यापकत्वात् अकस्सवर्णे दीर्घ इत्येतच्छास्त्रीयविषयतायाः व्याप्यत्वेन अकस्सवर्णे दीर्घ इत्यनेन शास्त्रेण बाधे क्रियमाणे सप्तम्येकवचने 'वातप्रमी इ' इत्यत्र सवर्णदीर्घ एव स्यान्न तु 'एरनेकाचोऽसंयोगपूर्वस्य' इति शास्त्रेण यण् स्यात्। अतो यत्र व्यापकतावच्छेदकम् अन्यतरत्वम् अन्यतमत्वञ्च प्राप्तं

तत्र अन्यतरत्वावच्छिन्नैव व्यापकता ग्राह्या न तु अन्यतमत्वावच्छिन्ना। तेन 'वातप्रमी इ' इत्यत्र सवर्णदीर्घेण न भूयतेऽपितु यणा एव भूयते। किन्त्वत्र येनन नाप्राप्तिन्यायस्य तादृशोऽर्थो वक्तव्यः येन अर्थेनअन्यतमत्वावच्छिन्नविषयताया ग्रहणं न स्यादिति चेदत्रोच्यते स्वीयविषयताविशिष्टधर्मवद्विषयताकशास्त्रस्य स्वेन बाधः। अत्र विषयतावैशिष्ट्यञ्चधर्मे स्वव्यापकतावच्छेदकत्वस्वव्यापकतावच्छेदक-धर्मविशिष्टभिन्नत्वैतदुभयसम्बन्धेन। सम्बन्धघटकवैशिष्ट्यञ्च स्वव्यापकत्वस्वभिन्नत्वोभय-सम्बन्धेन। एवञ्चात्र यदि अकस्सवर्णे दीर्घ इत्येतच्छास्त्रजन्यशाब्दबोधीयविषयताव्यापकतावच्छेदकत्वम् अन्यतरत्त्वस्य अन्यतमत्वस्य च अनयोः द्वयोर्वर्तते। तत्र विषयताविशिष्टधर्मः अन्यतरत्वम् एव भवति न तु अन्यतमत्वरूपो धर्मः। तथाहि स्वपदेन अकस्सवर्णे दीर्घ इत्येतच्छास्त्रजन्यशाब्दबोधीयविषयता ग्राह्या तादृशविषयतावैशिष्ट्यम् अन्यतरत्वे वर्तते। वैशिष्ट्यनियामकः प्रथमः सम्बन्धश्च स्वव्यापकतावच्छेदकत्वरूपः अत्र स्वं अकस्सवर्णे दीर्घ इत्येतच्छास्त्रजन्यशाब्दबोधीयविषयता तद्व्यापकतावच्छेदकत्वम् अन्यतरत्वेऽस्ति एवमेव स्वव्यापकतावच्छेदकधर्मविशिष्टभिन्नत्वमपि अन्यतरत्वे वर्तते। अत्र स्वव्यापकतावच्छेदको धर्मः अन्यतरत्वं तद्वैशिष्ट्यञ्च धर्मे स्वव्यापकत्वस्वभिन्नत्वोभयसम्बन्धेन ग्राह्यम्। अत्र स्वम् अन्यतरत्वं तद्व्यापकत्वम् अन्यतमत्वे वर्तते एवमेव स्वम् अन्यतरत्वं तद्भिन्नत्वमपि अन्यतमत्वे वर्तते इति स्वव्यापकत्व-स्वभिन्नत्वोभयसम्बन्धेन स्वव्यापकतावच्छेदकधर्मविशिष्टो धर्मोऽन्यतमत्वरूपो धर्मः तद्भिन्नत्वमन्यतरत्वेऽस्तीत्यतः अकस्सवर्णेदीर्घ इत्येतच्छास्त्रजन्यशाब्दबोधीय-विषयताविशिष्टधर्मोऽन्यतरत्वरूपो धर्मः तादृशधर्मवद्विषयताकशास्त्रयोः अकस्सवर्णे दीर्घ इत्यनेन शास्त्रेण बाधो भवति। अत्र अन्यतमत्वन्तु अकस्सवर्णे दीर्घ इत्येतच्छास्त्रजन्यशाब्दबोधीयविषयताविशिष्टो धर्मो न भवति। यद्यपि अन्यतमत्वे प्रथमसम्बन्धेन स्वव्यापकतावच्छेदकत्व-सम्बन्धेन तादृशविषयतावैशिष्ट्यं वर्तते किन्तु द्वितीयसम्बन्धेन तादृशविषयतावैशिष्ट्यन्नास्ति। यतोहि द्वितीयसम्बन्धो वर्तते स्वव्यापकतावच्छेकविशिष्टभिन्नत्वम् अत्र हि वैशिष्ट्यनियामकसम्बन्धद्वयं स्वव्यापकत्वं स्वभिन्नत्वञ्च तत्र स्वस्यापि स्वव्यापकत्वपक्षे अकस्सवर्णे दीर्घ अन्यतरत्वे सत्त्वेन इत्येतच्छास्त्रजन्यशाब्दबोधीयविषयताव्यापकतावच्छेदकान्यतरत्वरूपधर्मव्यापकत्वस्य प्रथमसम्बन्धेन स्वव्यापकता-वच्छेदकवैशिष्ट्यस्यान्यतरत्वे सत्वेऽपि स्वभिन्नत्वस्य तत्राभावात् उभयसम्बन्धेन स्वव्यापकतावच्छेदधर्मवैशिष्ट्यस्य अन्यतरत्वेऽभावात् अन्यतमत्वे एव स्वव्यापकतावच्छेदकधर्मवैशिष्ट्यस्य सत्त्वेन तद्भिन्नत्वस्य अन्यतरत्वे सत्त्वात् स्वीयविषयताविशिष्टो धर्मोऽन्यतरत्वरूपधर्म एव भवति नतु अन्यतमत्वरूप इति अन्यतमत्वरूपधर्ममादाय न पूर्वोक्तातिप्रसङ्ग आशङ्कनीयः।

## सन्दर्भग्रन्थसूची


- सिद्धान्तकौमुदी, आचार्यभट्टोजिदीक्षितः सम्पादकः –वासुदेवशर्मा पणशीकरः (1985), मेहरचन्द लक्ष्मणदास, नवदेहली।
- व्याकरणमहाभाष्यम् प्रदीपोद्योतसहितम् – श्रीगुरुप्रसादशास्त्री, 2006, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली।
- व्युत्पत्तिवादः – गदाधर भट्टाचार्यः, सुदर्शनाचार्य विरचित, संपादक – हरेरामत्रिपाठी, राष्ट्रियसंस्कृतसंस्थान, नवदेहली
- व्याकरणमहाभाष्यम् (नवान्हिकम्) - महर्षिः पतञ्जलिः, 19996, श्रीराजस्थानसंस्कृत कॉलेज।
- अष्टाध्यायी – पाणिनी, खेमराज श्रीकृष्णदास, श्रीवेङ्कटेश्व मुद्रालय।
- व्याकरणमहाभाष्यम् - व्याख्याकारश्च श्रीहरिनारायणतिवारी , चौखम्बासंस्कृतभवनम्, वाराणसी।
- शब्दकौस्तुभः–आचार्यभट्टोजिदीक्षितः संपादकः- विन्ध्येश्वरीप्रसाद द्विवेदी, गणपतिशास्त्रिमोकाटे, 1898–1917, चौखम्बा संस्कृत सिरीज सं.2,वाराणसी।
- लघुसिद्धान्तकौमुदी – श्रीमद्विद्वद्वरदाराजाचार्यः, सम्वत्. 2057, गीताप्रेस, गोरखपुर।
- काशिकावृत्तिः – वामनजयादित्यौ, 1890, वनारस।
- महाभाष्यप्रदीपः – श्रीकैयटः, 1995, काशी।
- सिद्धान्तकौमुदी (लक्ष्मीटीका) – सभापतिशर्मोपध्यायः, 1966, मोतीलाल बनारसीदास, वाराणसी।
- वैयाकरणभूषणसारः (शाङ्करीव्याख्यासहितः)- आचार्यशङ्करशास्त्री, 1957, आनन्दाश्रममुद्रालयः।
- लघुविभक्त्यर्थनिर्णयानुशीलनम् - आचार्य भारतभूषण त्रिपाठी, 2010, राष्ट्रियसंस्कृतसंस्थान, लखनऊपरिसरः, लखनऊ।
- अमरकोषः - श्री अमरसिंह, 1997, चौखम्बा संस्कृतप्रतिष्ठानम्, नवदेहली।


********************

*ISSN 2348-7828*

# शिशुपालवधमहाकाव्ये व्यवहारकला नीतिबोधश्च

डॉ. राजकुमार मिश्रः[1]

**शोधसारः**

अस्माकं समस्तं संस्कृतवाङ्मयं व्यवहारकलाप्रदर्शकं नीतितत्त्वप्रबोधकं मानवानां मिथः प्रेमोत्पादकं विश्वकल्याणविभावकं च वर्तते इत्यत्र नास्ति अल्पीयसी सन्देहकणिका। अस्माकं ज्ञानपरम्परायां वैदिकवाङ्मयं स्यादुताहो लौकिकवाङ्मयं सर्वत्रैव मानवमूल्यविधायकानां तत्त्वानां विशालो विचारो विहितो वर्तत एव महर्षिभिर्महाकविभिश्च। लोके आदर्शवतां मानवानां जीवनं विशिष्टमेव भवति, आदर्शमानवानां प्रत्येकमपि क्रियायां विशिष्टं कौशलं विशिष्टा परिपाटी विशिष्टा वा विच्छित्तिर्भवति, येन अपरे मानवाः प्रभाविता भवन्ति महापुरुषवच्च निजजीवने आचरणं कर्तुं चेष्टन्ते। कथितमपि-

**यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।**

**स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते[2]॥**

संसारे मानवादर्शविभावकेषु तत्त्वेषु अन्यतमं तत्त्वं वर्तते व्यवहारकला व्यवहारकौशलं वा नीतितत्त्वं च, प्रस्तूयमानेन शोधपत्रेण महाकविमाधपाणिपल्लवप्रणीते शिशुपालवधमहाकाव्ये बहुत्र वर्णितानाम् अभिव्यक्तानां च व्यवहारकला-नीतिबोधाख्यानां सर्वथा मानवजीवनोपयोगिनां तत्त्वानां विमर्शोऽत्र अभिधेयो वर्तते।

**विषयप्रवर्तनम्**

व्यवहारकलया मानवः शत्रोरपि मानसं प्रवेष्टुम् अर्हति, स्वजीवने दुस्साध्यमपि साध्यं विधातुं शक्नोति। नीतितत्त्वस्य च परिपालनात् सङ्कटादपि मानवः सुरक्षितो भवितुम् अर्हति। अस्माकम् आदर्शमये जीवने व्यवहारकलायाः नीतितत्त्वस्य च ज्ञानं परममावश्यकं वर्तते।

व्यवहारकला तु अस्माकं काव्यशास्त्रे प्रयोजनत्वेन रूपेण स्वीकृता वर्तते। विषयेऽस्मिन् मम्मटभट्ट आह-

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**

**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे[2]॥**

किञ्च राजानककुन्तकोऽपि काव्याद् व्यवहारज्ञानस्य वर्णनं करोति, यथा-

**व्यवहारपरिस्पन्दसौन्दर्यं व्यवहारिभिः।**

**सत्काव्याधिगमादेव नूतनौचित्यमाप्यते[3]॥**

वस्तुतो व्यवहारकलयैव मानवानां चरितस्य बोधो जायते, भगवान् श्रीरामः स्वव्यवहारपाटवेनैव लोकेषु पूज्यते। मम्मटोऽपि वक्ति- 'रामादिवद् वर्तितव्यं न रावणादिवत्'[4]।

काव्यस्य अध्ययनात् मानवेषु अनेके गुणा उत्पद्यन्ते, काव्यादेव गुरुशिष्यमध्ये कीदृशः सम्बन्धः? कीदृशो वा व्यवहारः स्यात्?, पितृपुत्रमध्ये कीदृशो व्यवहारः सम्बन्धो वा स्यात्?, नृपप्रजामध्ये कीदृशः सम्बन्धो व्यवहारो वा स्यात् ? इत्येतेषां विषयाणां बोधो काव्यादेव जायते। एवमेव विविधपरिस्थितौ नीतिसमाश्रयेण विपद्भ्यो जनः कथं मुक्तिं लभते इत्यत्रापि विषये महाकविभिः गभीरो विचारो विहितो वर्तते।

जगत्प्रसिद्धो महाकविर्माघः स्वशिशुपालवधाभिधानमहाकाव्ये विविधप्रसङ्गमाध्यमेन क्वचिद् व्यवहारकलां क्वचित् पुनर्नीतिकलां निरुपितवानस्ति। तत्र व्यवहारकलापक्षः शिशुपालवधमहाकाव्यस्य प्रथमे सर्गे बहुत्र द्रष्टुं शक्यते। प्रथमसर्गे देवराजस्य इन्द्रस्य सन्देशमादाय आगतं नारदमुनिं दृष्ट्वा भगवान् श्रीकृष्णो यथा नारदस्य आतिथ्यं सेवां वा विदधाति तथा यदि लोके लोकैः आचर्येत तर्हि सर्वत्रैव स्वाभाविकप्रेम्णः परिदृश्यमुत्पद्येत।

अतिथिसेवायामस्माकं भावः प्रायेण अद्यत्वे जागरितो न भवति किन्तु भगवान् श्रीकृष्णः स्वचरितमाध्यमेन स्वपक्षतो व्यवहारप्रदर्शनेन लोकान् श्रेष्ठं चरितं शासयति। स्वर्गाद् अवतीर्य नारदो यावत् स्वपदं भुवि न निधत्ते ततः पूर्वमेव भगवान् श्रीकृष्णः स्वपीठात् नारदस्य स्वागताय उत्तिष्ठति-

---

[1] सहाचार्यः, साहित्यविभागः।हरियाणासंस्कृतविद्यापीठम्, बघौला,पलवलम्, हरियाणा।

[2] श्रीमद्भगवद्गीता, अध्याय 3, श्लोकसंख्या 21

[3] काव्यप्रकाशः, प्रथमोल्लासः, का.सं. 2

[4] वक्रोक्तिजीवितम्, प्रथमोन्मेषः, का.सं.4

**पतत्पतङ्गप्रतिमस्तपोनिधिः पुरोऽस्य यावन्न भुवि व्यलीयत।**

**गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः[1] ॥**

ये जनाः कृतपुण्या भवन्ति तेषां गृहं गन्तुं मनीषिणः सदैव स्पृहयालवो भवन्ति, इति भावः इत्थं द्रष्टुं शक्यते-

**तमर्घ्यमर्घ्यादिकयाऽऽदिपूरुषः सपर्यया साधु स पर्यपूपुजत्।**

**गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः[2] ॥**

अतिथिसेवायां स्वकर्तव्ये मनागपि विलम्बो न विधेयः, विलम्बेन विहिते आतिथ्ये प्रेम्णि स्वाभाविकता नानुमीयते। द्वारिकावासिनो भगवन्तं श्रीकृष्णं मुनिं नारदं च यावन्न पश्यन्ति ततः पूर्वमेव भगवान् श्रीकृष्णो नारदं स्वहस्तदत्ते आसने उपवेशयति-

**न यावदेतावुदपश्यदुत्थितौ जनस्तुषाराञ्जनपर्वताविव।**

**स्वहस्तदत्ते मुनिमासने मुनिश्चिरन्तनस्तावदभिन्यवीविशत्[3] ॥**

जीवने जनः कियानपि सुधीः स्यात् यदि तेन विनम्रता आश्रीयते तर्हि मणिकाञ्चनसंयोग एव। भगवान् श्रीकृष्णो यद्यपि कर्तव्याकर्तव्यविषयं ज्ञातुं स्वयमेव समर्थः तथापि स आदराद् उद्धवं बलरामं च परामृशति। ताभ्यां परामर्शग्रहणात् पूर्वं स्वमनोभावमित्थं प्रकटयति-

**भवद्गिरामवसरप्रदानाय वचांसि नः।**

**पूर्वरङ्गः प्रसङ्गाय नाटकीयस्य वस्तुनः[4] ॥**

उपर्युक्ते पद्ये भगवान् श्रीकृष्णो मनसि चिन्तयति यत् परामर्शग्रहणात् प्राक् मदुक्तं वचनम् उद्धवबलरामौ क्वचिद् अधिकं न मन्येयाताम्, एतदर्थं स्वविनम्रतां प्रदर्शयति। यद् भवतोः गिरामेव अवसरं प्रदातुं मम वचांसि तथैव सन्ति यथा नाटकीयस्य वस्तुनो विस्ताराय पूर्वरङ्गो विधीयते।

अग्रे श्रीकृष्ण उद्धवबलरामौ प्रति वक्ति यद् एककालावच्छेदेन कार्यद्वयस्य करणीयता वर्तते। युधिष्ठिरस्य यज्ञः शिशुपालस्योपरि चाक्रमणमिति कार्यद्वयमधुनैव विधेयम्, अतस्तयोर्द्वयोः किं करणीयं किं वोपेक्षणीयम्? इत्यत्र निर्णेतुं साम्प्रतमहं न समर्थः। भगवान् श्रीकृष्णोऽमुना प्रसङ्गेन स्वचरितमाध्यमेन लोकान् उपदिशति यद् विषमे काले अथवा सन्देहावसरे आत्मीया जनाः प्रष्टव्या आश्रयणीया वा। सन्दर्भेऽस्मिन् श्रीकृष्णस्य विनम्रता द्रष्टव्या-

**मम तावन्मतमिदं श्रूयतामङ्ग! वामपि।**

**ज्ञातसारोऽपि खल्वेकः सन्दिग्धे कार्यवस्तुनि[5] ॥**

व्यवहारकाले मितभाषणं श्रेयस्करं भवति बहुजल्पनं सदैव परपीडकं भवति, इति बोधः श्रीकृष्णस्य व्यवहारेण ज्ञायते-

**यावदर्थपदां वाचमेवमादाय माधवः।**

**विरराम महीयांसः प्रकृत्या मितभाषिणः[6] ॥**

महाकवेर्माघस्य मतमस्ति यज्जनेन सदैव उन्नतये प्रयासः करणीयः, स्वसम्पदा न जातु सन्तुष्टिः कर्तव्या। यो हि स्वसम्पदा सन्तुष्टो भवति तस्य उन्नतये विधिरपि मौनमाश्रयते। यतोहि विधिरपि तस्य सन्तोषतो विचारयति यद् एतस्य कृते मया अग्रे किमपि न करणीयम्-

**सम्पदा सुस्थिरम्मन्यो भवति स्वल्पयाऽपि यः।**

**कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य ताम्[7] ॥**

मानिभिः स्वोन्नतितः प्राग् विघ्नरूपस्य शत्रोर्नाशो विधेयो भवति, नोचेत् तस्य उन्नतिः अस्थायिनी स्यादिति विचारं नीतिं वा महाकविर्माघः इत्थं प्रकटयति-

**समूलघातमघ्नन्तः परान्नोद्यन्ति मानिनः।**

**प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः[8] ॥**

शत्रुपक्षस्य नाशं विना महाजनः प्रतिष्ठां न लभते यथा जलं स्वोपरि विराजमानधूलिं पङ्कीकृत्य स्वच्छतारूपां प्रतिष्ठां लभते-

---

[1] काव्यप्रकाशः, प्रथमोल्लासः, पृ.सं.11

[2] शिशुपालवधम्, प्र.स. श्लो.सं.12

[3] शिशुपालवधम्, प्र.स. श्लो.सं.14

[4] शिशुपालवधम्, प्र.स. श्लो.सं.15

[5] शिशुपालवधम्, द्वि.स. श्लो.सं.8

[6] शिशुपालवधम्, द्वि.स. श्लो.सं.12

[7] शिशुपालवधम्, द्वि.स. श्लो.सं.13

[8] शिशुपालवधम्, द्वि.स. श्लो.सं.32

**विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा।**

**अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते[1] ॥**

अस्माकं जीवनगतिः प्रतिपदं रूपं परिवर्तयति, कस्यचित् कोऽपि सखा कदा शत्रुर्भवति कोऽपि न जानाति। संसारे मित्रमपि अपकरोति शत्रुरपि अपकरोति, तर्हि अस्यां परिस्थितौ जनः स्वजीवनगतिं कथं केन वा सह अग्रे सारयेदिति विषये महाकविर्माघः स्वमतं स्थापयति-

**उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा।**

**उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः[2] ॥**

अर्थाद् उपकारस्य कर्त्रा शत्रुणा सह सन्धिः कर्तव्यः, अपकारस्य कर्त्रा मित्रेण सह सन्धिर्न विधेयः। यतोहि मित्रता शत्रुता च उपकारापकारयोरुपरि एव नियता निर्भरा वा वर्तते।

क्षमा सर्वस्य भूषणमस्ति इति तु शास्त्रे प्रतिपादितमेव परन्तु कस्मिंश्चिद् अवसरविशेषे क्षमायाः त्यागोऽपि कर्तव्यो भवति, इति महाकविमाघस्य आशयः-

**अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः।**

**पराक्रमः परिभवे वैयात्यं सुरतेष्विव[3] ॥**

सदा जीवने कोमलता नाश्रयणीया विशेषतः शत्रुभिः साकमुदारता न वरीयसी-

**तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत्।**

**हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम्[4] ॥**

पद्यस्य भावोऽयं यत् सूर्यस्य चन्द्रमसश्च तुल्योऽपराधः तथापि राहुः सूर्यं विलम्बेन ग्रसते चन्द्रं च शीघ्रमेव।[5] यतोहि चन्द्रे कोमलताधिक्यं वर्तते तस्मादेव कारणाद् राहुस्तं द्रुतमेव ग्रसते, अतः जनैः आवश्यकताधिका कोमलता न दर्शनीयेति भावः।

**निष्कर्षः**

इत्थं द्रष्टुं शक्यते यन्महाकवेर्माघस्य काव्ये व्यवहारकलायाः अनेके सन्दर्भा नीतितत्त्वपालनस्य अनेके सन्दर्भाश्च प्रकरणवशाच्चित्रिता वर्तन्ते। यदि अस्माभिः स्वजीवने एताद्दशानां तत्त्वानां पालनं विधीयते तर्हि समाजे समन्तात् सांमञ्जस्यं स्थापयितुं वातावरणं च प्रीतिपूर्णं रचयितुं शक्यते, एवमेव विविधसमस्याभ्यो मुक्तिरपि लभ्यते। इत्यलं पल्लवितेन।

## सन्दर्भग्रन्थाः


1 शिशुपालवधम् (महाकविमाघविरचितम्), हिन्दीव्याख्याकारः डॉ. केशवराव मुसलगाँवकरः, प्रकाशकः चौखम्भासंस्कृतभवनम्, वाराणसी, प्रथमं संस्करणम् वि. सं. 2055

2 काव्यप्रकाशः(मम्मटकृतः), व्याख्याकारः आचार्यः विश्वेश्वरः, प्रकाशकः ज्ञानमण्डल लिमिटेड, वाराणसी, संस्करणम् 1998

3 वक्रोक्तिजीवितम्, (राजानककुन्तककृतम्) व्याख्याकारः श्री राधेश्याममिश्रः, प्रकाशकः चौखम्भा संस्कृतसंस्थानम्, वाराणसी, संस्करणम् वि.सं. 2064

4 श्रीमद्भगवद्गीता(व्यासविरचिता) टीकाकारः जयदयाल गोयन्दका, प्रकाशकः गीताप्रेस गोरखपुरम्, संस्करणम् सं. 2079


*********************

[1] शिशुपालवधम्, द्वि.स. श्लो.सं.33

[2] शिशुपालवधम्, द्वि.स.श्लो.सं.34

[3] शिशुपालवधम्, द्वि.स. श्लो.सं. 37

[4] शिशुपालवधम्, द्वि.स. श्लो.सं.44

[5] शिशुपालवधम्, द्वि.स. श्लो.सं. 49

*ISSN 2348-7828*

# प्राचीन-भारतीय-राजशास्त्रस्य वर्तमान-राजनीतौ प्रासङ्गिकता

श्री ओंकार चन्दः[1]


**शोधसारः**

मानव-संघटनस्य यावन्ति रूपाणि उपलब्धानि सन्ति तेषु राज्यस्य संघटनं सर्वाधिकं महत्त्वपूर्णम् अस्ति। राजनैतिकं संघटनम् एव सा आधारशिला अस्ति यस्यां सामाजिकजीवनस्य भव्यः प्रासादः स्थातुं शक्यते। प्राचीन-भारतस्य कस्याश्चित् अन्यसंस्थायाः विषये तावती सैद्धान्तिक-परिकल्पना कदाचित् न कृता स्यात् यावती राज्य-संघटनस्य विषये जाता। ऋग्वेदात् आरभ्य गुप्तकालपर्यन्तं प्राचीनेतिहासस्य प्रत्येकं युगे राज्यस्य संस्था विचारकाणां ध्यानं स्वं प्रति आकृष्टवती। प्राचीन-भारतीय-विचारधारायां नियमपालनं, न्यायः, सुरक्षा, जनकल्याणम् एव राज्यव्यवस्था आसीत्। राज्यस्य उत्पत्त्याः सन्दर्भे आधुनिकैः राजनीतिज्ञैः अनेके सिद्धान्ताः प्रतिपादिताः सन्ति परन्तु तेषु बहवः सिद्धान्ताः प्राचीन-भारतीय-राज्यव्यवस्थायां विद्यमानाः सन्ति। प्राचीन-राज्यव्यवस्थायाः ऐतिहासिकः आदर्शः अद्यापि उपयोगी भवितुं शक्यते यदि तस्य अध्ययनं मननं विश्लेषणं व्यवहारे आनयनं च सम्यक् भवेत्। परञ्च भारतस्य वर्तमान-राजनैतिक-चिन्तकानाम् इयं विडम्बना वर्तते यत् ते वैदेशिक-चिन्तकानाम् आधारेण एव भारतस्य राजनीतेः विश्लेषणं कुर्वन्ति। तस्य पृष्ठे कदाचित् पाश्चात्य-विद्वद्भिः प्रतिपादिता इयं भ्रान्त-धारणा अपि प्रभाविनी स्यात् यत् प्राचीनकाले भारतीयानां विचारकाणां दृष्टिः धर्मशास्त्रे आध्यात्मवादे च केन्द्रिता आसीत्। यद्यपि याथार्थ्यम् एतत् अस्ति यत् भारतस्य राजनैतिकेतिहासः यूरोपस्य अपेक्षया अधिकः प्राचीनः। वस्तुतः प्राचीन-भारते राजनैतिक-चिन्तनस्य सन्दर्भे यूरोपीय-विचारकाणां भ्रामक-धारणायाः कारणम् एतदपि अस्ति यत् ते प्राचीन-भारतीय-साहित्ये राजशास्त्रस्य पृथक् ग्रन्थान् अन्विष्टवन्तः, परञ्च अत्र स्थितिः सर्वथा भिन्ना आसीत्। अस्माकं मनीषिणः राजनीतिं मनुष्यस्य दैनिक-जीवनस्य अङ्गरूपेण प्रतिपादितवन्तः। राजनैतिक-क्रियाः एव व्यक्ति-समाज-राज्यानां नियमनं कुर्वन्ति। भारतीय-विद्वांसः व्यक्तेः नैसर्गिक-व्यवहाराय प्रधानतां प्रदत्तवन्तः। ते मानवीयाचरणं विविधानां कथानाम् उदाहरणानां माध्यमेन प्रदर्शयन्तः राज्यस्य समाजस्य च आदर्श-व्यवस्थानां निरूपणं कृतवन्तः। प्राचीनं भारतीय-चिन्तनम् एतदेव प्रतिपादयति यत् राज्यं, व्यक्तिः, समाजः इति त्रयाणां समन्वितः विकासः उत्कर्षः च कथं भवेत्। भारतीया राज्यव्यवस्था अपि अत्रत्यसंस्कृतिवत् प्राचीना अस्ति। प्राचीने भारतीयसाहित्ये राज्यव्यवस्था राजधर्म-राजनीति-राजशास्त्र-दण्डनीति-नीतिशास्त्र-अर्थशास्त्र-इत्यादिभिः शब्दैः व्यवहृता। प्राचीन-भारते प्रचलितायाः शासनपद्धत्याः वर्णनं वेद-ब्राह्मणग्रन्थ-धर्मसूत्र-धर्मशास्त्र-उपनिषद्-पुराण-रामायण-महाभारतादिषु ग्रन्थेषु प्राप्यते। एतदतिरिच्य मनुस्मृतौ, कौटिल्यस्य अर्थशास्त्रे, नीतिशास्त्रे तत्कालीन-मानवजीवनस्य सम्पूर्णक्षेत्राणां यथा राज्यं, समाजः, राजा, शासनं, न्यायव्यवस्था, करव्यवस्था, परराष्ट्रसम्बन्धादीनां परिचयः मिलति। संस्कृतसाहित्यस्य अनेके ग्रन्थाः यथा कालिदासस्य रघुवंशम्, विशाखदत्तस्य मुद्राराक्षसम् , भारवेः किरातार्जुनीयम् , माघस्य शिशुपालवधम् इत्यादयः प्राचीन-भारतीयशासनपद्धतिं राजनीतेः सारं च बोधयन्ति।


भारतीयराजनीतेः या परिकल्पना अद्यत्वे दृश्यते सा पुरा सम्भवतः नैव आसीत्, यतोहि स कालः नृपाणां प्रजानां च आसीत्। अतः राज्ञां प्रजानां च कर्तव्यानि, कूटनीतेः प्रयोगः, राज्यस्य संचालनाय मन्त्रिणां दायित्वानि, राष्ट्रं सर्वोपरि इत्यादयः सन्दर्भाः आधुनिक-राजनीतौ अपि प्रेरणादायकाः सन्ति। राज्यस्य संचालनाय राजा भवेत्। राजविहीनस्य राज्यस्य कल्पना बहुकठिना। राजा गौरवास्पदपदे प्रतिष्ठितः भवति। तस्मिन् देवानाम् अंशाः विद्यमानाः भवेयुः, स पराक्रमी बलशाली च भवेत्। एतत् सर्वं मनसि निधाय कालिदासेन स्वकीयासु कृतिषु राज्यस्य नेतृणां नृपाणां च आदर्शरूपं प्रस्तुतम्। राजा प्रजायाः रञ्जकः भवति स्म। स पुत्रवत् प्रजायाः पालनं करोति स्म - **'प्रजाः प्रजाः स्वा इव तन्त्रयित्वा'**[2], **प्रवर्ततां प्रकृतहिताय पार्थिवः**[3] तपोवननिवासिनां तेषां यज्ञानां च रक्षणं राज्ञां कर्तव्यं भवति स्म- **'राजरक्षितव्यानि तपोवनानि नाम'**[4] अभिज्ञानशाकुन्तलनाटकस्य प्रारम्भे वैखानसः राजानं दुष्यन्तं तपोवनमागन्तुं निमन्त्रयन् कथयति-

**रम्यास्तपोधनानां प्रतिहितविघ्नाः क्रियाः समवलोक्य।**
**ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति ॥**[5]

उपर्युक्तेन विवेचनेन ज्ञायते यत् आधुनिककाले अपि यावत् पर्यन्तं जननायकाः नेतारः ग्रामं नगरं च न गमिष्यन्ति तावत् तत्रत्यं विकासं जनमानसं च कथं ज्ञास्यन्ति। सूर्यवंशिनृपाणां चरित्रं कालिदासेन आदर्शरूपेण प्रदर्शितम्-

**ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।**
**गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥**[6]
**आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।**
**आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥**[7]

एतादृशाः चरित्रयुक्ताः जननायकाः सामाजिकाश्च अधुना अपि समाजे महत् परिवर्तनम् आनेतुं शक्नुवन्ति। सुशासनस्य सन्दर्भे अपि उक्तमस्ति यत् राज्ञः दिलीपस्य प्रजाः मनुमहाराजेन निर्मितस्य संविधानस्य आचारपद्धतेः च उल्लङ्घनं न कृतवत्यः।

**रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्।**

---

[1] आचार्यः (साहित्यम्),राजकीयसंस्कृतमहाविद्यालयः, सोलन, (हि. प्र.)।
[2] 5.5 अभिज्ञानशाकुन्तलम्
[3] 7.35 अभिज्ञानशाकुन्तलम्
[4] अभिज्ञानशाकुन्तलम् साहित्यभण्डार- प्रकाशकः पृष्ट 72
[5] 1.12अभिज्ञानशाकुन्तलम्
[6] 1.22 रघुवंशम्
[7] 1.15 रघुवंशम्

**न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥**[1]

अधुनापि भारतीयसंविधानानुगुणं यदि सर्वे आचरणं करिष्यन्ति तर्हि राष्ट्रवैभवं सहजरूपेण भविष्यति। एवं कालिदासस्य साहित्ये सर्वे राजानः प्रजाकल्याणे प्रवृत्ताः दृश्यन्ते। काव्यस्य सुकुमारे कलेवरे राजनीतेः कूटनीतेश्च सर्वादौ वर्णनं भारविना कृतम्। प्रथमसर्गात् एव राजनीतेः प्रावीण्यं पदे पदे परिलक्ष्यते। शठे शाठ्यं समाचरेत् इत्यस्य सिद्धान्तस्य वर्णनं भारविना सुन्दरतया कृतम्।

**व्रजन्ति मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।**
**प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः ॥**[2]

युधिष्ठिरं युद्धाय प्रेरयन्ती द्रौपदी राजनीतेः सारम् एकस्मिन् श्लोके बोधितवती-

**न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः।**
**अरिषु हि विजयार्थिनः क्षितीशा विदधाति सोपधि संधिदूषणानि ॥**[3]

अर्थात् यदा शत्रवः निरन्तरम् अपकारपरायणा एव भवन्ति तदा प्रचुरप्रतापशालिना केनापि नृपेन शासकेन वा समयपरिपालनं नोचितम्। यतोहि विजयाभिलाषिणः राजानः शत्रु-विषये सन्धिविघटनं केनापि छद्मना कुर्वन्ति। राज्ञाम् अमात्यादीनां परस्परसम्बन्धः एव राज्यसम्पदः वर्धयति, राज्ये च सुशासनं स्थापयति। अतः उक्तमपि अस्ति-

**स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संश्रृणुते स किं प्रभुः।**
**सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ॥**

अर्थात् यः मन्त्री सखा सेवको वा शासकाय हितं न उपदिशति स दुर्मन्त्री, कुसखा, कुसेवकः वा अस्ति। यश्च हितोपदेष्टुः साधुः वचनं न श्रृणोति, सोऽपि कुराजा एव। एवम् आधुनिककाले अपि मन्त्रिणां प्राशासनिकाधिकारिणां परस्परसम्बन्धः जनकल्याणाय भवति। प्रजायाः विश्वासं जेतुं राजसिंहासने उपविष्टः नृपः शासकः वा विपक्षेभ्यः शङ्कितो भूत्वा संविधानानुसारं शासनं करोति। अस्मिन् एव प्रसङ्गे दुर्योधनस्य सन्दर्भे भारवेः उक्तिः अस्ति-

**कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना।**
**विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ॥**[4]

दुर्योधनः काम-क्रोध-मोह-लोभ-मद-मत्सरान् अन्तःशत्रून् विजित्य विनम्रः सन् सामान्यजनैः अलभ्यस्वरूपां मनुना उपदिष्टां शासनपद्धतिं प्राप्तुम् इच्छुः निरलसः, रात्रौ एवं कर्तव्यं दिवसे एवम् इति स्वकार्याणां विभागं कृत्वा नीतिपूर्वकं प्रजासु आनुकूल्यं कुर्वन् अस्ति। राजनीतौ अपराधिनां दण्डनं राज्ञः धर्मः भवति। अयमेव अभिप्रायः अत्र प्रस्तूयते-

**वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः।**
**गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम् ॥**[5]

वशीकृतेन्द्रियः स दुर्योधनः केनापि लोभेन क्रोधाविष्टो वा न कमपि दण्डयति। क्रोधलोभादिकारणैः रहितः सन् 'राज्ञो मम एषः धर्म एव यत् दण्ड्यानां दण्डनम् अदण्ड्यानां क्षमाकरणं ' इति मत्वा शत्रुर्वा भवेत्पुत्रो वा, तमपि शास्त्रोक्तरीत्या दण्डयित्वा अधर्मात् निवारयति।

अनेन प्रकारेण किरातार्जुनीये महाकाव्ये दुर्योधनस्य उत्तमा राजनैतिक-व्यवस्था, राज्ञः कर्तव्यं, धार्मिकता, गुप्तचरव्यवस्था, युद्धनीतिः, सैन्यव्यवस्थादीनां सुन्दरं वर्णनम् अस्ति। यत् आधुनिकसमये अपि राजनीतिज्ञानां कृते राजनीतौ नैपुण्यम् अत्यावश्यकम् अस्ति। शिशुपालवधे राज्ञः वैशिष्ट्यम् अनेन प्रकारेण प्रतिपादितम् अस्ति-

**बुद्धिशस्त्रः प्रकृत्यंगो घनसंवृतिकञ्चुकः।**
**चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः ॥**[6]

बुद्धिरूपशस्त्रयुक्तः, कौटिल्यानुसारं राजा, मन्त्री, जनपदः, दुर्गः, कोषः, दण्डः, मित्रम् इत्येतैः राज्यस्य सप्तभिः अङ्गैः युक्तः, मन्त्रगुप्तिरूप-घनकवचयुक्तः, गुप्तचररूप-नेत्रयुक्तः, दूतरूपमुखश्च राजा कश्चन विशिष्टः पुरुषः भवति। अस्मिन् श्लोके राजनीतेः यः सारः माघेन प्रस्तुतः सः अधुनापि राजनीतिज्ञानां कृते अक्षरशः पालनयोग्यः वर्तते। यथा बौद्धानां पञ्च स्कन्धान् रूप-वेदना-विज्ञान-संज्ञा-संस्कारान् अतिरिच्य आत्मा नास्ति, तथैव राज्ञः पञ्च अङ्गानि कार्यारम्भस्य उपायः, कार्यसिद्धौ अपेक्षित-सामग्र्याः सञ्चयः, देशकालस्य उचितं ज्ञानम्, विपत्प्रतीकारस्य उपायः, कार्यसिद्धिः इत्येतानि विहाय अन्यः मन्त्रः नास्ति।[7] राम-राज्यम्, आदर्शराजा रामश्च अद्यापि जनेभ्यः सत्प्रेरणां ददाति, इत्यस्य उदाहरणं वयम् उत्तररामचरिते पश्यामः, यत्र प्रजानुरञ्जनाय समस्तं सुखं स्नेहं दयां प्राणाधिकां प्रियां पत्नीमपि त्यक्तुं सिद्धो भवति-

**स्नेहं दयां सौख्यं च यदि वा जानकीमपि।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥**[8]

---

[1]1.17 रघुवंशम्
[2]1.30 किरातार्जुनीयम्
[3]1.45 किरातार्जुनीयम्
[4]1.09 किरातार्जुनीयम्
[5]1.13 किरातार्जुनीयम्
[6]2.82 शिशुपालवधम्
[7]2.28 शिशुपालवधम्
[8]1.12 उत्तररामचरितम्

धर्मात् न प्रमदितव्यम् इति राजगुरूणामपि राज्ञां कृते स्पष्टः उपदेशः भवति स्म। राज्ञः कर्तव्यं प्रजारक्षणमेव इति तत एव भविष्यति वास्तविकं भवतां यशः। अतः अष्टावक्रस्य माध्यमेन वसिष्ठस्य रामाय आदेशः अस्ति-

**जामातृयज्ञेन वयं निरुद्धास्त्वं बाल एवासि नवं च राज्यम्।**
**युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत्परमं धनं वः ॥**[1]

राज्ञा अपरिहीन-धर्मेण भवितव्यम्[2] अर्थात् सः धर्माघातं न सहेत। प्रजासु नृपस्य वस्तुस्थितिं ज्ञातुं गुप्तचराणां नियुक्तिः करणीया[3] इति तु अद्यत्वेऽपि दृश्यते।

कूटनीतिं राजनीतिञ्च आश्रित्य विशाखदत्तेन मुद्राराक्षसं नाटकं निर्मितम्, यस्मिन् चाणक्यः नन्दवंशं नाशयित्वा चन्द्रगुप्तमौर्यं राजसिंहासने उपवेशयति। नन्दस्य स्वामिभक्तेन मन्त्रिणा राक्षसेन कूटनीति-कुशलतया मन्त्रिपदं स्वीकारयति। तस्य कथनम् अस्ति **'अगृहीते राक्षसे किमुत्खातं नन्दवंशस्य'**[4]अतः राक्षसस्य वशीकरणमेव नाटकस्य फलम्। चाणक्यस्य राजनीतेः परिचयं कविः सरलैः शब्दैः करोति यत् भाग्यचक्रवत् राजनीतिज्ञानां नीतिः विचित्रा भवति-

**मुहुर्लक्ष्योद्भेदा मुहुरधिगमाभावगहने**
**मुहुः सम्पूर्णाङ्गी मुहुरतिकृशा कार्यवशतः।**
**मुहुर्नश्यद्बीजा मुहुरपि बहुप्रापितफले-**
**त्यहो चित्रकारा नियतिरिव नीतिर्नयविदः ॥**[5]

पूर्वं राजानः कुलक्रमागताः भवन्ति स्म। अर्थात् राज्ञः पुत्र एव राजा भवति स्म। यौवराज्याभिषेकात् पूर्वं तेन वेदादिशास्त्राणाम् अध्ययनं कृत्वा राजनीतिशास्त्रे नैपुण्यं प्राप्तव्यं भवति स्म। यस्य वर्णनं कादम्बर्याः शुकनासोपदेशे मिलति, यदा मन्त्री शुकनासः चन्द्रपीडं कथयति- **तात चन्द्रापीड! विदितवेदितस्य अधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति।** राजानः अपि आश्रम-व्यवस्थायाः पालनं कुर्वन्ति स्म। ते वार्धक्यात् पूर्वं स्वपुत्रस्य राज्याभिषेकं कृत्वा वानप्रस्थाश्रमाय गच्छन्ति स्म। अर्थात् मृत्युपर्यन्तं ते राजसत्तायाः उपभोगं न कुर्वन्ति स्म। यथा इक्ष्वाकुवंशीयानां राज्ञां सन्दर्भे कालिदासेन अपि उक्तम्- **वार्द्धक्ये मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्**[6]मन्त्रि-सेवकादीनां नियुक्तिः अपि कुलक्रमेण भवति स्म। प्रधानमन्त्रिणः एतदपि उत्तरदयित्वं भवति स्म यत् युवराजपदे राजकुमारे अभिषिक्ते सति सः अन्यायं न कुर्यात् तदर्थं तस्मै व्यवहारिकं ज्ञानमपि दीयते स्म। यतोहि **अतिगहनं यौवनप्रभवं तमः, लक्ष्मीमदः अपरिणामोपशमः दारुणः, दर्पदाहज्वरोष्मा अशिशिरोपचारहार्यः अतितीव्रः,राज्यसुख-सन्निपात-निद्रा अजस्रम् अक्षपावसान-प्रबोधा घोरा भवति।**[7]अतः शुकनासः चन्द्रापीडं राज्यस्य व्यवहारिकं पक्षं बोधयति यत्- **गर्भेश्वरत्वम् अभिनवयौवनत्वम् अप्रतिमरूपत्वम् अमानुषशक्तित्वञ्च इति इयं खलु महती अनर्थपरम्परा। एषाम् एकैकम् अपि सर्वाविनयानाम् आयतनं किमुत समवायः। अहंकार-दाहज्वर-मूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः। अलीकाभिमान-उन्मादकारीणि धनानि, राज्यविषविकारतन्द्राप्रदा राजलक्ष्मीः। एवं विधयापि च अनया दुराचारया कथमपि दैववशेन परिगृहीताः विक्लवाः भवन्ति राजानः सर्वाविनयाधिष्ठानतां च गच्छन्ति।**[8]एतादृशी शिक्षा मदान्ध-सत्ताधारिणां कृते यथा तदा आवश्यकी आसीत् तथैव आधुनापि वर्तते। यतोहि सत्तारूढे सति बहूनां मनसि विकाराः उत्पद्यन्ते। राजनीतेः अनेकरूपतायाः प्रतिपादनं भर्तृहरिणा कृतम् अस्ति-

**सत्याऽनृता च परुषा प्रियवादिनी च**
**हिंस्रा दयालुरपि चार्थपरा वदान्या।**
**नित्यव्यया प्रचुरनित्यधनागमा च**
**वाराङ्गनेव नृपनीतिरनेकरूपा ॥**[9]

अर्थात् राजनीतिः वेश्या इव कदाचित् सत्यवादिनी, कदाचित् असत्यवादिनी , कदाचित् कठोरभाषिणी, कदाचित् मधुरभाषिणी, कदाचित् क्रूरा, कदाचित् दयायुक्ता, कदाचित् धनपरायणा, कदाचित् दानशौण्डा, कदाचित् नित्यव्यया, कदाचित् प्रचुरनित्यधनागमा बहुरूपा भवति। साम्प्रतमपि राजनीतिज्ञानाम् एषा एव स्थितिः दृश्यते। भर्तृहरेः अनुसारं षड्गुणान्वितैः राजभिः भवितव्यम्–

**आज्ञा कीर्तिः पालनं ब्राह्मणानां**
**दानं भोगो मित्रसंरक्षणं च।**
**येषामेते षड्गुणा न प्रवृत्ताः**
**कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥**[10]

अर्थात् हे राजन्! येषां राज्ञां शासनं, यशः, ब्राह्मणानां रक्षणं, दानं, ऐश्वर्योपभोगः, सुहृज्जनरक्षणञ्च एते षड्संख्याकाः गुणाः न भवन्ति, तेषां राज्ञां सेवनेन कः लाभः? राजनेतृणाम् इमे गुणाः अधुनापि युक्तिसंगताः प्रतीयन्ते। राज्ञा प्रजापालनम् एव कर्तव्यम्। प्रजापालनेन एव

---

[1] 1.11 उत्तररामचरितम्
[2] (तृतीयाङ्कः) उत्तररामचरितम्
[3] (प्रथमाङ्कः) उत्तररामचरितम्
[4] (प्रथमाङ्कः) मुद्राराक्षसम्
[5] 5.3मुद्राराक्षसम्
[6] 1.08 रघुवंशम्
[7] (शुकनासोपदेशः) कादम्बरी
[8] (शुकनासोपदेशः) कादम्बरी
[9] 47 नीतिशतकम्
[10] 48 नीतिशतकम्

पृथ्वी कल्पलता इव अनेकविधफलं निष्पादयति।[1] राजतरंगिण्यां काश्मीरस्य राज्ञां वास्तविकः इतिहासः महीकविना कल्हणेन वर्णितः अस्ति। यस्याः वर्ण्यः विषयः तेन अनेन प्रकारेण प्रतिपादितः-

**इयं नृपाणामुल्लासे ह्रासे वा देशकालयोः।**
**भैषज्यभूतसंवादिकथा युक्तोपयुज्यते॥[2]**

अर्थात् मया रचितः अयम् इतिहासग्रन्थः विभिन्नानां नृपाणां शासनकाले देशकालयोः उन्नत्याम् अवनत्याञ्च प्राचीन-ग्रन्थेभ्यः उत्पन्नं भ्रमं दूरीकर्तुं सहायकः भविष्यति। कल्हणस्य आदर्श-शासकाः अशोकः, कनिष्कः, मेघवाहनश्च आसन्। अशोकः उदार-सम्राटः, कनिष्कः जनहितैषी, मेघवाहनश्च आदर्शः राजा आसन्। कल्हणः कश्मीरस्य नृपान् शक्तिशालिराष्ट्रस्य राजा मन्यते स्म। यतोहि तत्रत्याः राजानः भारतविजयं दिग्विजयं च प्राप्तवन्तः आसन्। कश्मीरे गणतन्त्रं न आसीत्। तथापि राजा निरंकुशः स्वेच्छाचारी च नासीत्। यदि राजा क्रूरः, अन्यायी, अत्याचारी, दुष्टश्च भवति स्म तर्हि तम् अपसारयितुं प्रजानाम् अधिकारः आसीत्। यतोहि दुष्टः राजा कल्हणस्य दृष्टौ प्रजायाः भाग्य-विपर्ययस्य कारणम् आसीत्। प्रजानां कुकर्म-नैतिकपतन-कायरतादिभिः कारणैः देशे अवांछनीयाः राजानः कार्यं कुर्वन्ति। यथा व्यक्तिः स्वकर्मणां फलम् उपभुङ्क्ते, तथैव प्रजाः अपि उपभुञ्जते। अत उक्तमस्ति-

**काले काले प्रजापुण्यैः संभवन्ति महीभुजः।**
**यैर्मण्डलस्य क्रियते दुरोत्सन्नस्य योजनम्॥[3]**

अर्थात् प्रजानां पुण्यैः समये समये एतादृशाणां नृपाणां जन्म सम्भवति ये अत्यन्तच्छिन्न-भिन्न-राज्यानां योजनं कुर्वन्ति। कर्मगत्या यदि व्यक्तेः रक्षणं न भवितुं शक्यते तर्हि प्रजानां अपि नहि। कल्हणस्य एतदेव राजनीतेः दर्शनम् अस्ति।

प्रजायाः राज्यव्यवस्थायां स्थानम् आसीत्। आवश्यकतायां सत्यां प्रजाः राज्ञः चयनं कुर्वन्ति स्म। कश्मीरस्य प्रजाः सन्धिमतिं स्वनृपत्वेन स्वीकृतवत्यः आसन्।[4] प्रजाः एव गन्धारात् मेघवाहनम् आनीय कश्मीरस्य राजसिंहासने अलङ्कृतवत्यः। प्रजाः एव वक्रं नृपत्वेन चितवत्यः। कल्हणः प्रजाकल्याणाय अत्यधिकः जागरुकः आसीत्। अतः तेन उक्तम्-

**ये प्रजापीडनपरास्ते विनश्यन्ति सान्वयाः।**
**नष्टं तु ये योजयेयुस्तेषां वंशानुगाः श्रियः॥[5]**

अर्थात् ये प्रजा-पीडकाः राजानः भवन्ति ते कुलसहिताः नष्टाः भवन्ति। ये नष्टं राज्यं सुव्यवस्थितं कुर्वन्ति तेषां वंशस्य अनुगामिनी श्रीः भवति। प्रजा-कल्याणस्य सन्दर्भे इतोऽपि उक्तमस्ति-

**जिघांसवः पापकामाः परस्वादायिनश्च शठाः।**
**रक्षांस्यधिकृता नाम तेभ्यो रक्षेदिमाः प्रजाः॥[6]**

कल्हणेन पुरोहितपरिषदः द्विजपरिषदश्च उल्लेखः कृतः अस्ति। द्विजपरिषदः प्रथमः उल्लेखः राज्ञः लवस्य सन्दर्भे कृतोऽस्ति। राज्ञः चयनं परिषद् करोति स्म। उत्पलवंशस्य यदा समाप्तिः जाता तदा कमलवर्धनस्य कथनानुसारं द्विजपरिषद् एकत्रिता अभवत्। कमलवर्धनः स्वयमेव राजा भवितुम् इच्छति स्म। द्विजपरिषद् निश्चयं न कर्तुं शक्तवती। तस्मिन् समये पुरोहितपरिषदा यशस्करः राजा उद्घोषितः।[7] पुरोहित-द्विज-परिषदौ चतुस्सहस्रं वर्षाणि यावत् राज्ञः लवात् आरभ्य कल्हणस्य कालं यावत् दृश्येते। एते द्वे अपि विश्वस्य सर्वाधिके प्राचीने जागरूके शक्तिसम्पन्ने च संस्थे आस्ताम्। कश्मीरस्य तृतीया प्राचीना मन्त्रिपरिषद् आसीत्। मन्त्रि-परिषदः क्षेत्रं राजनैतिकम् आसीत्। परन्तु द्विज-पुरोहित-परिषदोः क्षेत्रं धार्मिकं राजनैतिकं च समयानुसारं भवति स्म। मन्त्रिपरिषदः शक्तिः राजबलम् आसीत्। पुरोहित-द्विज-परिषदोः शक्तिः आध्यात्मिकबलं काश्मीरवासिनां च धर्मभीरुता आसीत्। कश्मीरे प्रजा, मन्त्रिपरिषद्, पुरोहितपरिषद्, अनेकेषु अवसरेषु परस्परं परामर्शं विना एव स्वनिर्णयेन राज्ञः चयनं कुर्वन्ति स्म। उपर्युक्त-राजतरंगिण्याः परिशीलनेन ज्ञायते यत् जागरूका प्रजादेशस्य नेतृत्व-चयने अमूल्यं योगदानं दातुं शक्नोति। राजा भ्रष्टाचारादिषु तदा प्रवृत्ता भवन्ति यदि प्रजा शयनं करोति। अतः राजतरंगिण्याम् उक्ताः विषयाः आधुनिककालेऽपि अनुकरणीयाः सन्ति।

पुरा यदा प्रजावत्सला रामादिनृपाः आसन् तदा तेषां प्रजाः अपि तादृश्यः एव अभवन्। परम् अद्यत्वे यत् स्थाने स्थाने भ्रष्टाचारः, दुराचारः, परस्परं कलहः दृश्यते तस्यापि कारणं नृप एव। सत्यम् उक्तं केनापि विदुषा-

**राज्ञि धर्मिणि धर्मिष्ठाः पापे पापं समे समाः।**
**राजानमनुवर्तन्ते यथा राजा तथा प्रजाः॥**

पुरुषार्थ-चतुष्टयस्य उपलब्धिरपि धर्मात् एव सञ्जायते। प्राचीनकाले ऋषयः महर्षयः राजानश्च धर्मपथानुयायिनः भवन्ति स्म। ये ये राजानः महापुरुषाश्च स्वं स्वं धर्मं न त्यक्तवन्तः तेषाम् अजरम् अमरं च यशः शरीरम् अद्यापि स्थितमस्ति, भविष्यत्काले च स्थास्यति।

---

[1] 46 नीतिशतकम्
[2] 1.21 राजतरंगिणी
[3] 1.187 राजतरंगिणी
[4] 2.116 राजतरंगिणी
[5] 1.188 राजतरंगिणी
[6] 8.86 राजतरंगिणी
[7] 5.456-466 राजतरंगिणी

प्रसङ्गेऽस्मिन् **'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः। तस्मादुत्तिष्ठकौन्तेय युद्धाय कृतनिश्चयः** ॥इत्थं भगवता बहुधा बोध्यमानः अर्जुनः युद्धाय सज्जो बभूव।

प्रत्येकं वर्णाश्रमाणां धर्मः अस्ति यत् ते हिंसक-कर्माणि न कुर्युः, सत्यं वदेयुः, क्षमाशीलाः भवेयुः। स्वधर्मपालनेन मोक्षस्य प्राप्तिः भवति। अतः राज्ञः कर्तव्यम् अस्ति यत् तस्य प्रजाः कुमार्गम् न गच्छेयुः। तादृशः राजा लोके परलोके सुखं प्राप्नोति-

**तस्मात्स्वधर्मं भूतानां राजा न व्यभिचारयेत्।**
**स्वधर्मं संदधानो हि प्रेत्य चेह च नन्दति** ॥[1]
**विद्याविनीतो राजा हि प्रजानां विनये रतः।**
**अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः** ॥[2]

एतादृशस्य धर्मपालक-नृपस्य दण्डभयात् सर्वाः प्रजाः शुभे कर्मणि प्रवर्तन्ते न कदाचित् अशुभे कर्मणि। तदुक्तम्-

**दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति।**
**दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः** ॥[3]
**यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः।**
**शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः** ॥[4]

अर्थात् दण्डभयात् एव सर्वाणि भूतानि अनुशासने तिष्ठन्ति। नृपस्य दण्ड-व्यवस्थया रक्षिताः चत्वारः वर्णाश्रमाः, अखिलः लोकश्च स्वस्वधर्मकर्मसु प्रवृत्ताः भूत्वा मर्यादया तिष्ठन्तिः। उक्तमपि अस्ति-

**चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः।**
**स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्मसु** ॥[5]

**निष्कर्षः**

उपर्युक्त-विवेचनेन ज्ञायते यत् प्राचीनभारते राजनीतिशास्त्रस्य अत्यधिकः विकासः आसीत्। तस्मिन् काले बहुसंख्यकेषु राज्येषु राज्यतन्त्र-प्रणाली प्रचलिता आसीत्। राज्ञः कर्तव्यम् आसीत् यत् स काम-क्रोध-लोभादीन् विजित्य संयमी भूत्वा शास्त्राध्ययनेन ज्ञान-वृद्धिं कृत्वा विना पक्षपातेन वर्णाश्रमस्य पालनं कुर्यात्। राज्याभिषेकस्य समये राजा प्रजापालनस्य प्रतिज्ञां करोति स्म। राजा दिग्विजयं कृत्वा स्वराजनैतिकप्रभुतायाः विस्तारं करोति स्म। राजा स्वेच्छाचारी निरंकुशश्च न भवति स्म। शासनतन्त्रं चालयितुं राजा मन्त्रिणां सहयोगं स्वीकरोति स्म। राज्ञः अधिकारेषु मन्त्रिपरिषदः अंकुशः भवति स्म। राज्यस्य आवश्यकतानुसारं सप्त, अष्ट वा ततोऽपि अधिकाः मन्त्रिणः भवन्ति स्म। सर्वेषु मन्त्रिषु एकः प्रधानमन्त्री अथवा प्रधानामात्यः भवति स्म। शासन-प्रबन्धं चालयितुं कौटिल्येन राजस्वप्राप्तये विभिन्नानां स्रोतसां विस्तृतं वर्णनं कृतम् अस्ति। मनुस्मृतौ अपि कर-व्यवस्थायाः विस्तृतं विवरणं प्राप्यते। शासनस्य विभिन्नकार्यवत् युद्धव्यवस्थायाः अपि पर्याप्तं वर्णनं मिलति। सेनायाः चत्वारि अङ्गानि भवन्ति स्म। रथ-अश्व-गज-पदातिभिः सम्पन्ना सेना चतुरङ्गिणी कथ्यते स्म। न्यायव्यवस्थायाः दण्डनीतेश्च विस्तृतं स्वरूपं विविधेषु ग्रन्थेषु दृष्टिगोचरं भवति। किन्तु न्याय-दण्डयोः या व्यवस्था स्मृतिकारैः प्रस्तुता सैव भारतीयपरम्परायां प्रामाणिका ग्रहणीया च मन्यते। कौटल्येन विधेः चत्वारि चरणानि स्वीकृतानि- धर्मः, व्यवहारः, चरित्रं, राजशासनम्। एतेषु राजशासनं सर्वोपरि घोषितम्। कतिपयेषु स्थानेषु गणतन्त्रमपि पर्याप्तं प्रसिद्धम् आसीत्। यस्य उल्लेखः राजतरंगिण्यां बाहुल्येन प्राप्यते। शासनाय जनताद्वारा निर्वाचितः सदस्यः राजा कथ्यते स्म। तस्य सभा परिषद् कथ्यते स्म। यद्यपि गणतन्त्रात्मिका शासन-प्रणाली राज्यतन्त्रेण सह अवश्यं प्रचलिता आसीत् तथापि राज्यतन्त्रस्य प्रभुत्वमेव अधिकम् आसीत्। परन्तु आधुनिकसमये राज्यतन्त्रस्य स्थानं गणतन्त्रेण स्वीकृतम्। जनाः निर्वाचनेन स्वजननायकं चिन्वन्ति। तेषु जननायकेषु राज्यस्तरे कश्चन एकः मुख्यमन्त्री केन्द्रस्तरे एकः प्रधानमन्त्री भवति। अन्ये केचन शासनं चालयितुं मन्त्रिणः भवन्ति। प्रजारक्षणस्य यत् दायित्वं पूर्वं राज्ञः आसीत् तत् दायित्वम् अधुना मुख्यमन्त्रिणः अथवा प्रधानमन्त्रिणः अस्ति। अन्ये मन्त्रिणः तु पूर्ववत् सहयोगिनः सन्ति। अधुना शासनं भारतीयसंविधानानुसारं चलति, तदा मन्वादिभिः निर्मितानां नियमानाम् अनुसारं चलति स्म। अन्या कर-दण्ड-न्याय-सेना-गुप्तचरादीनां व्यवस्था तु समाना एव दृश्यते। शासनं चालयितुं विभागानाम् अधिकारिणां व्यवस्था अपि पूर्ववत् एव दृश्यते। अतः वक्तुं शक्यते यत् प्राचीन-भारतीय-राजशास्त्रस्य वर्तमानराजनीतौ प्रासङ्गिकता वर्तते।

*********************

[1]प्रथम-अधिकार 3.16 कौटिलीय अर्थशास्त्रम्
[2]प्रथम-अधिकार 5.18 कौटिलीय अर्थशास्त्रम्
[3]15 शान्तिपर्व महाभारतम्
[4]7.20 मनुस्मृतिः
[5]प्रथम-अधिकार 4.19 कौटिलीय अर्थशास्त्रम्

*ISSN 2348-7828*

# शाब्दबोधस्याङ्गानि

डॉ. श्यामसुन्दरशर्मा[1]

**शोधसारः**

न्यायशास्त्रे चत्वारि प्रमाणानि स्वीकृतानि। तानि च 01. प्रत्यक्षम् 02. अनुमानम् 03. उपमानम् 04. शब्दश्चेति।[2] तत्र इन्द्रियैः साक्षात्पदार्थविषयकं यज्ज्ञानं जायते तत्प्रत्यक्षम्। न्यायशास्त्रे इन्द्रियं द्विविधम् - आन्तरिकं बाह्यञ्चेति। तत्र आन्तरिकमिन्द्रियं 'मनः', बाह्येन्द्रियाणि च चक्षु-त्वक्-रसना-घ्राण-श्रोत्राणि पञ्च। तदनुरोधेन प्रत्यक्षविषया अपि द्विविधाः भवन्ति। तथा हि सुखदुःखाद्यान्तरिक-विषयाः, घटपटादिबाह्यविषयाश्च। आन्तरिकेन्द्रियेण आन्तरिकविषयाणाम्, बाह्येन्द्रियैश्च बाह्यविषया-णां ज्ञानं भवति। प्रत्यक्षप्रमाणेन जायमानस्य ज्ञानस्य नाम भवति 'प्रत्यक्षम्'। येषां पदार्थानां ज्ञानं प्रत्यक्षेण न भवति। तेषां परोक्षपदार्थानां ज्ञानम् अनुमानप्रमाणेन भवति। अनुमानप्रमाणेन जायमानस्य ज्ञानस्य नाम भवति 'अनुमानम्'। अथ च येषां पदार्थानां ज्ञानं न वा प्रत्यक्षेण न वा अनुमानेन भवति, तेषामतिपरोक्षपदार्थानां ज्ञानं शब्दप्रमाणेन भवति। शब्दप्रमाणेन जायमानस्य ज्ञानस्य नाम भवति 'शाब्दबोधः'।

**कुञ्जिशब्दाः** – शाब्दबोधः, व्याकरणम्, प्रमाणानि, दर्शनम्, प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दप्रमाणम्।

**शाब्दबोधकारणानि -**

नैयायिकाः शाब्दबोधं प्रति पदज्ञानस्य करणत्वेन, पदार्थज्ञानस्य व्यापारत्वेन, वृत्तिज्ञानस्य सहकारिकारणत्वेन च कारणत्वं स्वीकुर्वन्ति। तथा हि कारिकावल्यां विश्वनाथः - **"पदज्ञानं तु करणं, द्वारं तत्र पदार्थधीः। शाब्दबोधः फलं तत्र, शक्तिधीः सहकारिणी।।"**[3] अत्र शक्तिधीरित्यनेन वृत्तिर्गृह्यते।

**पदज्ञानम् -**




(आरेखः - 01)

पदज्ञानं नाम श्रोत्रेन्द्रियेण शब्दरूपपदश्रवणम्। शब्दः कण्ठताल्वाद्यभिघातरूपः। तेन ग्रन्थे लिखितलिपिं दृष्ट्वा यो बोधो जायते, स न शाब्दबोधः, अपि तु अनुमानमेव; तत्र कण्ठताल्वाद्यभि-घाताभावात्।

**पदार्थज्ञानम्** - तत्र पदार्थज्ञानं नाम वृत्त्या पदज्ञानजन्यपदार्थोपस्थितिः। प्रत्यक्षादिना पदार्थोपस्थितिसत्त्वेऽपि शाब्दबोधस्यानुत्पत्तिरेव पदजन्यपदार्थोपस्थित्यभावात्। घटादिपदेन समवायसंबन्धद्वारा आकाशस्यापि उपस्थितिर्जायते 'एकसंबन्धिज्ञानमपरसंबन्धिनं स्मारयति' इति न्यायेन। परं स न शाब्दबोधे भासते, तस्याकाशस्य घटपदवृत्त्यानुपस्थितत्वात्, वृत्तिभिन्नसंबन्धान्तरेण तस्योपस्थितत्वात्। एवञ्च शाब्दबोधं प्रति वृत्त्या पदजन्यपादार्थोपस्थितिः कारणम्।

[1] सहायकाचार्यः, संस्कृतविभागः, देशबन्धुमहाविद्यालयः, देहलीविश्वविद्यालयः, देहली।

[2] 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि', न्यायसूत्रम्, 1-1-3.

[3] न्यायसिद्धान्तमुक्तावल्यी, शब्दखण्डः कारिका-1.

**शाब्दबोध: -** 'आप्तोपदेश: शब्द:'[1] इति न्यायसूत्रप्रमाणेन शब्दस्य प्रामाण्यमवगम्यते। शब्दो नाम 'वाक्यम्'। अत्र 'उपदिश्यतेऽनेन इति उपदेश' इति करणघञन्तव्युत्पत्त्या उपदेशो नाम वाक्यमिति वाचस्पति-मिश्रा: ।[2] एतदेवाभिप्रेत्य तर्कसङ्ग्रहे 'आप्तवाक्यं शब्द:'[3] इत्युक्तम्। आप्तो नाम क: इति जिज्ञासायामुच्यते न्यायभाष्यकारेण 'आप्त: खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा। साक्षात्करणमर्थस्याप्ति:, तया प्रवर्तत इत्याप्त:' ।[4] एतदेवाभिप्रेत्य तर्कसङ्ग्रहे 'आप्तो नाम यथार्थ-वक्ता'[5] इत्युक्तम्।

शब्दाज्जात: = शाब्द:। 'शाब्दश्चासौ बोधश्च' शाब्दबोध इति कर्मधारयसमास:। तदेवं शाब्दबोधो नाम शब्दाज्जायमानो वाक्यार्थबोध:। वाक्यघटकीभूतानि यानि पदानि, तदर्थानां परस्परं संबन्धस्य ज्ञानमित्यभिप्राय:।

शाब्दबोधसोपानानामयं क्रम: 01. पदश्रवणम् 02. पदवृत्तेरनुभव: 03. पदवृत्ते: संस्कार: 04. पदवृत्ते: स्मृति: (पदार्थोपस्थिति:) 05. शाब्दबोध:। यथा - 'घटम् आनय' इत्यत्र आदौ पदानां श्रवणम्।तत: घटपदं घटे शक्तम्। 'अम्'पदं कर्मत्वे शक्तम्। 'आनी'धातुरानयने शक्त:। आख्यातप्रत्यय: कृतिकालसंख्यासु शक्त इति शक्तिस्मरणम्। तत: 'घट'पदेन कम्बुग्रीवादिमत: पदार्थस्य, 'अम्'पदेन कर्मत्वपदार्थस्य, 'आनी'धातुत आनयनानुकूलव्यापाररूपपदार्थस्य, आख्यातपदेन च कृति-काल-संख्यारूपाणां पदार्थानां स्मृतिर्जायते। तत: 'घटकर्मकानयनानुकूलवर्तमानकालीनकृतिमान् एकत्वविशिष्ट:' इति शाब्दबोधो भवति।

**पदार्थोपस्थितौ सहकारिकारणानि -**

**वृत्ति: -** वृत्तिशब्द: नानाशास्त्रेषु नानार्थे प्रयुज्यते। तथा हि - लोके तावत् वृत्तिशब्द: जीविकार्थे प्रयुज्यते। तथैवाष्टाध्याय्यामपि 'जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपना-कृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु'[6] इत्यस्मिन् सूत्रे भगवता पाणिनिना वृत्तिशब्द: जीविकार्थे प्रयुक्त:। अद्वैतवेदान्तशास्त्रे तावत् 'अन्त:करणपरिणामो वृत्ति'पदवाच्यो भवति।[7] योगशास्त्रे सांख्यशास्त्रे च चित्तस्य अवस्थाविशेषो वृत्ति:। यथा - 'योगश्चित्तवृत्तिनिरोध:'[8], 'वृत्तिनिरोधात्तत्सिद्धि:'[9] इत्यत्र सूत्रे वृत्तिपदेन प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयश्चित्तस्यावस्था-विशेषा:[10] गृह्यन्ते। वैयाकरणेषु तावत् 'सूत्रस्यार्थविवरणं वृत्ति:'। महाभाष्ये 'का पुनर्वृत्ति:? शास्त्रप्रवृत्ति:'[11] इत्यत्र वृत्तिशब्द: शास्त्रप्रवृत्तौ प्रयुक्त:। अलङ्कारशास्त्रे तावत् 'रसव्यञ्जकेषु कैशिकीसात्वत्यादिषु'[12] वृत्तिशब्द: प्रसिद्ध:। न्यायशास्त्रे तावत् 'निष्ठत्वसंबन्धार्थे' गृह्यतेऽसौ वृत्तिशब्द:।

अत्रेदं ब्रूम: - पदपदार्थयो: संबन्ध: वृत्तिपदवाच्यो भवतीति मतं तु सर्वशास्त्रसाधारणम्। स एवात्रार्थोऽभिमतो विविच्यते। वृतु वर्तने धातु:। तत: क्तिन् प्रत्यय:। वर्तते = प्रवर्तते (शब्दोऽर्थे) अनया इति वृत्ति:, करणे क्तिन्।[13] अथ वा 'वर्तते अस्मिन्' इति 'वृत्ति:' अधिकरणे क्तिन्। अथ वा 'वर्तनं वृत्ति:' भावे क्तिन् इति। वर्तनाद्वृत्ति:। पदं हि येन व्यापारेण स्वीयमर्थं बोधयति स व्यापारो वृत्ति:। शाब्द-बोधानुकूलार्थोपस्थितिहेतु: पदपदार्थयो: सम्बन्धो नाम वृत्ति:।[14] पदनिरूपितवृत्ति: अर्थे, अर्थनिरूपित-वृत्तिश्च पदे तिष्ठति। तथैव गदाधर: शक्तिवादे "वृत्त्या पदप्रतिपाद्य एव पदार्थ इत्यभिधीयते" इति।[15]

नैयायिका: शाब्दिकाश्च शाब्दबोधं प्रति पदज्ञानस्य वृत्तिज्ञानस्य च कारणत्वं स्वीकुर्वन्ति। परं नैयायिका: पदज्ञानवृत्तिज्ञानयोर्भिन्नरूपेण कारणत्वमामनन्ति।

अत्र शाब्दबोधं प्रति करणत्वेन पदज्ञानस्य कारणता, सहकारिकारणत्वेन च वृत्तिज्ञानस्य कारणता। इत्थम्प्रकारेण शाब्दबोधं प्रति पदज्ञानवृत्तिज्ञानयोर्भिन्नरूपेण कारणत्वमिति नैयायिका:। शाब्दिकास्तावत् पदज्ञानविशिष्टवृत्तिज्ञानस्य कारणत्वं स्वीकुर्वन्ति। शाब्दिकसंसारे नास्ति करणत्वव्यापारत्वयो: संकल्पना। यथा श्रीमन्नागेश: लघुमञ्जूषायां भणति[16] - **"तद्धर्मावच्छिन्नविषयक-शाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतु:"**। एतावत्पर्यन्तं वृत्तेर्लक्षणमुक्तम्।

इदानीं न्यायशास्त्रे वृत्तिपदवाच्य: क:? इति विविच्यते। न्यायशास्त्रे तावद्वृत्ति: नाम पदपदार्थ-संबन्ध:। स च द्विविध: शक्ति: लक्षणा च। शक्तिरीश्वरेच्छारूपा। **सा चेच्छा द्वेधा। पदप्रकारिका अर्थविशेष्यिका, अर्थप्रकारिका पदविशेष्यिका** चेति। इयमेव इच्छा सङ्केत:।

---

1 न्यायसूत्रम् 01-01-07.

2 वाचस्पतिमिश्र:, न्यायभाष्यतात्पर्यव्याख्या, 01-01-07. पृष्ठसंख्या- 201.

3 तर्कसङ्ग्रह:, शब्दखण्ड: ।

4 वात्स्यानभाष्यम्, 01-01-07.

5 तर्कसङ्ग्रह:, शब्दखण्ड: ।

6 पाणिन्यष्टाध्यायी 4-1-42

7 "चैतन्यस्यानादित्वेऽपि तदभिव्यञ्जकान्त:करणवृत्तिरिन्द्रियसन्निकर्षादिना जायत इति वृत्तिविशिष्टं चैतन्यमादिमादिमदित्युच्यते
ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचार: । तदुक्तं विवरणे "अन्त:करणवृत्तौ ज्ञानत्वोपचारात्" इति", वेदान्तपरिभाषा, पृ. 15

8 योगसूत्रम्, 01.

9 सांख्यसूत्रम्, 03/31.

10 पातञ्जलयोगसूत्रम्, 08.

11 व्याकरणमहाभाष्यम्, 1.1.1

12 शृङ्गारे कैशिकी, वीरे सात्वत्यारभटी पुन: ।
रसे रौद्रे च बीभत्से वृत्ति: सर्वत्र भारती । । साहित्यदर्पण:, 6/122.

13 'वृत्तिश्च शब्दस्य तात्पर्यरूपमर्थप्रतिपादकत्वम्', श्रीव्यासतीर्थ:, तर्कताण्डवम्, द्वितीयपरिच्छेदे, पृष्ठसंख्या- 110.

14 'शाब्दबोधानुकूलार्थोपस्थित्यनुकूल: पदपदार्थयो: सम्बन्ध: शक्तिलक्षणान्यतरा वृत्ति:', शक्तिवादमञ्जूषाव्याख्या, पृष्ठसंख्या- 04.

15 शक्तिवाद:, सामान्यकाण्डम्, पृष्ठसंख्या- 04.

16 लघुमञ्जूषा, शक्तिप्रकरणम्,

ISSN 2348-7828

न्यायशास्त्रे शक्तिः, इच्छा, सङ्केतः इति समानार्थकपदानि। तदुक्तं गदाधरेण शक्तिवादे - **“इदं पदमिममर्थं बोधयतु’ इति ‘अस्माच्छब्दादयमर्थो बोधव्यः’ इति वेच्छा सङ्केतरूपा वृत्तिः”** ।[1]

**वृत्तिभेदाः** - वृत्तेर्विभागः कः? इति जिज्ञासामादायोच्यते “सा च वृत्तिः, सङ्केतः लक्षणा चेति द्विविधा”।[2] तत्र सङ्केतो नाम ‘अस्माच्छब्दादयमर्थो बोधव्यः’ इत्याकारा ‘इदं पदमिममर्थं बोधयतु’[3] इत्याकारा वेच्छा। एतादृशः सङ्केत आधुनिकसङ्केतः नित्यसङ्केतश्चेति द्विधा। तत्र आधुनिकपुरुषाणां सङ्केतः परिभाषेत्युच्यते। परिभाषया अर्थबोधकं पदं पारिभाषिकमित्युच्यते। यथा - व्याकरणतन्त्रे गुण-वृद्धि-नदी-घु-सर्वनाम-सर्वनामस्थान-कर्तृ-कर्म-करण-कारकादीनि पदानि पाणिनिना सङ्केतितानि। न्याय-वैशेषिकतन्त्रे तावत् द्रव्य-गुण-कर्म-सामान्यादयः कणादगौतमाभ्यां सङ्केतिताः।




आरेखः-02 (वृत्तेर्भेदाः)

**शक्तिः** - तत्र शक्तिः कः पदार्थः? इत्युच्यते - आधुनिकसङ्केतः नित्यसङ्केतश्चेति सङ्केतो द्विधा। तत्र आधुनिकसङ्केतः व्याख्यातः। इदानीं नित्यसङ्केतो व्याख्यायते। नित्यसङ्केतो नाम ‘ईश्वरसङ्केतः’ सैव शक्तिरित्युच्यते। तथा चाह गदाधरः शक्तिवादे **“ईश्वरसङ्केतः शक्तिः”**।[4] शक्त्या चार्थबोधक-पदं शक्तमित्युच्यते।[5] तदेव हि पदं वाचकमित्यप्युच्यते। यथा - घटपटादि पदानि। तेन शक्तपदेन बोध्यार्थो ‘वाच्यः’ इत्युच्यते। पदनिरूपिता शक्तिः अर्थे तिष्ठति, अर्थनिरूपिता शक्तिश्च पदे तिष्ठति। विश्वनाथपञ्चाननभट्टाचार्या अपि वदन्ति “शक्तिश्च पदेन सह पदार्थस्य संबन्धः। सा चास्मात्पदा-दयमर्थो बोधव्य इतीश्वरेच्छारूपा।”[6] नागेशेन “अत्र तार्किकाः - ‘अस्माच्छब्दादयमर्थो बोधव्यः’ इत्याकारा ‘इदं पदमिममर्थं बोधयतु’ इत्याकारा वेश्वरेच्छा शक्तिः, लाघवात्। सैव सङ्केतः संबन्धः” ।[7]

तार्किका ईश्वरेच्छारूपां शक्तिं स्वीकुर्वन्ति। इच्छा हि द्विविधा। प्रथमं तावत् ‘अस्मात् पदात् अयम् अर्थो बोधव्यः’ इति। अत्र अस्मात् = घटादिपदात्, अयम् = जात्याकृतिविशिष्टव्यक्तिरूपः कम्बुग्रीवादिमान् पदार्थः, बोद्धव्यः = बोधविषयो भवेदिति।

‘अस्मात् पदात्’ इत्यनयोः समाना विभक्तिः = पञ्चमी। तथा च समानैकवचनकत्वात् विशेष्यविशेषणभावस्तेन ‘इदमभिन्नपदात्’ इति। तथैव ‘अयम् अर्थः’ इत्यत्रापि विशेष्यविशेषणभावो ज्ञातव्यस्तेन ‘इदमभिन्नार्थः’ इति। नैयायिकाः प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधं स्वीकुर्वन्ति। एतेन ‘अस्मात् पदात् अयम् अर्थो बोधव्यः’ अत्र प्रथमान्तपदम् ‘अर्थः’ इति पदम्। अतः पूर्वोक्तवाक्ये पदं विशेषणम्, अर्थः विशेष्यः। तस्मादत्र ‘पदप्रकारिका अर्थविशेष्यिका इच्छा’ इति वाक्यार्थो भवति।

---

1 शक्तिवादः, सामान्यकाण्डः, पृष्ठसंख्या- 3.

2 शक्तिवादः, सामान्यकाण्डः, पृष्ठसंख्या- 1.

3 न्यायकौस्तुभः, पृष्ठसंख्या- 549.

4 ईश्वरसङ्केतः शक्तिः. तया चार्थबोधकं पदं वाचकं यथा - गोत्वादिविशिष्टबोधकं गवादिपदं तद्बोध्योऽर्थः गवादिर्वाच्यः । शक्तिवादः, सामान्यकाण्डः, पृष्ठसंख्या- 3.

5 शक्तिवादः, सामान्यकाण्डः, पृष्ठसंख्या- 3.

6 न्यायसिद्धान्तमुक्तावल्यी, (किरणावलीयुतः), पृष्ठसंख्या- 293.

7 परमलघुमञ्जूषा, शक्तिनिरूपणम्, पृष्ठसंख्या- 23.

'अस्मात् पदात्' इत्यत्र सन्निकृष्टार्थपरामर्शस्य इदम्पदार्थस्य 'पदात्' इत्यस्य पदपदार्थेन 'पदात्' इत्यत्र नैयायिकमते पदद्वयं 'पदम्' 'पञ्चमीविभक्तिश्च'। पदादित्यत्र विभक्त्यर्थं परित्यज्य सह अभेदान्वय: तेन इदमभिन्नपदमिति। 'पदात्' इत्यस्य लक्षणया पदज्ञानादित्यर्थ:। पदपदोत्तरपञ्चम्या: जन्यत्वमर्थ:। प्रकृत्यर्थस्य (पदपदार्थस्य) निरूपितत्वसंबन्धेन प्रत्ययार्थे (जन्यत्वे) अन्वय:। जन्यत्वस्य च 'बोद्धव्य:' इत्यस्यैकदेशे 'बुध' धात्वर्थे बोधे आश्रयत्वसंबन्धेन अन्वय:। 'बुध'धात्वर्थबोधस्य च निरूपितत्वसंबन्धेन कर्मणि विहितस्य तव्यत्प्रत्ययार्थस्य विषयत्वरूपार्थेऽन्वय:। विषयत्वस्य च स्वरूपसंबन्धेन अर्थपदार्थे अन्वय:। सर्वमाहत्य 'इदमभिन्नपदनिरूपितजन्यताशालिबोधनिरूपित-विषयतावानयमर्थ:' इति। संक्षेपेण 'इदम्पदजन्यबोधविषयतावानर्थ:' इति वाक्यार्थ:। तेन **पदप्रकारिका-अर्थविशेष्यिका-इच्छा** इति फलितार्थ:। नैयायिकसम्प्रदाये इच्छाया एवापरं नाम शक्ति:।

द्वितीयस्तावत् 'इदं पदम्, इमम् अर्थं बोधयतु'। 'इदं पदम्' इत्यनयो: समाना विभक्ति: प्रथमा। समानैकवचनत्वाद्विशेष्यविशेषणभाव:, तेन 'इदमभिन्नपदम्'। तथैव 'इमम् अर्थम्' इत्यनयो: समाना विभक्ति: द्वितीया। तथा च समानैकवचनकत्वाद्विशेष्यविशेषणभावस्तेन 'इदमभिन्नार्थम्' इति। नैयायिका: प्रथमार्थमुख्यविशेष्यकशाब्दबोधं स्वीकुर्वन्ति। एतेन 'इदं पदम्, इमम् अर्थं बोधयतु' अत्र प्रथमान्तपदम् 'पदम्' इति। अतोऽत्रार्थ: विशेषणम्, पदं विशेष्यम्। अत: **'अर्थप्रकारिका-पदविशेष्यिका-इच्छा'** इति वाक्यार्थ:।

अत्र इदम्पदार्थस्य अर्थपदार्थे अभेदेन अन्वय:, अर्थपदार्थस्य च अम् इति प्रत्ययार्थविषयतायां निष्ठत्वसंबन्धेनान्वय:, विषयत्वस्य च निरूपकत्वसंबन्धेन बुधधात्वर्थबोधेऽन्वय:, बोधस्य च निरूपितत्वसंबन्धेन जनकत्वरूपे णिजर्थेऽन्वय:, जनकत्वस्य च निरूपितत्वसंबन्धेन पदपदार्थे आश्रयत्वेनान्वय:। सर्वमाहत्य 'इदमर्थनिष्ठविषयतानिरूपकबोधनिरूपितजनकतानिरूपिताश्रयतावद्-इदम्पदम्' इति। संक्षेपेण 'इदमर्थविषयकबोधजनकं पदम्' इति 'अर्थप्रकारिका-पदविशेष्यिका-इच्छा' इति 'इदं पदम्, इमम् अर्थं बोधयतु' एतस्य वाक्यार्थ:।

**शक्तिविषये प्राच्यनव्यमतभेद:**

प्राचीना ईश्वरेच्छैव शक्तिरिति वदन्ति। अतस्तन्मते आधुनिकसङ्केतितपदेषु शक्तिर्न भवति। शक्तिभ्रमेण वा परिभाषया वा तानि पदानि अर्थबोधकानि भवन्ति। नव्यास्तु इच्छामात्रं शक्तिरिति वदन्ति। अत आधुनिकसङ्केतितपदेष्वपि शक्तिरस्त्येवेति तेषां वाद:।

**शक्तिभेदा:** - विश्वनाथेन न्यायसिद्धान्तमुक्तावल्यां यौगिक-रूढ-योगरूढ-यौगिकरूढ: इतिभेदेन शक्तपदस्य चतुर्विधत्वप्रतिपादनेन शक्तेश्चातुर्विध्यं सूचितम्। यथा - "शक्तं पदम्। तच्चतुर्विधम्। क्वचिद्यौगिकम्, क्वचिद्रूढम्, क्वचिद्योगरूढं क्वचिद्यौगिकरूढम्।"[1] परं व्याकरणशास्त्रे तावत् त्रिविधमेव प्रतिपादितम्। तथा हि - लघुमञ्जूषायां नागेश: - "शक्तिस्त्रिधा रूढिर्योगो योगरूढिश्च।"[2]

**लक्षणा** - नैयायिकै: 'शक्यसम्बन्धो हि लक्षणा' इति स्वीकृत्य तात्पर्यानुपपत्तिर्लक्षणाबीजमिति कथ-यन्ति। यथा 'गङ्गायां घोष:' इत्यत्र गङ्गापदस्य प्रवाहरूपशक्यार्थे सम्बद्धस्तीररूपोऽर्थो बोध्यते। अतोऽत्र गङ्गापदेन तीरस्य स्मरणं भवति। तत्पश्चाच्च 'गङ्गातीरे घोष:' इति शाब्दबोधो जायते। अत्र गङ्गापदार्थस्य घोषपदार्थेन सहान्वयाभावात् गङ्गापदस्य गङ्गाप्रवाहसम्बद्धतीरस्य बोधो भवति। अतोऽत्रान्वयानुपपत्त्या लक्षणा जायते। परं सर्वत्रान्वयानुपपत्तिर्न लक्षणाया: बीजम्। यतो हि 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र काकेभ्यो दधिरक्षणसम्भवेनान्वयो भवितुमर्हति। परञ्चात्र सर्वेभ्यो दध्युपघात-केभ्यो विडालादिभ्यो रक्षणे तात्पर्यमतोऽत्रापि तात्पर्यानुपपत्तिर्लक्षणाबीजं मन्यते। यथोक्तम् - **"लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तित:"[3]**

**लक्षणाभेदा:**- लक्षणा द्वेधा जहत्स्वार्था लक्षणा अजहत्स्वार्था लक्षणा चेति। तत्र **'जहति पदार्था: स्वार्थं यस्यां सा जहत्स्वार्था लक्षणा'** इति। जहत्स्वार्था लक्षणा तु 'गङ्गायां घोष:' इत्यत्र वर्तते। यतो हि गङ्गापदस्य भगीरथरथखातावच्छिन्नप्रवाहरूपेऽर्थे अन्वयेन तत्र घोषासम्भवाद्गङ्गापदं स्वार्थं परित्यज्य तीरपदं लक्षयति। **'न जहति पदार्था: स्वार्थं यस्यां सा अजहत्स्वार्था लक्षणा'** इति। तेन 'यष्टी: प्रवेशय' इत्यत्र यष्टिभि: सह यष्टिधारिणां पुरुषाणामपि प्रवेशो भवति। एवं 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र काकै: सह स र्वदध्युपघातकानां जीवानां ग्रहणेनात्र अजहत्स्वार्था लक्षणा। एवं च 'छत्रिणो यान्ति' इत्यादीन्युदाहारणानि।

**शाब्दबोधे सहकारिकारणानि** - पदै: वृत्या पदार्थोपस्थित्यनन्तरमाकाङ्क्षादिसहकारिकारणवशात्परस्परं पदार्थान्वयो भवति। तस्मात्तान्यपि कारणानि भवन्ति - **"आसत्तिर्योग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते"**[4]। आसत्तिश्च योग्यता च आकाङ्क्षा च तात्पर्यज्ञानञ्चेति शाब्दबोधे चत्वारि सहकारिकारणानि। तत्र प्रतियोग्यनुयोगिपदयोरव्यवधानमासत्ति:, तज्ज्ञानं शाब्दबोधे कारणमिति। तथैवोक्तम् 'सन्निधानं तु पदस्य

---

[1] न्यायसिद्धान्तमुक्तावल्यी, (किरणावलीयुत:), पृष्ठसंख्या- 315.
[2] लघुमञ्जूषा, पृष्ठसंख्या- 105.
[3] न्यायसिद्धान्तमुक्तावल्यी, (किरणावलीयुत:), पृष्ठसंख्या- 319.
[4] न्यायसिद्धान्तमुक्तावल्यी, (किरणावलीयुत:), पृष्ठसंख्या- 339.

आसत्तिरुच्यते'।[1] एवं तत्र 'एकपदार्थे अपरपदार्थसंबन्धो योग्यता' तज्ज्ञानं शब्दबोधे कारणमिति। तज्ज्ञानाभावात् 'वह्निना सिञ्चति' इत्यादौ न शाब्दबोधः। अपि च तत्र 'येन पदेन विना यत्पदस्य अन्वय-अननुभावकत्वं, तेन पदेन सह तस्याकाङ्क्षा'।[2] तेन गौरश्वः पुरुषो हस्तीत्यत्र न शाब्दबोधः। तथा च तत्र 'वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्'।[3] तेन 'सैन्धवमानय' इत्यादौ प्रस्थानकाले वक्तुरुच्चरितस्य सैन्धवपदस्य अश्वार्थबोधः। भोजनकाले वक्तुरुच्चरितस्य सैन्धवपदस्य लवणार्थबोधः। तेन वक्तुः तात्पर्यवशात् क्वचिदश्वस्य क्वचिल्लवणस्य बोधो भवति।

उपसंहारः -

नैयायिकाः शाब्दबोधं प्रति पदज्ञानस्य करणत्वेन, पदार्थज्ञानस्य व्यापारत्वेन, वृत्तिज्ञानस्य सहकारिकारणत्वेन च कारणत्वं स्वीकुर्वन्ति। पदज्ञानं नाम श्रोत्रेन्द्रियेण शब्दरूपपदश्रवणम्। तत्र पदार्थज्ञानं नाम वृत्त्या पदज्ञानजन्यपदार्थोपस्थितिः। शाब्दबोधो नाम शब्दाज्जायमानो वाक्यार्थबोधः। पदार्थोपस्थितौ सहकारिकारणानि वृत्तिः शाब्दबोधानुकूलार्थोपस्थितिहेतुः पदपदार्थयोः सम्बन्धो नाम वृत्तिः। स च द्विविधः शक्तिः लक्षणा च। शक्तिरीश्वरेच्छारूपा। सा चेच्छा द्वेधा। पदप्रकारिका अर्थविशेष्यिका, अर्थप्रकारिका पदविशेष्यिका चेति। इयमेव इच्छा सङ्केतः। न्यायशास्त्रे शक्तिः, इच्छा, सङ्केतः इति समानार्थकपदानि। तदुक्तं गदाधरेण शक्तिवादे - "इदं पदमिममर्थं बोधयतु' इति 'अस्माच्छब्दादयमर्थो बोधव्यः' इति वेच्छा सङ्केतरूपा वृत्तिः"। प्राचीना ईश्वरेच्छैव शक्तिरिति वदन्ति। नव्यास्तु इच्छामात्रं शक्तिरिति वदन्ति। यौगिक-रूढ-योगरूढ-यौगिकरूढः इतिभेदेन शक्तपदस्य चतुर्विधत्वप्रतिपादनेन शक्तेश्चातुर्विध्यं सूचितम्। यथा - "शक्तं पदम्। तच्चतुर्विधम्। क्वचिद्यौगिकम्, क्वचिद्रूढम्, क्वचिद्योगरूढं क्वचिद्यौगिकरूढम्।" परं व्याकरणशास्त्रे तावत् त्रिविधमेव प्रतिपादितम्। तथा हि - "शक्तिस्त्रिधा रूढिर्योगो योगरूढिश्च।" लक्षणा द्वेधा जहत्स्वार्था लक्षणा अजहत्स्वार्था लक्षणा चेति। तत्र 'जहति पदार्थाः स्वार्थं यस्यां सा जहत्स्वार्था लक्षणा' इति। अथ च 'न जहति पदार्थाः स्वार्थं यस्यां सा अजहत्स्वार्था लक्षणा' इति। आसत्तिश्च योग्यता आकाङ्क्षा तात्पर्यज्ञानञ्चेति शाब्दबोधे चत्वारि सहकारिकारणानि। तत्र प्रतियोग्यनुयोगिपदयोरव्यवधानमासत्तिः, एवं तत्र 'एकपदार्थे अपरपदार्थसंबन्धो योग्यता' अपि च तत्र 'येन पदेन विना यत्पदस्य अन्वय-अननुभावकत्वं, तेन पदेन सह तस्याकाङ्क्षा'। तथा च तत्र 'वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्'। एवम्प्रकारेण शब्दबोधस्याङ्गानि स्वीकर्तव्यानि भवन्तीति।

## सन्दर्भग्रन्थसूची


1. अन्नम्भट्टः. तर्कसङ्ग्रहः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, 2003.अमरसिंहः, अमरकोशः, चौखम्बाविद्याभवनम्, वाराणसी, 2015.
2. उपाध्यायः, गिरिधरः. विभक्त्यर्थनिर्णयः, चौखम्बासंस्कृतसीरीज, वाराणसी, 1902.
3. कामाख्यानाथ-तर्कवागीशः (सम्पादकः), गंगेशोपाध्यायः, तत्त्वचिनतामणिः (शब्दखण्डः), चौखम्बासंस्कृतप्रतिष्ठानम्, वाराणसी, 1990.
4. काविराजः, विश्वनाथः. साहित्यदर्पणः, मोतीलालबनारसीदासः, देहली, 2007.
5. कीर्त्यानन्दः (सम्पादकः), व्युत्पत्तिवादः (गूथार्थतत्त्वलोकसंस्कृतटीकासहितः), चौखम्बाअमरभारतीप्रकाशनम्, वाराणसी, 1976.
6. गौडः, ज्वालाप्रसादः (सम्पादकः), व्युत्पत्तिवादः (शिवदत्तमिश्रकृतदीपिकासंस्कृतटीकासहितः), चौखम्बासुरभारती-ग्रन्थमाला(66), चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, द्वितीयं संस्करणम्, 1983, पुनर्मुद्रितम्, 2010.
7. चतुर्वेदी, गिरिधरशर्मा परमेश्वरानन्दः भास्करश्च, वैयाकरणसिद्धान्तकौमुदी (वासुदेवदीक्षितकृतबालमनोरमा तथा च ज्ञानेन्द्रसरस्वतीकृततत्त्वबोधिनीसंस्कृतव्याख्यासहितः), खण्डानि 01-04, मोतीलालबनारसीदासः, देहली, 1958-61.
8. त्रिपाठी, ब्रह्मशङ्करः (सम्पादकः), भवानन्दः कारकचक्रम्, चौखम्बासंस्कृतसीरीज, वाराणसी, 1942.


[1] न्यायसिद्धान्तमुक्तावल्यी, (किरणावलीयुतः), पृष्ठसंख्या- 339.
[2] न्यायसिद्धान्तमुक्तावल्यी, (किरणावलीयुतः), पृष्ठसंख्या- 348.
[3] न्यायसिद्धान्तमुक्तावल्यी, (किरणावलीयुतः), पृष्ठसंख्या- 351.

9. त्रिपाठी, रामप्रसाद: (सम्पादक:), वैयाकरणसिद्धान्तलघुमञ्जूषा (दुर्लभाचार्यकृतकुञ्चिका, श्रीबालम्भट्टकृतकला, रामप्रसाद-त्रिपाठिकृतसरलाहिन्दीव्याख्यासहितग्रन्थ:), सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:, वाराणसी, 1990.
10. त्रिपाठी, हरेराम: (सम्पादक:), व्युत्पत्तिवाद: (सुदर्शनाचार्यकृतादर्शसंस्कृतटीकासहित:), राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, प्रथमं संस्करणम्, 2011.
11. दहाल:, लोकमणि:. व्याकरणशास्त्रेतिहास:,भारतीयविद्याप्रकाशनम्, 2005.
12. धर्मराजाध्वरीन्द्र, वेदान्तपरिभाषा, चौखम्बासंस्कृतसीरीज्, वाराणसी, 2010.
13. भट्ट:, गदाधर:. शक्तिवाद:, चौखम्बासंस्कृतसीरीज्, वाराणसी, 2010.
14. भट्ट:, नागेश:. परमलघुमञ्जूषा, चौखम्बासंस्कृतसीरीज्, वाराणसी, 2007.
15. मिश्र:, सच्चिदानन्द: (सम्पादक:), व्युत्पत्तिवाद: (सम्पादककृतसुनन्दाहिन्दीव्याख्यासहित:), भारतीय-विद्या-प्रकाशनम्, वाराणसी, प्रथमं संस्करणम्, 2001.
16. योगसूत्रम्, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, 1988.
17. वाचस्पतिमिश्र:, न्यायभाष्यतात्पर्यव्याख्या, चौखम्बासंस्कृतसीरीज्, वाराणसी, 1925.
18. शब्दशक्तिप्रकाशिका (कृष्णकान्ति एवञ्च प्रबोधिनीसंस्कृतटीकासहित:), चौखम्बासंस्कृतसीरीज, वाराणसी, 1934.
19. शर्मा, ईश्वरचन्द्र: (व्याख्याकार:). अष्टाध्यायी (चन्द्रलेखाहिन्दीव्यख्यासहितग्रन्थ:) खण्ड: 01-02, व्रजजीवनप्राच्य-भारती ग्रन्थमाला (103), चौखम्बासाहित्यप्रतिष्ठानम्, वाराणसी, 2008.
20. शास्त्री, वेम्पटिकुटुम्ब: (प्रधानसंपादक:). वैयाकरणभूषणसार: (के.वी.रामकृष्णमाचार्यकृतनृसिंहप्रियासंस्कृत-व्याख्यासहित:), श्रीसोमनाथसंस्कृतविश्वविद्यालय:, वेलावल:, सोमनाथनगरम्, गुजरातराज्यम्, 2015.
21. शास्त्री. भार्गव: (सम्पादक:). व्याकरणमहाभाष्यम् (कैयटकृतप्रदीप: एवं नागेशकृत:(प्रदीपस्य टीका) उद्योतसहितग्रन्थ:), चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, 1987.
22. शुक्ल:, कालिकाप्रसाद: (संपादक:). वैयाकरणसिद्धान्तमञ्जूषा, नागेशभट्ट:, संपूर्णानन्दसंस्कृतविश्वविद्यालय:, वाराणसी, 1977.
23. श्रीकृष्णवल्लाभाचार्य: (सम्पादक:), विश्वनाथपञ्चाननभट्टाचार्य:, न्यायसिद्धान्तमुक्तावली (शब्दखण्ड:), चौखम्बाविद्याभवनम्, वाराणसी, 2005.
24. श्रीव्यासतीर्थ:, तर्कताण्डवम्, द्वैतवेदान्ताध्ययनशोधसंस्थानम्, बेंगलोर, 2004.
25. दास:, अच्युतानन्द: (सम्पादक:), व्युत्पत्तिवाद: (कृष्णभट्टकृतकृष्णभट्टीया, धर्मदत्तकृतगूथार्थतत्त्वलोक:, सुदर्शनाचार्यकृतादर्श:, जयदेवकृतजया, शिवदत्तकृतदीपिका, लक्ष्मीनाथकृतप्रकाश:, वेणीमाधवशुक्लकृत-शास्त्रर्थकला च संस्कृतव्याख्यासहित:, न्यूभारतीयबुककॉरपोरेशन, देहली, प्रथमं संस्करणम्, 2004.
26. सतपथी, हरेकृष्ण: (सम्पादक:), व्युत्पत्तिवाद: (एन्.एस्.रामानुजताताचार्यकृतविद्वन्मनोरमासंस्कृतटीकासहित:), राष्ट्रिय-संस्कृतविद्यापीठम्, तिरुपति:, प्रथमं संस्करणम्, 2011.

*********************

*ISSN 2348-7828*

# संस्कृतवाङ्मये चारित्र्यशिक्षाविधानम्

डॉ. अमितकुमारद्विवेदी[1]

**शोधसारः**

नैतिकमूल्यबोधस्य आधारस्तम्भः चरित्रमेव। अतः चरित्रोपरि विश्लेषणं बहुधा अस्माकं वैदिकलौकिकवाङ्मयेषु दरीदृश्यते। चरित्रेति शब्दः शीलस्य स्वभावस्य च वाचकोऽस्ति। स्वभावनया चरित्रेऽपि सदाचारस्य एव वाचकः अस्ति। सत्पुरुषाणामिव आचारविचारं यः प्रतिपालयति तं सदाचारी इति कथ्यन्ते। मनुष्यस्य कुलीनता तस्य चरित्रेण अभिव्यञ्जिता भवति। कुलीनता चरित्रस्य जन्मदात्री अस्ति। व्यक्तेः कुलीनता तस्य नित्यजीवनेन स्फुटति। मनुष्याणामान्तरिकभावनया, कर्मणा तथा वाण्या तस्य चरित्रस्याकलनं भवति। अस्मिन् सन्दर्भे प्राप्यते यत् वाल्मीकिः नारदं प्रश्नम् अपृच्छत्- **चरित्रेण च को युक्तः सर्वभूतेषु को हितः।**

**विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः** ॥[2]

तस्योत्तरे कथिताः समस्ताः गुणाः चरित्रस्य सदाचारस्य चान्तर्गते आगच्छन्ति। यद्यपि **"चरित्रेण च को युक्तः"** तदेकं भिन्नं प्रश्नमासीत्। चरित्रमेव व्यापकः शब्दोऽस्ति, यस्मिन् धर्मः, सदाचारः एवञ्च सर्वे सद्गुणाः समाविष्टाः भवन्ति। हृदयस्य भावाः षड् प्रकारेण परिलक्ष्यन्ते। वचनबुद्धिस्वभावचरित्राचारव्यवहारैः एव वयं पश्यामः। चरित्रशब्दः कुत्रापि कैवल्यं सदाचारार्थे प्रयुक्तो भवति। कुत्रापि कर्मणः शैल्यार्थे, अन्यत्र धर्मार्थे तथा अन्यत्र स्वभावार्थे प्रयुक्तं भवति। यत्र वर्णाश्रमधर्मस्य वर्णनम् आगच्छति, तत्र एनमपि स्वभावजः इत्युक्तम्।

वैदिकवाङ्मयं स्वीकृत्य सम्पूर्णसंस्कृतवाङ्मयं चारित्र्यविधानेन परिपूर्णमस्ति। वेदः, उपनिषद्, पुराणं, धर्मशास्त्रं, नीतिशास्त्रं तथा समग्रसंस्कृतकाव्यसाहित्यम् एवञ्च दर्शनग्रन्थाः जीवनयात्रायाः कण्टकाकीर्णपथि प्रतिपदम् अस्मभ्यं मार्गं दर्शयन्ति एवं तत् क्लिष्टदुर्गमात् तथा च वक्रमार्गात् सुमङ्गलमयं कारयन्ति। यदि कथयितुं शक्यते चेत् संस्कृतवाङ्मयस्य सर्वे अंशाः विभिन्नरूपाणि च चरित्रविधानस्य एव पोषकाः सन्तीति कथनेन नात्युक्तिः। तत्र यावन्तः अपि उपदेश-दृष्टान्ताः सन्ति, तेषु सर्वेषु अन्तिमपंक्तिषु केवलम् उदात्तचरित्रं प्रति सङ्केतं विद्यते। चारित्र्यविधानम् अतीतानागतस्य च विस्तृतकालस्य एकतायाः सुदृढं सोपानं वर्तते। समस्तसंस्कृतवाङ्मये चारित्र्यविधानमेव कश्मिश्चित् रूपेषु रचनायाः चरमलक्ष्यं परिपोषयति।

**वेदेषु-**

**भद्रं कर्णेभिः श्रणुयाम देवा भद्रं पश्येमाक्षिभिर्यजत्रः-** अर्थात् श्रोत्रभिः भद्रं वार्ताम् श्रव्येत् नेत्राभ्यां भद्रं वार्तां पश्येत्। **यतो यतः समीहसे ततो नोऽभयं कुरु, शं नः कुरु प्रजाभ्योऽभ्यं नः पशुभ्यः।** समस्तलोकपशुकल्याणं भव। प्राणिमात्रस्य कल्याणभावनैव चरित्रनिर्माणस्य मूलमन्त्रमस्ति। **'अतिथीं च त्रभेमहि, याचिताश्च नः सन्तु मा च वाचिस्म कंचन। एताः सत्याशिषः सन्तु'**। अस्मान् अतिथयः प्राप्तं भव। याचकाः प्राप्तं भव। वयं कस्यापि याचना न करणीया। एतत् सत्याशीषं प्राप्तं भव। उदात्तचरित्रस्य महान् दिग्दर्शनम् अत्रैव प्राप्यते। भावानां व्यापकत्वं मङ्गलकामनां विरच्य कुर्यात्। एतत् स्वकीयचरित्रस्य एवञ्च समाजस्य कल्याणं निर्माति।

**उपनिषत्सु-**

**सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदः,**
**मातृदेवो भव, पितृदेवो भव, आचार्य देवो भव।**
**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्** ॥[3]

एतानि आर्षवाक्यानि पूर्णतया आत्मविश्वासेन चारित्र्यविधानस्य दिव्यसन्देशं प्रसारयति। आदिकाव्यवाल्मीकीयरामायणे प्राप्यते यत्-

**यस्य त्वेतानि चत्वारि वानरेन्द्र यथा तव।**
**धृतिदृष्टिर्मतिर्दाक्ष्यं स कर्मसु न सीदति** ॥ [4]

समुद्रलङ्घनस्यान्ते हनुमान् कथयति यत् यस्य पार्श्वे धैर्यः, दूरदृष्टिः, स्थिरमतिः एवं च दृढदक्षता अस्ति, सः कमपि कार्ये पीडितं विमुखं वा न भवति, एवञ्च सदैव सफलः भवति। तद्यथा-

**नहि मे परदाराणां दृष्टिर्विषयवर्तिनी।**
**कामं दृष्टा मया सर्गः विश्वस्ता रावणस्त्रियः।**
**न तु मे मनसा किञ्चिद्वैकृत्यमुपजायते** ॥[5]

---

[1]सहायकाचार्यः(अतिथिः)शिक्षाशास्त्रविभागः, जगद्गुरुरामभद्राचार्यदिव्याङ्ग-राज्यविश्वविद्यालयः, चित्रकूटः, उ.प्र.

[2] वाल्मिकिरामायणम्

[3] (ईशावास्योपनिषद,मन्त्र 1)

[4] (वाल्मिकिरामायण सुन्दरकाण्डे 1/201)

[5] (वाल्मिकिरामायण सुन्दरकाण्डे 2/39,41)

लङ्कायाः विशालभव्यश्रृंगारमयराजप्रासादे भ्रमणं कृत्वा हनुमान् सहस्रशः स्वर्गीयसौन्दर्यं दृष्ट्वा कस्यापि विकारः मनसि न आगतः। एवं परदारेषु न दृष्टवान्। तदुच्यते-

**क्रुद्धं पापं न कः कुर्यात् क्रुद्धो हन्याद् गुरुनपि।**
**क्रुद्धः परुषयावाचा नरः साधूनधिक्षिपेत्॥**
**वाच्यावाच्यं प्रकुपितो न विजानाति कर्हिचित्।**[1]

अर्थात् क्रोधेन तप्तजनः उपर्युक्तं किमपि कुकर्मं कर्तुं शक्नोति अतएवोक्तम्-

**यः समुत्पतितं क्रोधं क्षमयैव निरस्यति।**
**यथोरगस्त्वचं जीर्णो स वै पुरुष उच्यते॥**[2]

'यः मनुष्यः उत्पन्नक्रोधं क्षमया निरस्तं करोति, यथा सर्पः स्वस्य शरीरस्योपरि चर्मस्य त्यागं करोति तमेव 'पुरुषः' कथ्यते, सैव पुरुषार्थ युक्तः।' क्रोधं त्यक्त्वा एव मानवताऽस्ति, चारित्र्यविधानस्य अस्मात् उत्तमविधिः किं भवितुमर्हति।

**षडङ्गवेदविदुषां क्रतुप्रवरयाजिनाम्।**
**शुश्राव ब्रह्मनिर्घोषान् विरात्रे ब्रह्मरक्षसाम्॥**
**अथ मङ्गलवादित्रैः शब्दैः श्रोत्रमनोहरैः।**
**प्राबुध्यत महाबाहुदशग्रीवो महाबलः॥**[3]

अत्र हनुमता लङ्कायां रावणस्य जागरणकालस्य वर्णनं कुर्वन् आदिकविः महर्षिवाल्मीकिः उक्तवान् यत् 'ब्रह्ममुहूर्ते रावणः सर्वेषां षडङ्गैः सह वेदविदां विदुषां याज्ञिकानां च मन्त्रोच्चारणं शृणोति। तथा च कर्णप्रियाः माङ्गलिकाः वेदवाक्यानि श्रुत्वा जागरणं कुर्वन्ति।' दैत्यः रावणस्यापि इदं प्रतिदिवसस्य अद्भुतं चरित्रमस्ति। किम् अद्यतनीयः भौतिकवादिनः भारतीयचरित्रस्य आदर्शं प्रति ध्यानं दातुमिच्छिन्ति ?

हनुमन्नाटके किञ्चत् अद्भुतं चारित्रिकवर्णनं समुपलभ्यते-

**नाहं जानामि केयुरे नाहं जानामि कुण्डले॥**
**नूपुरे त्वभिजानामि नित्यं पादाभिवन्दनात्॥**[4]

लक्ष्मणः रामचन्द्रं वदति यत् 'सीतायाः आभूषणेषु कर्णयोः कुण्डले हस्तयोः च करभूषणविषये न जानामि, केवलं प्रतिदिनं चरणस्पर्शेन पादाभिवन्दनेन वा पादयोः मञ्जीरौ नूपुरौ जानामि, एतौ सीतायाः एव स्तः। चरित्रसम्बन्धित उदात्तपद्ये टीप्पणीमनावश्यकं वर्तते। तदुच्यते-

**त्रिदशैरपि दुर्घर्षा लङ्का नाम महापुरी।**
**कथं वीर त्वया दग्धा विद्यमाने दशानने॥**[5]

लङ्का-दहनप्रसङ्गे भगवान् रामचन्द्रस्य प्रश्नोत्तरे हनुमान् वदति-

**निःश्वासेनैव सीताया राजन् कोपानलेन ते।**
**पूर्वदग्धात्वियं लङ्का निमित्तोऽभवत् कपिः॥**[6]

'सीतायाः शोकोच्छ्वासेन एवं भवतः क्रोधानलेन लङ्का तु पूर्वमेव दग्धाऽसीत्। एषः वानरः (अर्थात् अहं) तु निमित्तमात्रमभवम्।' शालीनतायाः विनम्रतायाः तथा च उच्चारितस्येदं कियत मार्मिकं विधानमस्ति। अनेन कोऽपि चारित्र्यवान् अवगन्तुं शक्नोति। हनुमतः विनम्रतायाः अन्यदोक्तिः। यथा-

**शाखामृगस्य शाखायाः शाखां गन्तुं पराक्रमः।**
**यत्पुनर्लंघितोऽम्भोधिः प्रभावोऽयं प्रभो तव॥**[7] (7/44)

वानरस्य पराक्रमं तु एकशाखातः अपरशाखायां कूर्दने भवति, एतावत् सागरलङ्घने तु केवलं प्रभोः (भवतः रामचन्द्रस्य) एवाभावोऽस्ति।

श्रीमद्भगवद्गीतायां चरित्रविषये वर्णनमेवं समुपलभ्यते। वास्तविकं तु सम्पूर्णगीता चरित्रमयमस्ति, प्रत्येकं पङ्क्तिः उत्कृष्टमाचरणं, संकल्पं, निष्ठापूर्णकर्मं, कर्मणा प्राप्तं भक्तिं भक्तया च प्राप्तं ज्ञानस्य गरिमां प्रतिपादयति। यस्य वर्णनं नास्ति अत्रापेक्षितं, तथापि केवलं दृष्टान्तमेकं द्वे वा अत्र प्रस्तूयते।

तद्यथा- **तानि सर्वाणि संयम्य युक्त आसीत् मत्परः।**

---

1 (वाल्मिकिरामायण सुन्दरकाण्डे 5/4,5)
2 (वाल्मिकिरामायण सुन्दरकाण्डे 5/6)
3 (वाल्मिकिरामायण सुन्दरकाण्डे 18/1-2)
4 (वाल्मिकिरामायण सुन्दरकाण्डे 4/6,22)
5 (वा.रा. लङ्का-दहनप्रसङ्गे भगवान् रामचन्द्रस्य प्रश्नोत्तरे हनुमान् वदति )
6 (वा.रा. लङ्का-दहनप्रसङ्गे भगवान् रामचन्द्रस्य प्रश्नोत्तरे हनुमान् वदति )
7 (वाल्मिकिरामायण लङ्का-दहनप्रसङ्गे भगवान् रामचन्द्रस्य प्रश्नोत्तरे हनुमान् वदति )

**वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ।।**[1]

अर्थात् 'इन्द्रियाणि वशीकृत्येव प्रज्ञावान् भवितुं शक्यते। अनेन विना सच्चरित्रं न सम्भवति। तदुक्तम्-

**क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।**

**स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।।**[2]

क्रोधात् सम्मोहः, सम्मोहात् स्मरणशक्तेः ह्रासः, तस्मात् बुद्धिनाशः, बुद्धिनाशोपरान्तश्च सर्वनाशो भवति। अतएव विना क्रोधं मुक्ते सति चरित्रनिर्माणं न सम्भवति। इदं गीतायाः संदेशमस्ति।

अधुना कविकुलगुरुकालिदासस्य कानिचन् काव्यानां सौरभं गृह्णीयात्।

कुमारसम्भवे यथा- **क्षुद्रेऽपि नूनं शरणं प्रपद्ये, यमत्वमुच्चैः शिरसा सतीव।**

अर्थात् शरणागते क्षुद्रस्यापि स्वीकरणं श्रेयस्करं भवति। तदुक्तम्- **विकारहेतौ सति विक्रियन्ते, येषां न चेतांसि ते एव धीराः।**[3]

सर्वेषां विकाराणां पथभ्रष्टे सति साधनस्थितौ सत्वपि येषां चित्तेषु विकृतिः न भवति, ते एव धीराः सन्ति। विना सुदृढचरित्रेण किं सम्भवति ? तद्यथा- **न केवलं यो महतोऽपभाषते, श्रृणोति तस्मादपि यः स पापभाक् ॥**

नापशब्दानां प्रयोगम् अपितु तेषां श्रवणाभ्यामपि पापस्य कारणमस्ति। रघुवंशे यथा- गोसेवायाः चरमादर्शः उपस्थापितः अभवत्। दिलीपेन गोः आदर्शसेवां कृतवान्। अद्य गोवंशस्योपेक्ष्या अभवत्। तदुच्यते-

**आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च।**

**अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराघनतत्परोऽभूत् ।।**[4]

महाराजदिलीपस्य वैयक्तिकसामाजिकश्च चरित्रनिर्माणस्य उत्कृष्टमुदाहरणं किम् ?

**अभिज्ञानशाकुन्तले** यथा- नाटकस्यादौ एव महाराजादुष्यन्तः कण्वाश्रमे प्रवेशसमये वैखानसः कथयति- **'एष खलु कण्वस्य कुलपतेः तु मालिनीतीरमाश्रमो हि दृश्यते, न चेदम्यकार्यातिपातः तथा प्रविश्य प्रतिगृह्यतामातिथ्यसत्कारः।'**[5]

अर्थात् मालिनी-नद्याः तटे कुलपतिकण्वस्य आश्रमः अस्ति। अतएव शालीनता-पूर्वकं विनयेन च प्रविश्य आतिथ्यसत्कारः गृहणीयात्। तस्मात् तत्र किञ्चत् मात्रमपि विघ्न-बाधा न भवेत्।

आश्रममर्यादायाः रक्षायां चारित्रिकशीलतायाः इदं निर्दशनम् अद्यतनीयविद्यालयाभ्याम् अनुकरणीयादर्शोऽस्ति। अतोच्यते- **भवन्ति नम्रास्तरवः फलोद्गमैः।** फले सति वृक्षाः नम्राः भवन्ति। इत्यादिनि वाक्यानि चरित्रोन्नतियुक्तानि भवन्ति। चरित्रविधानस्य नम्रस्वभावः आवश्यकगुणोऽस्ति। **मेघदूते** यथा- कविकुलगुरुणाम् 'अर्थान्तरन्यासालङ्कारस्य चमत्कारे चारित्रिकदिग्दर्शनात् चकितः। यथा- **"याच्यां मोघा नरमधिगुणे नाधमे लब्धकामाः।"**[6]

गुणवान्व्यक्तिभिः याचनां निष्फले सति श्रेष्ठः अस्ति। परन्तु क्षुद्रेण याचनासफला सन् अपि निकृष्टः अस्ति। तदुक्तम्-

**"मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्या।**

**मित्रणां कार्यं स्वीकृत्य सुहृद्व्यक्तिः मन्दः न भवति।,,**

**'न क्षुद्रोपि प्रथमसुकृतोपेक्षया संश्रयाय प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः।**

क्षुद्रः व्यक्तिः अपि मित्रस्य पूर्वकृतोपकारं स्मृत्वा विमुखः न भवति ये सुहृदाः सन्ति, ते विरलाः सन्ति। यथा- **'आपन्नार्ति प्रशमफलाः सम्पदो ह्युत्तमानाम्'** उत्तमव्यक्तीनां सम्पत्तिस्तु आर्तत्राणाय एव भवति।

**नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।**

अर्थात् मनुष्याणां दशाचक्रस्य धूर्याः इव उपरिनीचैर्भवति। इदं प्रकृतेः नियमः वर्तते। महाकविभारवेः किरातार्जुनीयमहाकाव्ये दुर्योधनस्य उच्चचरित्रस्य दिग्दर्शनं प्राप्यते। यथा-

**कृतारिषडवर्गजयेन मानवीमगम्यरूपां पदवी प्रतित्सुना।**

**विभज्य नक्तन्दिवमस्ततन्द्रिणा,वितन्यते तेन नयेन पौरुषम् ।।**[7]

मानवतायाः उच्चधरातले प्रपद्ये कामनां कृत्वा दुर्योधनः काम-क्रोध-मदलोभमोहमात्सर्याद्यपि एता षडरिपून् विजीत्य अहोरात्रौ आलस्यरहितं भूत्वा कार्यं विभज्य च अनीत्या प्राप्तं राज्यं सम्प्रति नीतौ पुरुषार्थः विस्तार्यते। द्रौपदीं प्रति युधिष्ठिरेणोक्तम्-

**भवादृशेषु प्रमदाजनोदितं, भवत्यधिक्षेप इवानुशासनम्।**

---

[1] - श्रीमद्भगवद्गीता-2/61

[2] - श्रीमद्भगवद्गीता-2/63

[3] - कुमारसम्भव श्लोक-59

[4] -रघुवंशमहाकाव्ये-2/5

[5] -अभिज्ञानशाकुन्तले

[6] (पूर्वमेघ)

[7] -किरातार्जुनीयम्, श्लोक-9

**तथापि वक्तुं व्यवसाययन्ति मां, निरस्तनारी समया दुराधयः ॥**

अर्थात् भवतः सदृशं महान्तं व्यक्तिं प्रति मया सादृश्या अवलया किमपि कथनीयमिति अपेक्षयैव अस्ति। तदपि नारीसुलभहृदयस्य विषये मां किमपि वक्तुं प्रेरयति।

उपयुक्तौ पद्यौ स्वयमेवोदात्तचरित्रस्योत्कृष्टः दृष्टान्तः वर्त्तते। महाकवेः भवभूतेः उत्तररामचरिते उज्ज्वलचरित्रविधानस्य वर्णनं प्राप्यते यत्- **लौकिकानां हि साधूनामर्थं वागनुवर्तते।**

**ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥**[1]

यथा वह्निः एव वह्निः नीरस्य च एव नीरः इति कथ्यन्ते। परन्तु त्रिकालज्ञऋषिगणानां वाण्याः पृष्ठैव अर्थः क्रमते। यथा ते यदि वह्नेः नीरः नीरस्य च वह्निः इति वदेत् तर्हि ते तथैव जायन्ते। तदुक्तम्-

**स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।**

**आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ॥**[2]

श्रीरामचन्द्रेण कथ्यते यत् जनानां समाजस्य आराधनायाः इच्छापूर्तये च मम स्नेहदया सौख्यञ्च कः कथयेत्, जानकीमपि त्यक्तुं प्रस्तुतोऽस्मि। लोकोराधनाय जानक्याः त्यक्तुमपि मां किञ्चिदपि व्यथा नैव भविष्यति। अयं वर्तते लोकराधकस्य आदर्शचरित्रः। महाकविभासः स्व **'स्वप्नवासवदत्ते'** उत्तमाचरणरूपचरित्रं प्रति इंगितं कृत्वा कथयति-

**'कोऽयं भो निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया'**[3]

अस्य तपोवनस्य कः अज्ञानी स्व आज्ञायां निर्मीयते। तात्पर्यमिदमस्ति तपोवनस्य मर्यादायाः रक्षाचरित्रशीलता वर्तते। तस्मिन् बाधा न पातनीया। अनेन श्लोकेन गुणज्ञभूतस्य निर्देशं प्राप्यते।

चाणक्य-भर्तृहरिप्रभृतयः नीतिकाराणां नीतिश्लोकेषु तु सम्पूर्णतया चारित्र्यविधानस्य एव विधिः वर्तते। शास्त्राणां मनीषीणाञ्च मते चरित्रनिर्माणस्योपादेयता एवं वर्णिमतस्ति यत्-सदाचरणेन अथवा सच्चरित्रेणैव पुरुषस्य श्रेयत्वं सम्भवति। सद्पुरुषैः यत् किमपि व्यवह्रीयते तदेव सदाचारः इत्युच्यते। वशिष्ठस्मृतौ सदाचारः मनुस्मृत्यादिषु च 'आचारः' शब्देनापि निर्दिश्यते। एतस्य च महत्ता मनुः श्लोकेन वर्णयति-

**आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च।**

**तस्यादस्मिन्सदा युक्तो नित्यं स्यादात्मवान्द्विजः ॥**[4]

श्रुतिषु तथा स्मृतिषु स्वीकृते एव आचार शब्दः अनुकरणीयः इति कथ्यते। इतोऽपि भगवान् शंकराचार्यः आचारं चरित्रस्य पर्यायत्वेन स्वीकरोति- **चरणं चारित्रमाचारः शीलमित्यर्थान्तरम्।**[5]

चरित्रहीन-आचारहीन-मनुष्यस्य इहलौकिके पारलौकिके च दशां वर्णयन् भारतीयधर्मग्रन्थेषु स्पष्टं निगदितं यद् षड्भिरङ्गैः सह अधीतवेदमपि आचारहीनं न पुनन्ति, ते च मृत्युकाले तान् तथैव त्यजन्ति यथा जातपक्षाः पक्षिणः नीडं त्यजन्ति। तदुच्यते-

**आचारहीनं न पुनन्ति वेदा यद्यप्यधीताः सह षड्भिरङ्गैः।**

**छन्दांस्येनं मृत्युकाले त्यजन्ति नीडं शकुन्तला इव जातपक्षाः ॥**[6]

वस्तुतः चरित्रमेव मनुष्यस्य महत्वपूर्णं निकषं भवति। स्वचरित्रेणैव मनुष्यः प्रतिबिम्बितो भवति। **पाश्चात्यविचारकबेकनमहोदयः** सम्यक् एवोक्तवान्- Style is the man himself.

इत्थं स्पष्टं यत् संस्कृतवाङ्मये चारित्र्यशिक्षाविधानम् पगे-पगे परिदृश्यते। वस्तुतः चरित्रमिदममूल्यं रत्नं वर्तते। अनेन मनुष्यः समाजे प्रतिष्ठितो भवति। यदि कोऽपि जनः धनवान्, शक्तिशाली शिक्षितो वा भवति, परं चरित्रयुक्तेन तस्यैते गुणाः न किमपि महत्वं जनयन्ति। चरित्रवान् मनुष्यः पुष्पस्तबकसदृशोऽस्ति, यः सर्वमपि स्वस्मिन् स्थापयति। चरित्रवान् च मनुष्यः समुद्रमिव गम्भीरः, वसुधा-इव धैर्यं, सूर्यमिव तेजः, चन्द्रमिव शैल्यं, पुष्पमिव सुकोमलं, वज्रमिव कठोरश्च भवति।

**सन्दर्भग्रन्थसूची**


1. गुप्ता, एन. एल. - नियो ह्यूमिनिज्म- ह्यूमन् वैल्यूज- मोहित पब्लिकेशन्स, नई दिल्ली- 1999.
2. लोढ़ा, डॉ. महावीरमल - नैतिक शिक्षा के विविध आयाम- राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर- 2006.
3. शुक्ला, छाया - नैतिकमूल्य और शिक्षा- सुमित इण्टरप्राइजेस्- 2012.
4. पाण्डेय, आर. एस. एवं मिश्रा, के. - मूल्यशिक्षण- विनोद पुस्तक मन्दिर, आगरा- 2010.


*********************

[1] उत्तररामचरिते-1/10

[2] उत्तररामचरिते-1/12

[3] स्वप्नवासवदत्ते

[4] (मनुस्मृति-1/108)

[5] (ब्रह्मसूत्र शाङ्करभाष्य)

[6] (वशिष्ठ स्मृति-6/3, देवी भागवत-11/2/1)

*ISSN 2348-7828*

# समासशक्तिविषये कौण्डभट्टमतविमर्शः

**डॉ. आस्तीकद्विवेदी**[1]

**शोधसारः**

संस्कृतवाङ्मये वयं प्रायशः सामासिकशब्दान् प्रयुञ्महे।तेषां शब्दानां विशिष्टेशक्तिः अथवा समासघटकीभूतेषु अवयवयेषु शक्तिः इति विचारपरोऽयं लेखः विद्यते।अस्मिन् शोधपत्रे समासपदेन कस्य ग्रहणमिति सप्रमाणं निरुपितं वर्तते। समर्थः पदविधिः इति सूत्रस्य समासशक्त्युपयोगिविचारः कृतः वर्तते। एकार्थीभावात्मकं सामर्थ्यम् उत् व्यपेक्षात्मकं सामर्थ्यम् अनयोः मध्ये कस्यग्रहणमिति विमर्शः कृतः विद्यते। जहत्स्वार्थाऽजहत्स्वार्थावृत्योः मध्ये कं पक्षमादाय समासशक्तिविचारप्रसङ्गे कौण्डभट्टः प्रवृत्तः इत्यपि निगदितं वर्तते।

**कुञ्जिशब्दाः - विशिष्टशक्तिः, अवयवशक्तिः, समुदायशक्तिः, राजपुरुषः, प्राप्तोदकः, व्यपेक्षावादः, एकार्थीभावः।**

'समासशक्तिः' विचारप्रसङ्गे प्राथम्येन 'समासशक्तिः' घटकीभूतं यत् समासपदं तेन पदेन किं गृह्यते इति विचारणीयम् भगवता पाणिनिना समासपदघटितानि नैकानि सूत्राणि विरचितानि यथा, 'प्राक्कडारात् समासः' समासेऽनञ्पूर्वो क्त्वोल्यप् नित्यं समासेऽनुत्तरपदस्थस्य 'समासस्य' इत्यादीनि सूत्राणि। एतेषु सूत्रेषु अधीयमानेषु कस्य तावन्न नयनपथमध्यास्ते समासपदमिति अतः समासपदेन व्याकरणशास्त्रे कस्य ग्रहणं क्रियते अत्र प्राक्कडारात् समासः इति सूत्रास्थं यद् भाष्यं तद्भाष्यमेव मानं विद्यते। तेन भाष्येण 'समास' पदेन समाससंज्ञायाः लाभो भवति। कुतः इति चेत् तत्र भगवता भाष्यकारेण एकः प्रश्नः उत्थापितः 'प्राक्कडारात् समासः' इत्यत्र आकडारात् समासः इत्येव वक्तव्यं प्राग्वचनं किमर्थं तदा भाष्यकारेण उत्तरं प्रदत्तम् प्राग्वचनं[2] 'समाससंज्ञायाः अनिवृत्यर्थम्'' अर्थात् प्राक्कडारात् समासः अस्मिन् शास्त्रे यद् प्राग्वचनं क्रियते तस्य वचनस्य इदमेव प्रयोजनं यत् समाससंज्ञायाः अनिवृत्तिः यथा स्यादिति भावः। यदि प्राग्वचनं न क्रियते तर्हि अनवकाशाः अव्ययीभावादयः संज्ञाः समाससंज्ञां बाधेरन् यतो हि वैयाकरणानां विशेषः सिद्धान्तः वर्तते, यानि संज्ञाविधायकानि शास्त्राणि एक संज्ञाधिकारे पठितानि तत्र एकस्य एकैव संज्ञा स्यात्। अत एव स्वादिष्व सर्वनामास्थाने इति सूत्रेण विधीयमाना या पदसंज्ञा सा संज्ञा अजादिविभक्तौ परतः न भवति यचिभं इति विधीयमानया भसंज्ञया एकसंज्ञाधिकारस्थत्वेन परत्वात् अनवकाशत्वाच्च बाधात्। अतः प्राग्वचनसार्मथ्यात् एकसंज्ञाधिकारेऽपि अव्ययीभावादिसंज्ञासमुच्चयः स्यादिति भाष्ये स्पष्टम्। 'समास' इति महासंज्ञाकरणात्[3] अन्वर्थसंज्ञा विज्ञास्यते। अकर्त्तरि च कारके संज्ञायामिति इति सूत्रेण समुपसर्गात् अस्यतेः कर्मणि घञि निष्पन्नोऽयं समासशब्दः। 'असु क्षेपणे' इत्यस्यतेः क्षेपणार्थकत्वेऽपि सम्पूर्वकस्य तस्यैकीकरणात्मकसंश्लोषोऽर्थः भवति। अर्थात् समस्यते अनेकं पदमिति समासः अत एव सुबन्तं समस्यते इति सूत्रीयमूलव्याख्यानं सङ्गच्छते। समास शब्दे कैश्चित् भावे घञ् इत्यपि वदन्ति तेषां मते समसनं 'समासः' इति व्युत्पत्तिः स्वीकरणीया अर्थात् अनेकपदस्य एकपदीभवनमित्यर्थः। किन्तु इदं व्याख्यानं सिद्धान्तकौमुद्युक्तमूलग्रन्थविरुद्धत्त्वात् हेयमेव। वैयाकरणभूषणसारस्य शांकरीव्याख्यायान्तु समासशब्दे हलश्चेत्यधिकरणे घञ् इति स्वीकृतम्। अर्थात् समस्यते यस्मिन्निति समासः। यस्मिन् समुदाये पदद्वयं परस्परं समस्यते स समुदायः समास इति यावत्। समग्रस्य व्याख्यानस्य इदमेव तात्पर्यं यत्[4] ''व्याकरणशास्त्रप्रणेतृपाणिन्यादिमुनिकर्तृकसंकेत-सम्बन्धेन समासपदवत्वं समासत्वमिति ध्येयम्।

इदानीं समासशक्ति विषये कीदृशः विचारः वैयकरणभूषणसारे समागतः तं यथामति प्रस्तौमि। समासशक्तिप्रतिपादकं एकं विशिष्टं परिभाषासूत्रं भगवता पणिनिना द्वितीयाध्यायस्य प्रथमपादे प्रथमसूत्रत्वेन उपन्यस्तं समर्थः पदवविधिरिति।[5] सूत्रेऽस्मिन् पदद्वयं 'समर्थः' इति एकं पदं पदविधिरिति द्वितीयं पदम् तत्र पदविधिर्नाम विधीयते असौ विधिः। विपूर्वकाद्धाञ्धातोः उपसर्गेघोः किः[6] इति सूत्रेण कर्मणि कि प्रत्यये विधिरिति भवति।

अनन्तरं पदानां विधिः इति शेषषष्ठ्यन्तेन समासः। शेषः नाम सम्बन्धः सम्बन्धस्तु उद्देश्यविधेयरूपः पदोद्येश्यकविधिरिति यावत् तथा च पदानां सतां विधीयमानो यः समाससंज्ञादिः सः पदविधिरिति उच्यते। पदविधिपदार्थेन सह समर्थपदार्थस्य सामानाधिकरण्यासम्भव इति समर्थपदं समर्थाश्रितेलाक्षणिकम् ययोःद्वयोःभागयोः एकार्थीभावसामर्थ्यं तादृशसामर्थ्याश्रितयोरेव समाससंज्ञादिभवतीत्यर्थः अस्य सूत्रस्य परिभाषारुपत्वेन नियमे पर्यवसानात्। समर्थः पदविधिरिति सूत्रे भाष्ये सामर्थ्यं द्विविध मित्युक्तम्। तयोर्मध्ये स्वार्थपर्यवसायिनां

---

1 सहायकाचार्यः, (व्याकरणम्),रामाधीनमिश्रभास्करोदयसंस्कृतमहाविद्यालयः, देवढियां बक्सर, बिहारप्रदेशः।

2 व्याकरणमहाभाष्यम् उदद्योतपरिवृतप्रदीपोद्भासितम् द्वितीय अध्यायः प्रथमआह्निकम राष्ट्रिय संस्कृत संस्थानम् नई दिल्ली २००६, पृ. ७०

3 व्याकरणमहाभाष्यम् उद्योतरिवृतप्रदीयोद्भासितम् द्वितीय अध्यायः प्रथमआह्निकम राष्ट्रिय संस्कृत संस्थानम् नई दिल्ली २००६, पृ. ७५

4 वैयाकरणभूषणसारः शंकरशस्त्रिप्रणीतशांकरीव्यारव्यासंवलितः आनन्दाश्रममुद्रणालये प्रकाशितः ख्रिस्ताब्दाः १९५७, पृ. २४५

5 वैयाकरणसिद्धान्तकौमुदी बालमनोरमातत्वनोधिनीसहिता मोतीलाल बनारसीदारस द्वितीय भाग २००५, पृ. १

6 वैयाकरणसिद्धान्तकौमुदी बालमनोरमातत्वनोधिनीसहिता मोतीलाल बनारसीदारस भाग-४ १९८७, पृ. ३३२

पदानामकाङ्क्षादिवशाद्यः परस्परान्वयस्तद्व्यपेक्षाभिधं सामर्थ्यम्[1] भवति इदं च राज्ञः पुरुषः इत्यादिवाक्ये एव भवति। तत्र चैकैकस्य शब्दस्य यो यः सन्निहितो योग्यश्च तेन तेनान्वयो भवति। यथा राज्ञः, पुरुषोऽश्वश्चेति, राज्ञो देवदत्तस्य च पुरुषः इति ऋद्धस्य राज्ञः पुरुषः इति च। विशिष्टा अपेक्षा व्यपेक्षा, संबन्धार्थः समर्थः इति भाष्योक्तेश्च।[2] ''पृथगर्थानामेकार्थीभावः समर्थवचनम्'' इतिभाष्योक्तेः अथ च संगतार्थः समर्थः, संसृष्टार्थः समर्थः[3] इति व्युत्पत्तेः पृथगर्थानां पदानामेकार्थीभावः सामर्थ्यमित्युच्यते। इदं च सामार्थ्यं 'राजपुरुषः' इत्यादौ समासे एव एवञ्च पृथक् पृथक् अर्थोपस्थापकानां पदानां समुदायनिष्ठैकशक्त्या एकोपस्थितिजनकत्वेमकार्थीभावः इति फलितम्। घटघटत्वयोः एकोपस्थितिः यद्यपि घटपदात् भवति, तथापि तत्र पृथगर्थोपस्थापकपदसमुदायाभावान्न दोषः। वैशिष्ट्यमुद्रया एकार्थीभावलक्षणं तु पदविशिष्टत्वम् एकार्थीभावत्वम्।[4] वैशिष्ट्यंच स्वघटितत्वं, स्वप्रयोज्यविषयतानिरुपितविषयताप्रयोजकपदघटितत्वं, स्वनिष्ठशक्तिपर्याप्त्य-धिकरणत्वम् एतत्त्रितयसम्बन्धेन ''राजपुरुषः'' इत्यत्र राजन्पदं पुरुषपदंवा तद्वैशिष्ट्यं समुदाये वर्तते। तथाहि, स्वं राजन्पदं तद्धटितत्त्वं समुदाये, तत्प्रयोज्या विषयता राजत्वावच्छिन्नप्रकारताख्या विषयता तन्निरुपिता विषयता पुरुषत्वावच्छिन्ना विशेष्यताख्या विषयता तत्प्रयोजकं पदं पुरुषपदं तद्धटितत्त्वमपि तस्मिन् समुदाये, एवं स्वं राजन्पदं तन्निष्ठा या शक्तिः राजत्वावच्छिन्ननिरुपितिशक्तिपर्य्याप्त्यधिकरणराजपदघटितत्त्वं राजपुरुषपदे समुदाये सत्वाल्लक्षणसमन्वयः। समासशक्तिविषये चत्वारः पक्षाः समर्थः पदविधिः इत्यस्मिन् सूत्रे भाष्ये वर्णिताः सन्ति। जहत्स्वार्था, (2) अजहत्स्वार्था (3) एकार्थीभावः (4) व्यपेक्षा चेति। तत्र जहत्स्वार्थावृत्तिपक्षस्य एकार्थीभावे पर्यवसानं भवति। अजहत्स्वार्थावृत्तिपक्षस्य व्यपेक्षात्मके सामर्थ्ये पर्यवसानं बोध्यम्। तत्र जहत्स्वार्थावृत्ति इत्यस्य किं तात्पर्यं कश्च विग्रहः इति जिज्ञासायां मूले उक्तं कौण्डभट्टेन जहति पदानि स्वार्थं यस्यां वृत्तौ सा जहत्स्वार्था।[5] अत्र जहति इति शत्रन्तप्रकृतिक जसन्तं, न तु लडन्तं क्रियापदम् अर्थात् द्वितीयान्तस्वार्थ पदप्रथमान्तजहत्पदघटितव्यधिकरणबहुव्रीहिः ग्रन्थकारेण मूल व्युत्पत्तौ प्रतिपादितः। किन्तु अनेकं प्रथमान्तमन्यपदार्थे वर्तमानं वा समस्यते सः बहुव्रीहिः इति सूत्रार्थः वर्तते अनेकमन्यपदार्थे इति सूत्रस्य तेन समानाधिकरणानामेवबहुव्रीहिः यथा पीतम् अम्बरं यस्य इति पीताम्बरो हरिः। तदा उच्यते सप्तमीविशेषणे बहुव्रीहौ इति सूत्रे[6] सप्तमीग्रहणाज्ज्ञापकत्वाद् क्वचिद्व्यधिकरणानामपि पदानां बहुव्रीहिः भवति।

अयं भावः-सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यम् अर्थात् सप्तम्यन्तस्य, तथा विशेषणस्य बहुव्रीहौ समासे पूर्वप्रयोगः कर्त्तव्यः। सप्तम्यन्तपदस्य उदाहरणं मूले कौमुद्यामुक्तं भट्टोजिदीक्षितेन कण्ठे कालः यस्य सः कण्ठे कालः कण्ठे इत्यस्य अधिकरणत्वं तस्य च कालरूपे उत्तरपदार्थे उपसंक्रमः, तदा कण्ठे इत्यस्य अप्रथमान्ततया बहुव्रीहेः अप्रसक्तेः तत्र सप्तम्यन्तस्य पूर्वनिपातविधानमनकर्थकं स्यात्। तेन सप्तमीग्रहणेन अप्रथमान्तोऽपि बहुव्रीहिः क्वचिदस्तीति विज्ञायते। अथवा जहति स्वानिवृत्तिघटकीभूतपदानि, यं सः जहत्स्वः[7], तादृशोऽर्थो यस्यामिति समानाधिकरणबहुव्रीहिणैव व्युत्पाद्यः। जहत्स्वार्था वृत्तौ कथं पदानामनर्थकत्वं तदा उच्यते शक्तरामादिपदघटकरेफादिवर्णानामिव वृत्तिघटकपदानामप्यनर्थकत्वमिति अनुभवात्।

अन्यथा वृत्तौ पदानामर्थवत्त्वस्वीकारे तुल्ययुक्त्या वर्णानामप्यर्थवत्वापत्तिरिति बोध्यम्। अयं भावः समासशक्त्यैव राजविशिष्टपुरुषभानसंभवे न राजपुरुषपदयोरपि पुनस्तद्बोधकत्वं कल्प्यम् वृषभयावकादिपदेवृषादिपदानामिव अयमाशयः-वृषशब्दस्य वृषभशब्दसमानार्थकत्वेऽपि वृषभशब्दघटकस्य वृषशब्दस्य न तदर्थबोधकत्वं, किंवा यावशब्दस्य यावकशब्दसमानार्थकत्वेऽपि यावकशब्दघटकस्य याव शब्दस्य न तदर्थ बोधकत्वं इत्येवमनुभवसिद्धम्। तथा च तादृशानुभवनिर्वाहाय शक्ततावच्छेदकानन्नुप्रविष्टाया एवाऽनुपूर्व्याः शक्ततावच्छेदकत्व मित्येवं नियमोऽवश्यमङ्गीकर्यः यदि च यावकशब्दघटकयाव शब्दार्थस्यार्थवत्वमङ्गीक्रियते तर्हि यावकशब्दनिष्ठा या शक्ततावच्छेदकानुपूर्वी यावकेति यकारादिरकारान्ता, तत्प्रविष्टायाः यावेति तस्य शक्ततावच्छेदकत्वं स्वीकार्यता भवेत् तेन शक्ततावच्छेकाननुप्रविष्टायाः एवाऽनुपूर्व्या शक्ततावच्छेदकत्वं इति नियमभङ्गापत्तिः स्यात् महान् अनुभवविरोधः स्यात। एवं राजपुरुषेति इत्यादिवृत्तिघटकावयवपदाना- मर्थवत्वस्वीकारे राजपुरुषेति समुदायनिष्ठा या वर्णानुपूर्वी तादृशवर्णानुपूर्वीप्रविष्टायाः राजेति, पुरुषेति वर्णानुपूर्व्याः शक्ततावच्छेदकत्वं स्वीकार्यं भवेत्। तच्चोपर्युक्तनियमविरोधादयुक्तमेवेतिभावः। समासाद्यवयावानां स्वार्थबोधकत्वे तु राज्ञः पुरुषः इति वाक्ये राजपदाद्राज्ञः इतरानन्वितत्वेन उपस्थितिः तथा समासेऽपि राजपदाद्राज्ञः स्वातन्त्र्येणोपस्थितिसत्वात् राज्ञि ऋद्धस्येति विशेषणान्वयेन ऋद्धस्य राज्ञः पुरुषः इतिवद् ऋद्धस्य राजपुरुषः इत्यापद्येतेत्यर्थः। जहत्स्वार्थत्वे तु राजाद्यर्थस्य पुरुषविशेषणत्वेनैवोपस्थिततया

[1] व्याकरणमहाभाष्यम् उदद्योतपरिवृतप्रदीपोद्भासितम् द्वितीय अध्यायः प्रथमआह्निकम राष्ट्रिय संस्कृत संस्थानम् नई दिल्ली २००६, पृ. ३६

[2] व्याकरणमहाभाष्यम् उदद्योतपरिवृतप्रदीपोद्भासितम् द्वितीय अध्यायः प्रथमआह्निकम राष्ट्रिय संस्कृत संस्थानम् नई दिल्ली २००६, पृ. ३८

[3] व्याकरणमहाभाष्यम् उदद्योतपरिवृतप्रदीपोद्भासितम् द्वितीय अध्यायः प्रथमआह्निकम राष्ट्रिय संस्कृत संस्थानम् नई दिल्ली २००६, पृ. १७

[4] व्याकरणमहाभाष्यम् उदद्योतपरिवृतप्रदीपोद्भासितम् द्वितीय अध्यायः प्रथमआह्निकम राष्ट्रिय संस्कृत संस्थानम् नई दिल्ली २००६, पृ. ३७

[5] प्रभाव्याख्यया दपर्ण व्याख्यया च समुल्लसितः वैयाकरणभूषणसारः आदर्शग्रन्थमालाया द्वितीय पुष्पम् २७०

[6] वैयाकरणसिद्धान्तकौमुदी बालमनोरमातत्वनोधिनीसहिता मोतीलाल बनारसीदारस द्वितीय भाग २००५, पृ. १८०

[7] प्रभाव्याख्यया दपर्ण व्याख्यया च समुल्लसितः वैयाकरणभूषणसारः आदर्शग्रन्थमालाया द्वितीय पुष्पम् २७०

पदार्थैकदेशत्वाद्विशेषणान्वयाभावान्न दोषः। एवञ्च जहत्स्वार्थावृत्तिपक्षेऽप्यवयवानां स्वातन्त्र्येणानुपस्थितत्वमेव नैरर्थक्यमिति भाव इति जहत्स्वार्थावादिनां अथवा एकार्थीभाववादिनाम् मतमिदम्। अजहत्स्वार्थावादिनां व्यपेक्षावादिनां मते तु नैव सामसे शक्तिः। अयमभिप्रायः व्यपेक्षावादिनः कथयन्ति राजपुरुषादौ नातिरिक्ता शक्तिः, प्रमाणाभावात्। अवश्यक्लृप्तप्रत्येकावयवशक्त्यैव बोधनिर्वाहे पुनः समुदाये शक्तिकल्पनस्य गौरवग्रस्तत्वात् न युक्तम्। अथ च अस्मिन् एकार्थीभावपक्षे अवयवशक्त्यतिरिक्तसमुदायशक्तिकल्पने राज्ञः पुरुषः इत्यादौ वाक्ये राजन्पदार्थनिरूपिता या क्लृप्ता शक्तिः तस्याः शक्तेः त्यागः तथा शक्त्यन्तरस्य कल्पनाऽपि अप्रामाणिकी एव प्रतीयते। अजहत्स्वार्थावृत्तिपक्षे राजन्विशिष्टपुरुषः अस्मिन् बोधेऽपि न कापि समस्या यतो हि तत्र स्वत्वसम्बन्धेन राजविशिष्टः पुरुषः इत्याकारकबोधं प्रति राजपदाव्यवहितोत्तरपुरुषपदत्वरुपाकाङ्क्षाज्ञानरूपकारणस्य विद्यमानत्वात्।

अयमेव व्यपेक्षापक्षः मतान्तरत्वेन भाष्यकारैरुक्तः। तथा च भाष्ये एकं वचनमुक्तं ''परस्परव्यपेक्षां सामर्थ्यमेके' इत्युक्तं भाष्कृता।[1] न च यदि व्यापेक्षापक्षं स्वीकुर्मः तदा 'राजपुरुष' इत्यदौ समासेऽपि राजपदार्थस्य स्वातन्त्र्येण अर्थोपस्थापकत्वेन राज्ञः पुरुषः इति वाक्ये यथा स्वातन्त्र्येणोपस्थितिसत्वात् ऋद्धपदार्थस्य विशेषणत्वेन अन्वयः राजपदार्थे भवति तद्वद् समासघटकराजपदार्थेऽप्यृद्धस्येति विशेषणान्वयः स्यात्। राजपदार्थस्य विशेषणान्वयभूतस्वातन्त्र्येणोपस्थिति सत्वादिति वाच्यम् न च वाच्यम् ''सविशेषणानां वृत्तिर्न, वृत्तस्य विशेषणयोगो न इति भाष्यवार्तिकात् न दोषावकाशः।[2] वृत्तिभेदनिरूपणान्तरमेव वाच्यभेदेन वृत्तेः त्रैविध्यमुक्तं भाष्ये। तत्रत्यं भाष्यं सामर्थ्यंनाम भेदः, संसर्गो वा। अपर आह भेदसंसर्गौ वा सामर्थ्यमिति। कः पुनः भेदः संसर्गो वा। इह राज्ञः इत्युक्ते सर्वं स्वं (अश्वो गृहं वा) प्रसक्तं पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः। इहेदानीम् 'राजपुरुषमानय' इत्युक्ते राजा पुरुषं निवर्तयति अन्येभ्यः स्वामिभ्यः।[3] पुरुषो राजानं निवर्तयति अन्येभ्यः स्वेभ्य इति। संसर्गाविनाभावी भेदः अर्थात् भेदं विना संसर्गः न सम्भवति यद्यपि भेदसंसर्गयोः समनियतत्वं तथाऽपि भेदोवाच्यः तदा संसर्गोऽनुमेयः। यदा च संसर्गोवाच्यः तदा भेदोऽनुमेयः।

अयन्तु भेदस्य समासार्थत्वे प्रमाणम्। एवं 'राज्ञः इत्युक्ते सर्वं स्वं प्रसक्तम्, पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः। 'राजपुरुषः' इत्युक्ते राजा स्वत्वेन पुरुषमेव सम्बध्नाति नान्यम्, पुरुषः स्वामित्वेन राजनमेव सम्बध्नाति नान्यम् इति संसर्गः समासार्थः। उभौ वा यौगपद्येनाश्रीयमाणौ सामर्थ्यमित्युभयं समासार्थः। तत्र भेदस्य समासार्थत्वे राजपुरुष' इत्यादौ राजप्रतियोगिकः पुरुषानुयोगिकः भेदः राजा न पुरुषः इत्याकारकः, उत पुरुषप्रतियोगिकः राजानुयोगिकः पुरुषः न राजा इत्याकारकः, अथवा राजविशिष्टपुरुषप्रतियोगिकः राजनुयोगिकः राजपुरुषः न राजा इत्याकारकः वा राजपदार्थस्य पुरुषे विशेषणत्वेन[4] 'एकत्रविशेषणतयाऽन्वितस्यापरत्र विशेषणत्वायोगात्' भेदे विशेषणत्वायोगः। द्वितीयः भेदस्य प्रतियोगतावच्छेदकेन सह विरोधात् राजनि पुरुषभेदस्य वाच्यत्वे तत्र पुरुषत्वस्य सत्वेन पुरुषभेदस्यबाधितत्वात् अतः भेदस्य वाच्यत्वे राजपुरुषः इत्यनेन समासेन कीदृशः बोधः भविष्यति इति जिज्ञासायामुक्तं कौण्डभट्टेन अराजकीयभिन्नः पुरुषः अर्थात्[5] ''राजभिन्नसम्बन्धिभिन्नः'' तेन राजपुरुषः सुन्दरः इतिवत् राजपुरुषो देवदत्तस्य च इति बुद्धिः नोदेत्। यतो हि राजभिन्नसम्बन्धिभिन्नः इति इयं बुद्धिः राजभिन्नसम्बन्धि इति बुद्धिं प्रतिबध्नाति तेन न राजपुरुषो देवदत्तस्य इति प्रयोगापत्तिः। संसर्गस्य वाच्यत्वे तु राजसम्बन्धवान् पुरुषः इत्यर्थस्य लाभः भवति। न च भेदस्य अवाच्यत्वे राजपुरुषो देवदत्तस्य च इति प्रयोगापत्तिरतो भेदस्य वाच्यत्वमिति चेत्तर्हि संसर्गस्याऽप्यवाच्यत्वे अस्वामिके पुरुषे राजभिन्नासम्बन्धिसत्त्वात् ''राजपुरुषः'' इति प्रयोगापत्तिरतः भेदसंसर्गौ उभौ वाच्यौ तेन 'राजपुरुषः' इत्यनेन अराजकीयभिन्नो राजसम्बन्धवाँश्चायं पुरुषः इति बोधः सञ्जायते। सार्धैककारिकया कौण्डभट्टेन सम्प्रगमपि व्याख्यानं प्रतिपादितम्-जहत्स्वार्थाजहत्स्वार्थे द्वेवृत्ती ते पुनः भेदः संसर्गः उभयं चेति वाच्यव्यवस्थिते।[6]

अजहत्स्वार्थावृत्तिपक्षाऽभिन्नः यो हि व्यपेक्षापक्षः अथ च जहत्स्वार्थावृत्तिपक्षाऽभिन्नः योहि एकार्थीभावपक्षः उभयोः मध्ये कः पक्षः श्रेयस्करः कश्च पक्षः वैयाकरणमतस्य प्रतिपादकः इति विचिकित्सायां महतासमारम्भेण सिद्धान्तितोऽयं पक्षः-

**समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्**
**बहूनां वृत्तिधर्माणां वचनैरेव साधने।**

---

[1] व्याकरणमहाभाष्यम् उदद्योतपरिवृतप्रदीपोद्भासितम् द्वितीय अध्यायः प्रथमआह्निकम राष्ट्रिय संस्कृत संस्थानम् नई दिल्ली २००६, पृ. १४

[2] व्याकरणमहाभाष्यम् उदद्योतपरिवृतप्रदीपोद्भासितम् द्वितीय अध्यायः प्रथमआह्निकम राष्ट्रिय संस्कृत संस्थानम् नई दिल्ली २००६, पृ. ३२

[3] प्रभाव्याख्यया दपर्ण व्याख्यया च समुल्लसितः वैयाकरणभूषणसारः आदर्शग्रन्थमालाया द्वितीय पुष्पम् २७४

[4] प्रभाव्याख्यया दपर्ण व्याख्यया च समुल्लसितः वैयाकरणभूषणसारः आदर्शग्रन्थमालाया द्वितीय पुष्पम् २७०

[5] प्रभाव्याख्यया दपर्ण व्याख्यया च समुल्लसितः वैयाकरणभूषणसारः आदर्शग्रन्थमालाया द्वितीय पुष्पम् २७७

[6] प्रभाव्याख्यया दपर्ण व्याख्यया च समुल्लसितः वैयाकरणभूषणसारः आदर्शग्रन्थमालाया द्वितीय पुष्पम् २७९

**स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः।**[1]

समास पदं वृत्तिमात्रोपलक्षणम्। अर्थात् यथा समासे एका विशिष्टा अतिरिक्ता शक्तिः वर्तते तथैव कृदादिषु चतुर्ष्वपि वृत्तिषु तादृशी विशिष्टा एका समुदायशक्तिः वरीवर्ति इति भावः। यतो हि एकार्थीभावसामर्थ्यस्य प्रतिपादकं विशिष्टं सूत्रं वर्तते समर्थः 'पदविधिः' इति सूत्रम्। पदोद्येश्यकविधौ एव सूत्रमिदं प्रवर्तते। पदोद्योश्यकविधित्वञ्च[2] ''कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चस्वपि वृत्तिष्वस्त्येव। समासस्य पदोद्येश्यक विधित्वं तु प्रायः विदितमेव। किन्तु कृत्प्रत्ययेषु तद्धितप्रत्ययेषु वा कथं पदोद्योश्यकविधित्वं सम्भवति। यतो हि कृत्प्रत्ययाः धातूद्येश्यका अथ च तद्धितप्रत्ययाः प्रातिपादिकोद्येश्यकाः कृत्प्रत्ययविधायकेषु शास्त्रेषु सर्वत्र धातोः इत्यस्य अधिकारः प्रचलति अथ च तद्धित्प्रत्ययविधायकेषु शास्त्रेषु 'प्रातिपदिकात्' इत्यस्य अधिकारः वर्तते। तेन इदमायाति कृदादिप्रत्ययाः धातुप्रातिपदिकोद्येश्यकाः न तु पदोद्येश्यकाः अतः कुतः पदविधित्वं एतेषु प्रत्ययेषु इति प्रश्ने प्रभाकारेण पदविधित्वस्य परिष्कारः कृतः पदविधि शब्देनात्र[3] पदसंज्ञाप्रयोजकप्रत्ययोत्पत्तिप्रयोजकसंज्ञानिष्ठविधेयतानिरूपितोद्येश्यतावच्छेदक सम्पादकशास्त्रविधेयस्यैव ग्रहणत्। तथाहि-पदसंज्ञा प्रयोजकाः प्रत्ययाः कप्प्रत्ययावधिकयजादिभिन्नस्वादयस्तिङश्च तादृशप्रत्ययोत्पत्तिप्रयोजकसंज्ञाधातु, संज्ञा प्रातिपदिक संज्ञा च। प्रातिपदिक संज्ञा धातुसंज्ञान्यतरनिष्ठविधेयतानिरूपितोद्येश्यता कृदन्ततद्धितान्तादिनिष्ठा- तदऽवच्छेदकः कृत्प्रत्ययः, तद्धितप्रत्ययः, कृत्त्वस्य तद्धित्त्वस्य सनादेः सम्पादकं शास्त्रं ण्वुल्तृचौ, तस्यापत्यम्, तद्विधेयत्वं कृदादिषु इति पदविधित्वेन कृदादिप्रत्ययानाम् अपि ग्रहणं भवति नास्ति दोषावकाशः।

''समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्'' कारिकायाः अर्द्धांशस्य अयमभिप्रायः यथा पङ्कजशब्दे नैयायिकादयः व्यपेक्षावादिनः अवयवशक्त्यतिरिक्तिसमुदायशक्तिं स्वीकुर्वन्ति तद्वत् समासेऽपि सा शक्तिः स्वीकर्त्तव्या तत्र पङ्कजशब्दात् पद्यमत्वेनरुपेण बोधाय समुदायशक्तिः अवश्यं स्वीकरणीया विद्यते। यदि पङ्कजशब्दे अवयवशक्तिः स्यात् तदा पङ्के जातः इति अवयवार्थेन कुमुदादीनामपि बोधापत्तिः भविष्यति। अतः पङ्कजशब्दे अवयवानां नैरर्थक्यमवश्यमेव स्वीकरणीयम् यदि तत्र समुदायशक्तिं व्यपेक्षावादिनः स्वीकुर्वन्ति तद्वत्समासेऽपिसमुदायशक्तिः स्वीकरणीया पद्मत्वावच्छिन्नेशक्तिं विना पद्मत्वरुपेण पद्मोपस्थितेरसंभवात्, यतो हि तद्धर्मप्रकारकोपस्थितिं प्रति तद्धर्मावच्छिन्न शक्ति ज्ञानस्य कारणत्वात्। घटत्वाविच्छन्नेघटपदं शक्तं इत्याकारकशक्तिज्ञानं विना घटपेदन घटत्वप्रकारकघटविशेष्यकबोधः न संभवति। अतः समुदायशक्तिं विना पद्यमत्वप्रकारक बोधानुदयेन समुदायशक्तिः स्वीकरणीया। एवमेव चित्राः गावः यस्येति चित्रगोसम्बन्धित्व सामान्यरूपेण गोस्वामिनो बोधसंभवेऽपि स्वामित्वेन विशेषरुपेणान्यपदार्थस्य स्वामिनः बोधार्थं चित्रगु इत्यादौ समुदायशक्तिकल्पना स्वीकरणीया। यदि लक्षणयैव चित्रगौस्वामिनः उपस्थितिः स्वीक्रियते, तदा पङ्कजशब्दे समुदायशक्तिः नैव सिध्येत्। यदि लक्षणयैव सर्वत्र निर्वाहः स्यात् तर्हि[4] वर्षासु रथकारोऽग्निमादधीत् अनया श्रुत्या वर्षाकाले रथकारस्याग्न्याधानविधानमप्ययुक्तं स्यादिति। अयं भावः रथकारशब्दः त्रैवर्णिकातिरिक्ते कस्मिंश्चित् जातिविशेषे रुढ़ः। तदुक्तं माहिष्येण करण्यां तु रथकारः प्रजायते। वैश्यायां क्षत्रियादुत्पनो माहिष्यः। शूद्रायां वैश्यादुत्पन्ना करणी इति।

एवञ्च वर्षासु रथकारः अग्निमादधीत इति श्रुतौ रथकारशब्देन त्रैवर्णिकातिरिक्तः जातिविशेषः गृह्यते। न तु रथं करोतीति व्युत्पत्या रथनिर्माता यः कश्चिद्विप्रादिः योगापेक्षया रूढ़ेः शीघ्रोपस्थितिकत्वाद् अन्तरङ्गत्वेन बलवत्वादिति भावः। यदि लक्षणयैव निर्वाहः स्यात् तर्हि जातिविशेषस्य लक्षणयैव प्रतीतिः स्यात् तेन समुदायशक्तिं स्वीकृत्य त्रैवर्णिकातिरिक्तस्य जाति विशेषस्य अधिकारित्वं (प्रकल्प्य) स्वीकृत्य अपूर्वविद्या कल्पनमयुक्तं स्यात्। अतः समुदायशक्तिः अत्यन्तं आवश्यकी। समुदायशक्तिसाधकान्तरमपि उक्तं कौण्डभट्टेन बहूनां वृत्तिधर्माणां वचनैरेव साधने स्यान्महद्गौरवं, तस्माद् एकार्थीभावः आश्रितः।[5] वृत्तेः धर्माः विशेषण लिङ्ग सङ्ख्याद्ययोगादयस्तेषां वचनैः साधने गौरवमित्यर्थः अयं भावः-समुदायशक्त्यस्वीकारे 'राज्ञः पुरुषः' इत्यत्र वाक्ये राजपदार्थस्य स्वातन्त्र्येण उपस्थितिः सत्वात् यथा ऋद्धस्य राज्ञः पुरुषः इतिवद् 'राजपुरुषः' इत्यत्रापि अवयवशक्तिस्वीकारपक्षे राजपदार्थस्य स्वातन्त्र्येण उपस्थितिः स्वीकारात् ऋद्धस्य'राजपुरुषः इति प्रयोगापत्तिः स्याद्। अतःतद्दोषवारणार्थं सविशेषणानां वृत्तिः न वृत्तस्य विशेषणयोगो न इत्यादि वचनं स्वीकरणीयं एवं मृगक्षीरम् इत्यादौ मृगादिपदे स्त्रीत्वाप्रतीत्यर्थं, तथा च राज्ञो राज्ञां वेति पुरुषः इत्यर्थे राजपुरुषः इत्यत्र वृत्तिघटकराजपदे संख्याविशेषस्य अप्रतीत्यर्थं तत्र वचनं कार्यं व्यपेक्षावादिनां मते। समुदायशक्तिः स्वीकारे तु विशेषणस्य अयोगार्थं, संख्याविशेषस्य अप्रतीत्यर्थं, स्त्रीत्वस्य अप्रतीत्यर्थं च वचनकल्पनायाः आवश्यकता नास्ति। अत एव भाष्ये उक्तम् 'इमे तर्ह्येकार्थीभावकृताः विशेषाः, संख्याविशेषो, व्यक्ताभिधान मुपसर्जनविशेषण चायोगे। यदि समुदायशक्तिः न स्वीक्रियते चेत् व्यपेक्षायां सामर्थ्ये सति समासोऽपि भवति तर्हि अवश्यं वाक्यप्रयोगे प्राप्ते आरभ्यमाणः समासः नित्यं वाक्य

---

[1] प्रभाव्याख्यया दपर्ण व्याख्यया च समुल्लसितः वैयाकरणभूषणसारः आदर्शग्रन्थमालाया द्वितीय पुष्पम् २७८

[2] प्रभाव्याख्यया दपर्ण व्याख्यया च समुल्लसितः वैयाकरणभूषणसारः आदर्शग्रन्थमालाया द्वितीय पुष्पम् २८१

[3] प्रभाव्याख्यया दपर्ण व्याख्यया च समुल्लसितः वैयाकरणभूषणसारः आदर्शग्रन्थमालाया द्वितीय पुष्पम् २७९

[4] प्रभाव्याख्यया दपर्ण व्याख्यया च समुल्लसितः वैयाकरणभूषणसारः आदर्शग्रन्थमालाया द्वितीय पुष्पम् २८१

[5] प्रभाव्याख्यया दपर्ण व्याख्यया च समुल्लसितः वैयाकरणभूषणसारः आदर्शग्रन्थमालाया द्वितीय पुष्पम् २७०

निवर्तकं स्यात्। अतः वाक्यस्यनिवृत्तिरेव स्याद् तद्वारणाय 'विभाषा' इत्यत्माकम् अधिकारसूत्रं अत्यन्तमावश्यकं भवेत्। किन्तु एकार्थीभाववादिनां वैयाकरणानां मते एकार्थीभावविवक्षायां समासस्य व्यपेक्षाविवक्षायां वाक्यस्य च सिद्धतया विभाषा इति सूत्रं न कार्यम् अत एव भाष्ये उक्तं ''वा वचनानर्थक्यम्'' व्यपे क्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्यः इति भाष्यकारेण दूषणमप्युक्तम्। एवमेव यदि समुदाये शक्तिः न स्यात् तदा धवखदिरौ, गोरथः, घृतघटः गुडधाना, इत्यादौ इतरेतरयोग-निष्क्रान्त युक्त पूर्ण मिश्राद्यर्थो वाचनिको वाच्यः इति अतिगौरवं स्यादिति दूषणान्तरमप्युक्तं कौण्डभट्टेन, अयं भावः-धवश्च खदिरश्चेति वाक्ये चकारप्रयोगो भवति यदि अवयवशक्त्यतिरिक्तसमुदायशक्तिः न अङ्गीक्रियते तदा चशब्दस्य प्रयोगः प्राप्तस्तस्य लोपो विधेयः। एकार्थीभावपक्षे तु समुदायशक्त्यैव धवखदिरसाहित्यस्य प्रतीतिः भवति। अत एव कौण्डभट्टेन मूले उल्लिखितं-

**चकारादि निषेधोऽथबहुव्युत्पत्तिभंजनम्।**
**कर्त्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितिः।**[1]

चकारादिः प्रयोगः कथं अवयवशक्तिवादिनां मते प्राप्तः कथञ्च तस्य निषेधः कर्त्तव्यः इति विषये मया पूर्वमेव उक्तम्। इदानीं बहुव्युत्पत्तिभञ्जनं तेषां व्यपेक्षावादिनां मते प्रदर्शनीयं वर्तते। अयं भावः चित्रगुः इत्यत्र चित्राऽभिन्नगो स्वामी अस्यार्थस्य प्रतीतिः भवति किन्तु समुदायशक्तिं विना स्वाम्यर्थस्य प्रतीतिः नैव जायते अतः समुदायशक्तिः स्वीकरणीया। न च तत्र लक्षणक्षया चित्राऽभिन्नगोस्वामी इत्यर्थस्य बोधः भविष्यति न समुदायशक्तिः आवश्यकी अस्मिन् पूर्वपक्षे प्राप्ते वैयाकरणैः अवान्तरपूर्वपक्षः उत्थापितः 'चित्रगुः' इत्यत्र कस्य पदस्य लक्षणा यदि चित्र पदस्य चित्रस्वामी इत्यर्थे लक्षणा चेत् चित्रस्वामी गौः इति बोधापत्तिः यदि अन्त्यपदस्य गोपदस्य गोस्वामिनि अर्थे लक्षण तदा गोस्वामी अभिन्न चित्रः इत्यन्वयबोधापत्तेः। चित्रपदार्थस्य गोपदार्थस्य वा लक्ष्यैकदेशत्वेन तत्र गवादेरन्वयायोगात् यतो हि चित्रपदस्य चित्रस्वामी तथा गोपदस्य गोस्वामी इत्यर्थः भवति लक्षणायाम् अत्र उभयोः अर्थयोः पदार्थैकदेशत्वेन अतः परस्परान्वयः न सम्भवति पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन इतिव्युत्पत्तिवशात् किन्तु अन्वयस्तु उभयोः पदार्थयोः मध्ये ईप्सितः वर्तते। न च चित्राऽभिन्ना गौः इति शक्तयुपस्थाप्ययोरन्वयबोधोत्तरं ता दृशगोस्वामी गोपदेन लक्ष्यते। तत्र गोपदस्य चित्रपदस्य वा विनिगमना विरहेण लक्षकत्वासम्भवात्। तत्र नैयायिकः कथयति 'चित्रगु' इत्यत्र गोपदस्यैव लक्षणा गोपदे लक्षणायां स्वत्वनिरूपित स्वामित्वरूपसाक्षात् शक्यसम्बन्धःवर्तते अन्यपदार्थेन सह। चित्रपदस्य तु गुणवाचित्वात् स्वसमावायिनिष्ठस्वत्वनिरूपितस्वामित्वरूपः परम्परात्मकःशक्यसम्बन्धःअन्यपदार्थेनसह विद्यते। शक्यसम्बन्धकृतं गौरवमादाय पूर्वपदस्य लक्षणां न स्वीकुर्मःअपितु उत्तरपदस्यैव लक्षणा स्वीक्रियते। उत्तरपदस्य लक्षणापक्षे शक्यसम्बन्धात्मकं लाघवमेव विनिगमकं विद्यते गोपदे लक्षणायां। 'चित्रगुः' इत्यादौ लक्षणासंभवेऽपि किन्तु प्राप्तोदकः इत्यादौ लक्षणया निर्वाहः नैव भवति।अषष्ठ्यर्थबहुव्रीहिस्थलेषु लक्षणया अभीष्टार्थस्य लाभःनैव कर्तुं शक्यते।अथ च समुदायशक्त्यस्वीकारे बह्वीनां व्युत्पत्तीनां भङ्गापत्तिः दोषः आगच्छति।इदानीमेकमुदाहरणत्वेन प्राप्तोदकमिति लक्ष्यमादाय वयं विचारयामः। प्राप्तं उदकं यं इत्यर्थे प्राप्तोदकः अयं समस्तप्रयोगः भवति। अत्र समासेन 'उदककर्तृकप्राप्तिकर्म' इत्याकारकः समुदायशक्त्या बोधो भवति। वाक्येन तु यत्कर्मकप्राप्तिकर्म उदकम् इति बोधः जायते। व्यपेक्षावादिनां मते तु प्राप्त पदार्थस्य पूर्वम् उदकपदार्थे अभेदसम्बन्धेन अन्वयः भवति तेन प्राप्तिकर्त्रभिन्नो दकमिति बोधः भवति तदनन्तरम् तात्पर्यानुपपत्तिप्रतिसन्धानेन उदकपदस्य उदकसम्बन्धिनि इत्यर्थे लक्षणायां प्राप्तिकर्त्रभिन्नोदकसम्बन्धित्वेन ग्रामः प्रतीयते अतः लक्षणया अभीष्टार्थस्य लाभः भवितुमर्हति इति उच्यमाने वैयाकरणः कथयति लक्षणया नैव अभीष्टार्थः लभ्यते यतो हि लक्षणया प्राप्तिकर्त्रभिन्नोदकसम्बन्धित्वेन ग्रामः प्रतीयते न तु उदककर्तृकप्राप्तिकर्मत्वेन ग्रामः प्रतीयते। किन्तु अस्माकमभीष्टार्थः उदककर्तृकप्राप्तिकर्मीभूतः ग्रामः अयमेव विद्यते। सः तु उदकपदस्य लक्षणायामपि न भवति अतः समुदायशक्तिः आवश्यकी वर्तते। वैयाकरणानां मते तु प्राप्तोदकमिति समस्तस्य पदस्यैव उदककर्तृकप्राप्तिकर्म इत्यर्थे समुदायशक्तिः वर्तते अतः नास्ति काचित् समस्या। इदानीं प्राप्तोदकपदे बहुव्युत्पत्तिभञ्जनत्वमुपस्थाप्यते "प्राप्तेतिक्तप्रत्ययस्यैव कर्त्रर्थकस्य कर्मणि लक्षणेति चेत्तर्हि समानाधिकरण-प्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरुदकाभिन्नप्राप्तिकर्मेति स्यात् अन्यथा समानाधिकरणप्रातिपदिकार्थयोरभेदान्वय-व्युत्पत्तिभङ्गापत्तेः"[2] अनेन कौण्डभट्टीयमूलग्रन्थेन प्राथमिकः व्युत्पत्तिविरोधः उद्भावितः वर्तते। अयमाशायः वर्तते अस्य ग्रन्थस्य प्राप्तोदकमित्यत्र घटकीभूतप्राप्तपदार्थः प्राप्तिक्रियाकर्तारुपः वर्तते।अत्र प्रपूर्वकाद् आप्धातोः गत्यर्थाकर्मकश्लिषशीङ्स्थाऽसवसजनरुहजीर्यतिभ्यश्च इति सूत्रेण कर्तरि क्तप्रत्ययः भवति।तस्यैव क्तप्रत्ययस्य कर्तृरुपार्थस्य स्ववृत्तिव्यापारजन्यफलाश्रयत्वसम्बन्धेन कर्मणि अर्थे लक्षणां स्वीकृत्य उदकस्य प्राप्तौ कर्तृतयाऽन्वयं कृत्वा उदकनिष्ठप्राप्तिकर्मेत्यभीष्टार्थलाभः सञ्जायते अतः प्राप्तोदकः इत्यादौ अपि न समासशक्तिः स्वीकरणीया विद्यते।अस्य पक्षस्य खण्डनं व्युत्पत्ति विरोधत्वेन कृतं वर्तते यतो हि एका व्युत्पत्तिःवर्तते "समानाधिकरणनामार्थयोः अभेदातिरिक्तसम्बन्धेन नान्वयः" अत्र प्राप्तोदकयोः समानविभक्तित्वेन समानाधिकरणत्वात् उभयोः नामार्थयोः अभेदान्वये सति उदकाभिन्नप्राप्तिकर्म इत्यनिष्टबोधापत्तिः प्रसज्यते।अत्र यदि नामार्थयोः अभेदेनान्वयं न स्वीकुर्मः तदा समानाधिकरणनामार्थयोःअभेदातिरिक्तसम्बन्धेनान्वयः अनया व्युत्पत्या सह विरोधः अवश्यमेव

[1] प्रभाव्याख्यया दपर्ण व्याख्यया च समुल्लसित: वैयाकरणभूषणसार: आदर्शग्रन्थमालाया द्वितीय पुष्पम् २८४

[2] प्रभाव्याख्यया दपर्ण व्याख्यया च समुल्लसित: वैयाकरणभूषणसार: आदर्शग्रन्थमालाया द्वितीय पुष्पम् २८६

आगच्छति। एवमेव लक्षणयोपस्थापिते प्राप्तिकर्मणि घटकीभूते प्राप्त्यर्थे उदकस्य कर्तृत्वेनान्वयं स्वीकृत्य उदककर्तृकप्राप्तिकर्म अयमभिप्रेतार्थः लभ्यते इति उच्यते तदा " नामार्थधात्वर्थयोः साक्षात् भेदेनान्वयः न भवति" अनया व्युत्पत्या सह विरोधः प्रसज्यते। यदि इमां व्युत्पत्तीं न स्वीकुर्मः तदा देवदत्तः पच्यते इत्यत्र देवदत्तस्य साक्षात् कर्तृत्वरुपभेदसम्बन्धेन पच्धात्वर्थपाकक्रियायामन्वयसम्भवेन देवदत्तः पच्यते इदं वाक्यमनन्वितार्थकमिति इष्टप्रवादानुपपत्तिः प्रसज्येत।कुतः अयं प्रवादः प्रचलति यत् इदं वाक्यमनन्वितार्थकं वर्तते तत्र इदमेव कारणं देवदत्तशब्दोत्तरं तृतीयाविभक्तिः नास्ति अतः देवदत्तस्य कर्तृत्वेन पाकक्रियायामन्वयासम्भवेन अत एव देवदत्तः पच्यते इदं वाक्यमनन्वितार्थकं सञ्जातं परन्तु प्राप्तोदकः ग्रामः इत्यत्र यथा उदकस्य प्राप्तिरुपधात्वर्थे कर्तृत्वेन अन्वयं स्वीकुर्वन्ति व्यपेक्षावादिनः तद्वत् देवदत्तः पच्यते इत्यत्रापि अन्वयसम्भवेन अनन्वितार्थकस्य वाक्यस्य प्रयोगापत्तिः व्यपेक्षावादिनां मते प्रसज्यते। इदानीं पुनः व्यपेक्षावादी आक्षिपति यदा उदकस्य प्राप्तिरुपधात्वर्थे कर्तृत्वेनान्वयं स्वीकुर्मः तदा एव नामार्थधात्वर्थयोः साक्षात् भेदेनान्वयः न भवति अनया व्युत्पत्या सह विरोधः आगच्छति। तिङन्तस्थलवत् प्रत्ययार्थप्राधान्यस्य त्यागेन यदा प्राप्तपदार्थः कर्तृत्वविशिष्टप्राप्तिरुपः स्वीक्रियते तदनन्तरम् उदकस्य प्राप्तपदार्थविशेषणीभूते कर्तरि अभेदसम्बन्धेनान्वयं कृत्वा उदकाऽभिन्नकर्तृविशिष्टप्राप्तिः अयमर्थः सम्पद्यते तदनन्तरं प्राप्तिसम्बन्धित्वेन ग्रामः लक्ष्यते। अतः उदकाभिन्नकर्तृविशिष्टप्राप्तिसम्बन्धिग्रामः इति अभीष्टार्थस्य लाभसम्भवेन नामार्थधात्वर्थयोः साक्षात् भेदेननान्वयः इति व्युत्पत्या अविरोधेन च समासे समुदायशक्तिः न स्वीकरणीया एतादृशे पूर्वपक्षे उपस्थिते सति कौण्डभट्टः उत्तरयति "प्राप्तेः धात्वर्थतया क्तार्थकर्तारं प्रति विशेष्यतायाः असंभवात् प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमिति व्युत्पत्तेः प्राप्तपदे प्राप्तेर्विशेष्यत्वे तस्याः एव नामार्थत्वेनोदकेन सममभेदान्वयापत्तेश्च। अयमाशयः प्राप्तपदेन प्राधान्येन प्राप्त्यर्थस्य भानं नैव भवितुमर्हति यतो हि अत्र प्राप्तिरुपः प्रकृत्यर्थः कर्तृरूपः प्रत्ययार्थः तयोः मध्ये प्रत्ययार्थस्य विशेष्यत्वेन कृदन्तस्थले भानस्वीकारेण प्राप्तेः प्राधान्येन भानं न जायते अतः उदकाभिन्नकर्तृत्वविशिष्टप्राप्त्यात्मकस्य अर्थस्य प्रधानत्वाभावेन क्तार्थकर्ता विशेषणत्वेन प्रकृत्यर्थप्राप्तौ न अन्वेति प्राप्तेः विशेष्यत्वाभावात्। तिङन्तस्थले प्रत्ययार्थप्राधान्यत्यागे प्रमाणं वर्तते " भावप्रधानमख्यातमिति" वचनं किन्तु कृदन्तस्थले प्रत्ययार्थप्राधान्यत्यागे किञ्चित् प्रमाणं नोपलभ्यते।प्राप्तेः नामजन्यप्रतीतविशेष्यत्वात् प्राप्त्यैव सह उदकस्याभेदान्वयः भवेत् किन्तु तयोः द्रव्यक्रिययोः मध्ये अत्यन्तभेदादभेदान्वयः बाधितः वर्तते अतः अभेदान्वयापत्तेः अस्य दोषस्य कः अभिप्रायः इदानीं टीकाकृद्भिः प्रदर्शितः अभिप्रायः वर्ण्यते नामजन्यप्रतीतविशेषणीभूतेन कर्त्रा सह उदकस्याभेदान्वयः सर्वथा असंभवीति अभेदान्वयापत्तेः इत्यस्य विशेषणीभूतकर्त्रा सहोदकस्य अभेदान्वयबोधानापत्तेरित्यर्थः। एतावत्पर्यन्तं व्यपेक्षावादिनां मते बहुव्युपत्तीनां विरोधः वर्णितः अस्ति। अस्माकं मते तु समुदायशक्तिस्वीकारेण न तत्तद्व्युत्पत्तिविरोधः वर्तते यतो हि इमाः व्युत्पत्तयः भिन्नोपस्थितिविषये प्रवर्तन्ते। प्राप्तोदकः इत्यादिवत् अषष्ठ्यर्थबहुव्रीहिस्थलेषु व्यपेक्षावादिभिः समुदायशक्तिकल्पना अवयवशक्तित्यागश्च अभ्युपेयः विद्यते। अत एव श्रीमता कौण्डभट्टेन साधकान्तरत्वेन समर्थितः वर्तते अयं पक्षः।

अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तर कल्पना।क्लृप्तत्यागश्चास्ति तव तत्किं शक्तिं न कल्पयेः॥ अनया कारिकया सर्वत्र समासे अवयवशक्त्यतिरिक्तसमुदायशक्तेः समर्थनं कृतमस्ति।यथा प्राप्तोदकादौ अगत्या समुदायशक्तिकल्पना क्रियते तथैव सर्वत्र समासे सा विशिष्टशक्तिः स्वीकर्त्तव्या वर्तते। कुत्रचित् समासेविशिष्टशक्तिः कुत्रचित् अवयवशक्तिः इति अर्धजरतीयस्यानौचित्येन सर्वत्रैव समासे विशिष्टशक्तिः अवश्यमेव स्वीकरणीया विद्यते। समासे शक्त्यस्वीकारे एकः महान् दोषः आगच्छति प्रातिपदिकसंज्ञानापत्तिरूपः यतो हि अर्थवदधातुरप्रत्ययः प्रातिपदिकम् अनेन शास्त्रेण धातुभिन्नस्य प्रत्ययभिन्नस्य प्रत्ययान्ततदादिभिन्नस्य अर्थवतः शब्दस्वरुपस्य प्रातिपदिकसंज्ञा विधीयते। समासे शक्त्यभावे अर्थवत्त्वाभावेन प्रातिपदिकसंज्ञा न भविष्यति तेन सुपो धातुप्रातिपदिकयोः अस्य शास्त्रस्य समासस्थले अप्रवृत्तौ समासघटकीभूतसुपां लुक् न भवेत् यतो हि समासस्य प्रातिपदिकत्वाभावात् प्रातिपदिकावयवभूतसुपः तेन शास्त्रेण लुग्विधानादिति भावः। अवयवशक्तिवादिनां मते समासस्य अवयवानामर्थवत्वेऽपि समुदायस्य अर्थवत्त्वाभावेन प्रातिपदिकसंज्ञा न जायते। अतः समासस्य प्रातिपदिकसंज्ञाविधानार्थं समासे विशिष्टशक्तिः सर्वैरपि अङ्गीकरणीया वर्तते। कृततद्धितसमासाश्च अनेन सूत्रेण समासस्य प्रातिपदिकसंज्ञा न कर्तुं शक्यते तत्रत्य समासग्रहणस्य भाष्यकृता नियमार्थत्त्वप्रतिपादनात्। अत एव राज्ञः पुरुषः इत्यादिवाक्यस्य प्रातिपदिकसंज्ञा न भवति।

**निष्कर्षः**

समासशक्तिः विषये वैयाकरणाः विशिष्टशक्तिपक्षमेव स्वीकुर्वन्ति। अवयवशक्तिपक्षे बहुव्युत्पत्तिभङ्गापत्त्यात्मकाःदोषाः समागच्छन्ति एवमेव समासे शक्त्यस्वीकारे समस्तपदानां प्रातिपदिकत्वानापत्तिरुपः महान् दोषः आगच्छति। अतः कौण्डभट्टेन व्यपेक्षावादिनां मतं समासशक्तिविषये निराकृतमस्ति।

********************

*ISSN 2348-7828*

# जैनवृत्तिस्वरूपविमर्शः

डा. बिपिन कुमार झा[1] डा. दीपिका दीक्षित[2]

**<u>शोधसारः</u>**

जैनदर्शने शब्दाः केवलं संचारस्य माध्यमरूपे नास्ति, अपितु ज्ञानप्राप्तेः तत्त्वचिन्तनस्य च महत्त्वपूर्णसाधनरूपे गृह्यते। शब्दानां सामर्थ्यं तदर्थं च अवगन्तुं जैनदार्शनिकपरम्परा अनेकान्तवाद, स्याद्वाद, नयवाद-इत्यादीनां सिद्धान्तानाम् आश्रयं लभते। अपि च वृत्तिः अपि एतद्वदेव शब्दानां व्याख्याने महत्त्वपूर्णतत्त्वं स्थानं प्राप्नोति। जैनदर्शने शब्दार्थयोः सम्बन्धः अनेकान्तवादस्य सिद्धान्तात् परिलक्षितः भवति। कश्चदपि शब्दः पूर्णतया सत्यम् असत्यं वा न भवति, अपितु तस्य अर्थः सन्दर्भानुगुणं परिवर्तयितुं शक्नोति। उदाहरणतया "शुद्धात्मा" आत्मनः शाश्वतस्वभावानुसारेण एतत् वचनं सत्यम्। "आत्मा बन्धने अस्ति" एतत् वचनं व्यावहारिकदृष्ट्या सत्यमपि भवितुं शक्नोति।

जैनदर्शने शब्दाः शब्दमात्रं न अपितु ज्ञानप्राप्तेः साधनं भवन्ति। शब्दशक्तेः त्रयः प्रकाराः अभिधा, लक्षणा, व्यञ्जना चापि जैनदर्शने महत्त्वपूर्णां भूमिकां निर्वहन्ति। वृत्तिः शब्दानां भिन्नार्थानां स्पष्टीकरणे सहाय्यं विदधाति। अनेकान्तवादप्रभृति शब्दव्याख्यायाः बहुपक्षीयं दृष्टिकोणं प्रददाति। अतः जैनदर्शने शब्दप्रवृत्तिप्रयोगः केवलं भाषायाम् एव सीमितः नास्ति, अपितु दर्शनं मोक्षमार्गं च नेतुम् अपि महत्त्वपूर्णं साधनम् अस्ति।

**<u>कुञ्जिशब्दाः</u>- जैनदार्शनिकपरम्परा अनेकान्तवाद, स्याद्वाद्, नयवाद, वृत्तिः।**

संस्कृतवाङ्मये विविधेषु स्थलेषु भाषायाः महत्त्वं पूर्वाचार्यैः प्रकटितम्- यथा हि ब्रह्म विष्ठितं तावती वाक् (ऋग्वेदे)। वागर्थप्रतिपत्तये, जगतः पितरौ वन्दे पार्वतीपरमेश्वरी (रघुवंशे)। इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्, यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते (काव्यादर्शे), समसर्वगुण सन्तौ सुहृदाविव संगतौ, परस्परस्य शोभा शब्दार्थेषु भवति यथा। एभिः वचनैः भाषायाः महत्वं स्पष्टीकृतवन्तः आचार्याः। एभिः उद्धरणैः संस्कृतभाषायाः वाक्यानां च प्रचलनं तस्य दिव्यत्वं च दर्शितम् अस्ति। वाचां शक्तिः विस्तारश्च ब्रह्मणः शक्ति इव विस्तृता अस्ति। एतेन ज्ञायते यत् वाक्यानां सीमा नास्ति; सम्पूर्णे विश्वे प्रसृतम् अस्ति। वैदिकपरम्परायामपि वाग्वैभवं दृश्यते ऋग्वेदादिषु वेदेषु वाक् (सरस्वती) ज्ञानसृष्टेः मूलशक्तिः इति मन्यते। वाचां चत्वारः स्तराः वर्णिताः सन्ति – परा, पश्यन्ती, मध्यमा, वैखरी च। इत्थं वाचां शक्तिः असीममिता अस्ति, सा च सम्पूर्णे विश्वे विस्तृता अस्ति। अस्मान् चिन्तयितुम् अवगन्तुं च शक्तिं ददाति, येन समग्रसृष्टेः ज्ञानं सम्भवं भवति।

**शब्दार्थः तत्सम्बन्धश्च**

भाषाविषयिणी चर्चा मानवसभ्यतायाः आरम्भतः एव विविधरूपेषु दरीदृश्यते। भाषाविचारस्य इतिहासः अतीव प्राचीनः अस्ति तथा च दर्शनशास्त्रेण, व्याकरणेन, मनोविज्ञानेन, समाजशास्त्रेण च गभीररूपेण सम्बद्धः अस्ति। भाषायाः उत्पत्तिः, संरचना, प्रभावः च विभिन्नासु सभ्यतासु, दार्शनिकपरम्परासु च विचारिताः सन्ति। भारते भाषाविचारः अत्यन्तसमृद्धः विस्तृतः च दृग्गोचरी भवति, यत्र वेदात् आरभ्य आधुनिकभाषाविज्ञानपर्यन्तं विविधस्तरयोः चर्चाः कृताः सन्ति।

**शब्दशक्तिः वृत्तिश्च**

शब्दशक्तिः शब्दस्य शक्तिः अर्थं बोधयति इति अर्थः। भाषाविज्ञानस्य काव्यशास्त्रस्य च एषः महत्त्वपूर्णः विषयः अस्ति। शब्दस्य तदर्थस्य च संबन्धस्थापनप्रक्रिया वृति उच्यते। शब्दस्य प्रयोगे तस्य अर्थस्य बोधः प्रवृत्तिः इति कथ्यते। शब्दस्य अर्थसंप्रेषणशक्तिर्भवति शब्दशक्तिः तत्रैव वृत्तिः शब्दार्थयोः संबन्धस्थापनप्रक्रिया भवति। शब्दशक्तेः मुख्यभेदाः सन्ति- अभिधा, लक्षणा, व्यञ्जना च तत्रैव वृतेः प्रकाराः सन्ति- अभिधावृतिः, लक्षणावृतिः, व्यञ्जनावृतिः। स्वरूपविषये अपि पार्थक्यम् अस्ति शब्दशक्तिः शब्दस्य सामर्थ्यरूपा गुणरूपा वा भवति। वृत्तिः शब्दस्य तदर्थस्य च सम्बन्धं व्याख्यां प्रस्तौति। शब्दशक्तेः कार्यं शब्दस्य अर्थग्रहणप्रक्रिया संचालनमस्ति। वृत्तिः शब्दशक्तेः आधारेण अर्थस्य स्पष्टीकरणाय कार्यं करोति। उदाहरणम् गङ्गानद्याः अर्थं बोधयितुं गङ्गाशब्दस्य सामर्थ्यम् अस्ति शब्दशक्तिः। तत्रैव वृत्तिः 'गङ्गा' इत्यर्थः जलं, शुद्धिं, तीर्थेन सह संयोगप्रक्रियां वा बोधयति शब्दशक्तिः शब्दस्य अर्थग्रहणशक्तिः अस्ति, वृतिः तु शब्दस्य यथार्थार्थस्य अवगमनप्रक्रिया वर्तते। शब्दशक्तिः भाषायाः मूलरूपं निर्धारयति, वृत्तिः अर्थस्य सन्दर्भं प्रयोजनं च स्पष्टयति। उभयम् अपि गहनतया सम्बद्धम् अस्ति, यतः शब्दानां शक्तिः केवलं वृत्तिद्वारा एव व्यक्ता भवति। शब्दशक्तिः शब्दार्थदर्पणम् इवास्ति, वृत्तिस्तु तस्य दर्पणस्य स्पष्टीकरणस्य विधिरिव।

**शब्दशक्तेः महत्वम्**

संस्कृतव्याकरण-दर्शन-वेदान्त-न्याय-जैन-बौद्ध-परम्परासु शब्दस्य सामर्थ्यस्य विशिष्टं स्थानमस्ति। शब्दसामर्थ्यं नाम शब्दशक्तिः। शब्दशक्तिः शब्दस्य तदर्थं बोधयितुं सामर्थ्यं निर्दिशति। संस्कृतव्याकरणे दर्शने च शब्दशक्तिः त्रिधा वर्तते। यदा शब्दस्य सामान्यार्थे मुख्यार्थे वा प्रयोगः भवति तदा अर्थावबोधे प्रयुक्ता भवति अभिधा शक्तिः। उदाहरणतया- गङ्गायाः तटे स्नानं करोमि। अत्र "गङ्गा" इत्यस्य आशयः

---

[1] सहायकाचार्यः, संस्कृत-वैदिकाध्ययनविभागः, BBAU केन्द्रीयविश्वविद्यालयः, लखनऊ।
[2] सहायकाचार्या, हिन्दू अध्ययनम्,IKS-Cell, CSU, मुख्यालयः, नवदेहली

भवति नदीविशेषः। यदा कश्चन शब्दः स्वस्य मुख्यार्थं विहाय अन्यं सम्बद्धम् अर्थं प्रकाशयति तदा लक्षणाशक्तिः उच्यते। उदाहरणतया- गङ्गायाम् घोषः अस्ति। अत्र "गङ्गा" इत्यस्य आशयः गंगाप्रवाहः नैव अपितु शीतत्वपावनत्वयुते गंगातटे घोषः अस्ति। एवमेव व्यञ्जनाशक्तिर्भिन्ना भवति-यदा कश्चन शब्दः न तु प्रत्यक्षार्थे न त गौणार्थे प्रयुक्तः भवति, किन्तु किञ्चित् गुप्तं गहनतरं वा व्यङ्ग्यार्थं प्रकाशयति तदा तस्य व्याञ्जनशक्तिः प्रयुक्ता इति कथ्यते। उदाहरणतया "राजा सिंहासने उपविष्टः अस्ति।" अत्र “सिंहासनम् उपविष्टः” इति न केवलं उपवेशन क्रियायाः, अपितु शासनशक्तिं, अधिकारं च निर्दिशति।

**भारतीयदार्शनिकपरम्परासु शब्दशक्तिमहत्वम्**

वेदान्तदर्शने शब्दानां शक्तिः - वेदवचनानां शक्तिः अनन्तं नित्यं च मन्यते। शब्दब्रह्मसिद्धान्तः – वेदान्ते शब्दः ब्रह्मसाक्षात्कर्तुं साधनं मन्यते। “ॐ” इति शब्दशक्तेः उच्चतमं रूपं मन्यते। न्यायदर्शने प्रत्यक्षम्, अनुमानम् आप्तवचनं च प्रमाणत्वेन स्वीकृतानि सन्ति। गौतमऋषेः न्यायसूत्रेषु शब्दः प्रमाणत्वेन अस्ति तस्य शक्तिः तर्कस्य आधारत्वेन व्याख्याता अस्ति। मीमांसादर्शने शब्दसामर्थ्यस्य विशिष्टं स्थानं ददति आचार्याः विशिष्य वाक्यविन्यासे। मीमांसायां वेदवचनं परमाधिकारं मन्यते, यतः ते न ईश्वरेण वा केनचित् मानवेन वा प्रकाशिताः, अपितु वेदैः एव प्रकाशिताः। बौद्धदर्शने शब्दाः केवलं भ्रमाः (अव्यक्ताः) इति मन्यन्ते यतो हि ते वस्तुनां पूर्णं वास्तविकतां प्रकाशयितुं न शक्नुवन्ति। तथागतबुद्धः अवदत् यत् शब्दाः केवलं सूचकाः एव सन्ति, ते एव परमसत्यं प्रति नेतुम् न शक्नुवन्ति। शून्यवादस्य मतमस्ति यत् शब्दानां शक्तिः सीमितं भवति, ते केवलं व्यावहारिकस्तरस्य एव सत्यं भवन्ति। जैनदर्शने शब्दः श्रुतज्ञानस्य मुख्यस्रोतत्वेन अङ्गीकृतः वर्तते। अनेकान्तवादमाश्रित्य शब्दानां भिन्न-भिन्न-प्रसङ्गेषु भिन्न-भिन्नार्थाः भवितुम् अर्हन्ति। शब्दस्य यथार्थः आशयः सन्दर्भं दृष्टिकोणं च विचार्य एव अवगन्तुं शक्यते।

**जैनागमे वाच्यार्थः व्यंजना चेति**

शब्दः, अर्थः, ज्ञानरूपाः पदार्थाः त्रिविधाः भवन्ति। कस्यापि वस्तुनः त्रिधा विभाजनं कर्तुं शक्यते – बुद्धिः (ज्ञानम्), शब्दः, अर्थः च।[1] जीवाख्यं वस्तु, 'जीव' शब्द तथा जीवसम्बन्धी ज्ञानम्, एतत्-पदत्रयम् अविचारसिद्धम् अस्मिन् लोके, तेषां सिद्ध्यर्थं किमपि विशेषं चिन्तनं कर्तुं आवश्यकता नास्ति।[2] त्रिधा भेदितः कालः अर्थात् शब्दः, ज्ञानम् अर्थश्च अभिधेयः अस्ति।[3] एवमेव शब्दस्य अर्थः लिङ्गस्य च संख्यायाः पर्यायाद् भिन्नः, व्यक्तिः, ग्रहः, भेदः वर्तमानमात्रात् भिन्नः न च शब्दभेदः न च अर्थभेदः परस्परं भिन्नः। व्यञ्जनभेदेन् वास्तुभेदध्यवसायिनो व्यंञ्जनयः। अर्थपर्याय-व्यञ्जनपर्यायभेदरूपैः लिङ्गसंख्या कालप्रकरणसमुग्रहोपग्रहाभ्यां अभेदैः वर्तमानकालवस्तुमात्रज्ञापकाः ये त सन्ति नयाः। अत्र शब्दभेदात् अर्थान्तरं न अभिप्रेतम्। अनुदात्तभेदाधारितं वस्तुभेदं निर्धारयति यः नयः सः व्यञ्जना इति कथ्यते।[4]

**जैनागमे वृत्तिः**

आचार्यपरम्परातः सम्प्राप्तः मूलसिद्धान्तः आगम् इति कथ्यते। यद्यपि जैनागमः मूलरूपेण अतीव विस्तृतः अस्ति तथापि तस्य अधिकांशः भागः कालकवलिताः सञ्जाताः। तस्य आगमस्य महत्त्वं न तस्य शब्दावलीना अपितु अर्थव्यञ्जनात् महनीयमस्ति। अतः उपचारमात्रेण शब्दनिर्माणं आगम् इति उच्यते। यद्यपि शब्दस्य अर्थः कालेन प्रदेशेन च परिवर्तते तथापि तस्य अर्थः समानः एव तिष्ठति अत एव आगमः सनातनः इति उच्यते। यद्यपि शब्दनिर्माणदृष्ट्या पौरुषं तथापि नित्यार्थतः अपौरुषेयत्वम्। आगमस्य अधिकांशरचना सूत्रेषु एव संजाता यतोहि सूत्रद्वारा अल्पेषु शब्देषु बहुविधम् अर्थं प्रसारयितुं शक्यते। तद्व्याख्यानाय परवर्तिविद्वांसः भाष्याणि लिखितवन्तः। तानि भाष्याणि अपि प्रामाणिकानि यतः तेषु समानमूलसूत्राणां सारं प्रस्तुतं भवति।

**जैनागमेषु शब्दार्थसम्बन्धविषयविश्लेषणप्रक्रिया**

शब्देषु अर्थप्रतिपादने सामर्थ्यं भवति। शब्दे तस्यार्थे च वाचकवाच्यशक्तिर्भवति। तस्मिन् सूचकत्वात् इदम् अस्य शब्दस्यार्थः इति ज्ञात्वा, तादृशज्ञानेन शब्दादिभिः वस्तुज्ञानं लभ्यते। यथा मेरुप्रभृतिवस्तूनि सन्ति अर्थात् मेरुशब्दोच्चारणेन जम्बूद्वीपमध्ये स्थितस्य मेरुशब्दस्य ज्ञानं लभ्यते। अन्यद्रव्याणि अपि तथैव वेदितव्यानि। उक्तम् अस्ति- सहजयोग्यता संकेतवशाद्धि शब्दादयो वस्तु प्रतिपत्तिहेतवः।[5] **को नाम शब्दः?** प्रकृतशक्तिनिर्देशेन अर्थं बोधयति यत् तत् शब्द उच्यते। स्वाभाविकसामर्थ्यसमयाभ्यामर्थबोध निबंधनं शब्दः।[6] **भिन्नशब्दानां भिन्नाः अर्थाः भवन्ति-** यदि शब्दभेदः अस्ति तर्हि अर्थान्तरं भवितुमर्हति। शब्दभेदश्चेदस्ति अर्थभेदेनाप्यवश्यं भवितव्यम्।[7] यदा शब्दभेदः भवति

---

[1] श्लोकवार्तिके/२/१/५/६८/२७८/३३ उद्धृतम्- समन्तभद्रस्वामिनः वचनम् – बुद्धिशब्दार्थसंज्ञास्तास्तिस्रो बुद्ध्यादिवाचकाः।

[2] राजवार्तिक ४/४२/१५/२५६/२५ जीवार्थो जीवशब्दो जीवप्रत्ययः इत्येतत्त्रितयं लोके अविचारसिद्धम्।

[3] पंचास्तिकाय/तात्पर्यवृत्ति/३/९/२४ शब्दज्ञानार्थरूपेण त्रिधाभिधेयतां समयशब्दस्य...।

[4] धवला १/१,१,१/८६/१ तत्रार्थव्यञ्जनपर्यायैर्विभिन्नलिङ्गसंख्याकालकारक-पुरुषोपग्रहभेदैरभिन्नं वर्तमानमात्रं वस्त्वध्यवस्यन्तोऽर्थनयाः, न शब्दभेदनार्थभेद इत्यर्थः। व्यञ्जनभेदेन वस्तुभेदाध्यवसायिनो व्यञ्जननयाः।

[5] परीक्षामुख परिच्छेद 3/100

[6] स्याद्वादमंजरी 14/178/30

[7] सर्वार्थसिद्धि 1/33/144

तदा अर्थभेदः अर्थात् वक्तव्यवस्तु निश्चितः।[1] शब्दभेदे ध्रुवोऽर्थभेद इति।[2] यावन्तः वक्तव्याः सन्ति तावन्तः शब्दाः सन्ति।[3] संज्ञावानपदार्थप्रतिषेध्यः अस्ति चेत् निषेधव्यः। संज्ञिनः प्रतिषेधो न प्रतिषेध्याद्दते क्वचित्।[4] यावन्मात्राः शब्दाः तावन्मात्राः परमार्थाः भवन्ति।[5] **अर्थशब्दयोः वाच्यवाचकसम्बन्धः भवती**त्यपि निश्चप्रचम्।[6] प्रश्नः - शब्दस्य अर्थस्य च सम्बन्धः नास्ति चेदपि कथम् अर्थस्य वाहकः भवेत्? उत्तरम् - प्रमाणं तस्यार्थेन सह सम्बन्धः नास्ति चेदपि कथं अर्थस्य उपभोक्तृत्वं भवितुमर्हति? सर्वे शब्दाः संख्यात्मकाः एव सन्ति। पदार्थानां तु पर्यायवाची संख्या असंख्याता अनन्तविविधा च। शब्दाश्च सर्वे संख्येया एव, द्रव्यपर्यायाः पुनः संख्येयाऽसंख्येयानंतभेदाः।[7] शब्दस्य अर्थः कालदेशानुसारेण व्याख्यातव्यः। स्वाभाविकसामर्थ्यसमयाभ्यामर्थबोध निबंधनं शब्दः।[8]

**उपसंहृतिः**

जैनपरम्परायां शब्दशक्तिः मुख्यतया ज्ञानस्य नानारूपेषु विशेषतः प्रमाणनययोः सन्दर्भे अवगम्यते। जैनपरम्परायां शब्दः सापेक्षतया दृष्टिपति आयाति, येन अन्येभ्यः भारतीयदर्शनेभ्यः भिन्ना स्थितिर्दृश्यते। जैनदर्शने शब्दानां सामर्थ्यं सापेक्षिकं सन्दर्भाधारितं च मन्यते। शब्दानां वास्तविकता बहुलवादी अस्ति, अतः सन्दर्भदृष्टिकोणानुसारेण तेषाम् अर्थस्य अवगमनं आवश्यकम्। शब्दाः केवलं ज्ञानस्य साधनं भवन्ति, परन्तु परमसत्यं प्राप्तुं तर्क-अनुभव-स्वाध्यायस्य आवश्यकता अस्ति। जैनदर्शने शब्दार्थयोः सम्बन्धः अन्यपरम्पराभ्यः भिन्नरूपेण वर्तते, शब्दानां केवलं प्रतीकात्मकत्वं, तेषां नियतः, शाश्वतः अर्थः नास्ति इति स्वीकृत्य एवं जैनधर्मे शब्दशक्तिविचारः अत्यन्तं सूक्ष्मं, सापेक्षतावादी, व्यावहारिकं च अस्ति, येन भाषायाः ज्ञानस्य च जटिलसम्बन्धस्य अवगमने महत्त्वपूर्णं योगदानं भवति।

## सन्दर्भग्रन्थसूची


- वाल्मीकि. (n.d.). *रामायणम्.* (Gita Press Edition).
- व्यास, महर्षि. (n.d.). *महाभारतम्.* (Critical Edition, BORI).
- कालिदासः. (n.d.). *अभिज्ञानशाकुन्तलम्.* (Ed. & Trans. by M.R. Kale).
- भवभूति. (n.d.). *उत्तररामचरितम्.* (Ed. & Trans. by G.K. Bhat).
- बाणभट्टः. (n.d.). *कादम्बरी.* (Ed. by P.V. Kane).
- स्याद्वादमंजरी शेठ मणिलाल, बम्बई-१९७१
- श्लोकवार्तिके, सम्पा. सी कुंजुनु राजा, युनिवर्सीटी आफ़ मद्रास, 1946.
- शब्दार्थमीमांसा, सम्पा. प्रभाती लाल शास्त्री, दिल्ली : अभिषेक प्रकाशन, 2009.


## आधुनिक ग्रंथ एवं शोध


- Apte, V. S. (1965). *The Social and Moral Aspects of Sanskrit Drama.* Motilal Banarsidass.
- Kane, P. V. (1941). *History of Dharmashastra (Vol. II, Part I).* Bhandarkar Oriental Research Institute.
- Altekar, A. S. (1959). *The Position of Women in Hindu Civilization.* Motilal Banarsidass.
- Sharma, R. (2011). *Feminine Sensibility in Sanskrit Literature.* DK Printworld.
- Mishra, R. (2006). *Women in Ancient Indian Literature.* Eastern Book Linkers.
- Joshi, L. (2020). *Reinterpreting Women in Classical Sanskrit Texts.* Oxford University Press.


*********************

[1] राजवार्तिक 1/6/5/34/18
[2] राजवार्तिक 1/33/10/98/31)
[3] आप्तमीमांसा 27
[4] राजवार्तिक 1/6/5/34/18
[5] कार्तिकेयानुप्रेक्षा 252
[6] कषायपाहुड़ 1/13-14
[7] राजवार्तिक 1/26
[8] स्याद्वादमंजरी 14/179/29

ISSN 2348-7828

# सिद्धान्तशेखरीयक्षेत्रव्यवहारविमर्शः

दिनेशमोहनजोशी[1], गिरीशभट्टः बि[2], दिवाकरशर्मा[3]

**शोधसारः**

सिद्धान्तशेखर इति कश्चन सिद्धान्तज्यौतिषसम्बद्धो मौलिको ग्रन्थः श्रीपतिना विरचितः । श्रीपतिः (९९९ *AD*) प्राचीनभारतीयः प्रसिद्धो गणितज्ञः खगोलज्ञः फलितशास्त्रविच्चासीत् । धीकोटिकरणम्, गणिततिलकम्, सिद्धान्तशेखरः, ज्योतिषरत्नमाला इत्यादिग्रन्थान् स रचयामास । एतेषु ग्रन्थेषु सिद्धान्तशेखर अत्यन्तं महत्त्वपूर्णः खगोलशास्त्रीय एवञ्च गणितशास्त्रीयो ग्रन्थ अस्ति । अस्मिन् ग्रन्थे विंशतिः अध्यायाः सन्ति । तेषु त्रयोदशतम अध्यायो व्यक्तगणिताध्याय अस्ति । एतावत्पर्यन्तम् अस्मै ग्रन्थाय कस्यामपि भारतीयभाषायां पाश्चात्यभाषायां वा आधुनिकगणितरीत्या व्याख्या नोपलभ्यते । एतदर्थम् अस्माभिरस्य ग्रन्थस्य आधुनिकगणितदृष्ट्या संस्कृतव्याख्याकरणे प्रयासः क्रियमाण अस्ति । अस्मिन् शोधपत्रे अस्माभिर्व्यक्तगणिताध्यायस्य २६ तमश्लोकादारभ्य निरूपितस्य क्षेत्रव्यवहारस्य विषये आधुनिकगणितदृष्ट्या विमृष्टम् ।

**कुञ्जिशब्दाः – क्षेत्रम्, त्रिभुजम्, वृत्तम्, चतुर्भुजम्, जीवा।**

**अक्षेत्रलक्षणम्**

**शरानना नित्यगतिश्चयार्धहृता स्वयं वा समयोर्युतिः स्यात् ।**[4]
**चतुर्भुजायामखिलस्य वा स्यादवक्रबाहोरधिका भुजाच्चेत् ॥**
**ऊनः समो वेतरबाहुयोगो ज्ञेयं तदक्षेत्रमुदारधीभिः ।**[5]

चतुर्भुजक्षेत्रस्य चतुर्षु भुजेषु त्रयाणां भुजानां योग अवशिष्टभुजस्य अपेक्षया अधिको भवति चेत् स अवशिष्टो भुज अवक्रबाहुरित्युच्यते । किन्तु चतुर्भुजक्षेत्रस्य चतुर्षु भुजेषु त्रयाणां भुजानां योग अवशिष्टभुजस्य अपेक्षया न्यूनो भवति चेत् अथवा अवशिष्टभुजेन समानो भवति चेत् स अवशिष्टो भुज अक्षेत्रम् इत्युच्यते ।




**चित्रम् १ : अवक्रबाहोः अक्षेत्रस्य च लक्षणम्**

चित्रम् १ मध्ये $p, q, r, s$ भुजाः एवञ्च $t$ कर्णः अस्ति । त्रिभुजस्य अतुल्यतासिद्धान्तेन *(Triangle Inequality rule)* अस्माभिः अवक्रबाहोः, अक्षेत्रस्य च परिभाषां निरूपयितुं शक्यते ।

अस्मिन् चतुर्भुजे $ABC$ एवञ्च $ACD$ त्रिकोणौ वर्तेते । $ABC$ त्रिभुजे,

$$p + q > t$$
$$p + q - t > 0$$

$$q - t > -p \qquad (१)$$

[1] मानविकी एवं समाजविज्ञानविभागः, भारतीयप्रौद्योगिकीसंस्थानम्, मुम्बई

[2] सिद्धान्तज्यौतिषशास्त्रे विद्यावारिधि(Ph.D)-शोधच्छात्रः,ज्योतिष-वास्तुविभागः राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

[3] आचार्यतुरीयसत्रार्द्धम् (सिद्धान्तज्यौतिषशास्त्रम्), ज्योतिष-वास्तुविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः (आन्ध्रप्रदेशः)

[4] सर्वेषामपि टीकाकाराणामभिप्रायेण पङ्क्तिरियं स्पष्टा नास्ति ।

[5] सिद्धान्तशेखरः १३.२६-२७

$$-t = -(p+q) \quad (२)$$

एवञ्च $ACD$ त्रिभुजे,

$$t+s>r$$
$$t+s-r>0$$
$$s-r>-t \quad (३)$$

(३) तमे समीकरणे (२) तमसमीकरणस्य उत्थापनेन,

$$p+q+s-r>0$$
$$p+q+s>r \quad (४)$$

अनेन प्रकारेण श्लोकानुसारेण अवक्रबाहोर्निरूपणं जातम् ।

$$p+q+s \leq r \quad (५)$$

यदि समीकरणम् (५) सदृशी स्थितिः भवति चेत् एतद् अक्षेत्रम् इत्युच्यते ।

**त्रिभुजचतुर्भुजयोः फलानयनम्**

**भुजसमादलं हि चतुःस्थितं निजभुजैः क्रमशः पृथगूनितम् ।**
**अथ परस्परमेव समाहतं कृतपदं त्रिचतुर्भुजयोः फलम् ॥**[1]

चतुर्भुजस्य सर्वेषां भुजानां योगस्यार्धं चतुर्षु स्थानेषु स्थाप्यम् । तत् यथाक्रमं चतुर्भुजस्य चतुर्भिः भुजैः हीनं कार्यम् । तदानीं यानि चत्वारि फलानि लभ्यन्ते तेषां घातस्य मूलं क्रियते तदा चतुर्भुजस्य क्षेत्रफलं समुपलभ्यते ।

एवञ्च त्रिभुजस्य त्रयाणां भुजानां योगस्यार्धं चतुर्षु स्थानेषु स्थाप्यम् । तेषु त्रिषु स्थानेषु स्थापितानि फलानि यथाक्रमं त्रिभुजस्य त्रिभिर्भुजैर्हीनानि कार्याणि । चतुर्थे स्थाने स्थापितं फलं तथैव स्थाप्यम् । एतेषां चतुर्णां फलानां घातमूलं त्रिभुजस्य फलं भवति ।

श्लोकानुसारेण समीकरणम् अधोनिर्दिष्टप्रकारेण लेख्यम् –

$$s = \frac{a+b+c}{2} \quad (६)$$

समीकरणम् (६) मध्ये $s$ त्रिभुजस्य त्रयाणां भुजानां योगार्धं वर्तते । अस्य मानस्य प्रयोगः त्रिभुजस्य क्षेत्रफलानयनार्थं क्रियते । एतद्वारा त्रिभुजस्य क्षेत्रफलसाधनक्रमः समीकरणम् (७) मध्ये श्लोकानुसारेण त्रिभुजस्य क्षेत्रफलसाधनसूत्रं निरूपितमस्ति ।

$$A_{\Delta}(\text{त्रिभुजस्य क्षेत्रफलम्}) = \sqrt{(s-a)(s-b)(s-c)} \quad (७)$$

चतुर्भुजस्य सन्दर्भेऽपि $s$ इत्यस्य ग्रहणं कृतमस्ति । चतुर्णां भुजानां योगार्धम् अत्र $s$ रूपेण स्वीकृतमस्ति । अतः,

$$s = \frac{a+b+c+d}{2} \quad (८)$$

एतदुपयुज्य चतुर्भुजस्य क्षेत्रफलम् आनीयते । तद्यथा –

[1] सिद्धान्तशेखरः १३.२८

$$A_{\square}(\text{चतुर्भुजस्य क्षेत्रफलम्}) = \sqrt{(s-a)(s-b)(s-c)(s-d)} \quad (९)$$

**त्रिभुजक्षेत्रे आबाधयोः लम्बस्य चानयनम्**

**बाहुवर्गविवरद्विनिघ्नभूभक्तवर्जितयुते स्वभूदले ।**
**तेऽवधे हि भवतोऽवधाभुजावर्गजान्तरपदं तु लम्बकः ॥**[1]

त्रिभुजक्षेत्रे द्वौ भुजौ, भूमिश्चेति त्रय अवयवाः सन्ति । यो बाहुः त्रिभुजस्य आधारः स एव भूमिः । तत्र भूमिमानस्यार्धं स्थानद्वये स्थाप्यम् । भुजयोर्वर्गयोरन्तरं द्विगुणितभूमिमानेन भक्तं चेत् यत्फलं लभ्यते तत् एकत्र हीनम्, अपरत्र युतञ्च कार्यम् । ते आबाधे भवतः । आबाधा-भुजयोः वर्गान्तिरपदं लम्बको भवति ।




**चित्रम् २ : त्रिभुजक्षेत्रे आबाधयोः लम्बस्य चानयनम्**

चित्रम् २ मध्ये, $a, b$ बाहू, $c$ भूः, एवञ्च $l$ लम्बको वर्तते । अधः श्लोकानुसारेण त्रिभुजे आबाधयोः लम्बकस्य चानयनं कृतमस्ति । अत्र (१०), (११) इत्यनयोः समीकरणयोर्मध्ये $A_1, A_2$ आबाधे भवतः । एवञ्च (१२), (१३) इत्यनयोः समीकरणयोर्मध्ये मध्ये $l$ लम्बकः वर्तते ।

$$A_1(\text{आबाधा}) = \frac{a^2 - b^2}{2c} - \frac{c}{2} \quad (१०)$$

$$A_2(\text{आबाधा}) = \frac{a^2 - b^2}{2c} + \frac{c}{2} \quad (११)$$

$$l\ (\text{लम्बकः}) = \sqrt{b^2 - {A_1}^2} \quad (१२)$$

अथवा

$$l(\text{लम्बकः}) = \sqrt{a^2 - {A_2}^2} \quad (१३)$$

अस्मिन् विषये प्रतिपादितेषु भारतीयेषु ब्रह्मगुप्तः प्रथमो भवति ।[2] जैनाचार्येण महावीरेणापि स्वकीये गणितसारसङ्ग्रहग्रन्थे एष विषयः प्रतिपादितः ।[3] अधोनिर्दिष्टानि समीकरणानि महावीराचार्यस्य गणितसारसङ्ग्रहसम्बद्धानि वर्तन्ते । अत्रापि (१४), (१५) समीकरणयोः $A_1, A_2$ आबाधे भवतः । एवञ्च (१६), (१७) समीकरणयोः $l$ लम्बको वर्तते ।

[1] सिद्धान्तशेखरः १३.२९

[2] ब्राह्मस्फुटसिद्धान्तः १२.२२

[3] गणितसारसङ्ग्रहः ७.४९

$$A_1(\text{आबाधा}) = \frac{1}{2}\left[c + \frac{(a+b)(a-b)}{c}\right] \quad (१४)$$

$$A_2(\text{आबाधा}) = \frac{1}{2}\left[c - \frac{(a+b)(a-b)}{c}\right] \quad (१५)$$

$$l\ (\text{लम्बकः}) = \sqrt{b^2 - {A_1}^2} \quad (१६)$$

$$l(\text{लम्बकः}) = \sqrt{a^2 - {A_2}^2} \quad (१७)$$

अनेन ज्ञायते यद् उभयोरपि सूत्रं समानमेवेति ।

**चतुर्भुजस्य क्षेत्रफलसाधनम्**

**लम्बाहतं कुमुखयोगदलं फलं स्याद्**
**यद्वाऽखिलेष्वपि चतुर्भुजसंज्ञकेषु ।**[1]

भूमि-मुखयोः अर्धं लम्बेन गुणितं चेत् चतुर्भुजस्य क्षेत्रफलं भवति ।

चित्रम् २ मध्ये, $a$ मुखं, $b$ भूमिः, एवञ्च $h$ लम्बो भवति । श्लोकानुसारेण (१८) तमं समीकरणम् उपपद्यते । एतदेव चतुर्भुजस्य क्षेत्रफलानयने सूत्रं भवति ।

$$A_{\square}(\text{चतुर्भुजस्य क्षेत्रफलम्}) = \left[\frac{a+b}{2}\right]h \quad (१८)$$

एतत्समीकरणं तृतीयचित्रेण उपपादितम् ।

**त्रिभुजस्य स्पष्टक्षेत्रफलसाधनम्**

**द्वाभ्यां हता वसुमती त्रिभुजे विनिघ्ना**
**लम्बेन रू.....फलमागृणन्ति ॥**[2]

भूमिः द्वाभ्यां विभक्ता लम्बकेन गुणिता चेत् त्रिभुजस्य स्पष्टं क्षेत्रफलं भवति ।




**चित्रम् ३ : त्रिभुज-चतुर्भुजयोः क्षेत्रफलानयनम्**

[1] सिद्धान्तशेखरः १३.३०a

[2] सिद्धान्तशेखरः १३.३०b

$$A_{\Delta}(\text{त्रिभुजस्य क्षेत्रफलम्}) = \frac{b}{2} \times h \qquad (१९)$$

(१९) तमे समीकरणे $b$ भूमिः, $h$ लम्बको भवति ।

**त्रिभुजक्षेत्रस्य हृदयरज्जुसाधनम्**

**त्रिबाहुनः पार्श्वभुजावधार्धं लम्बेन भक्तं हृदयस्य रज्जुः ।**[1]

त्रिभुजक्षेत्रस्य पार्श्वस्थयोः भुजयोः घातार्धं लम्बकेन भक्तं चेत् हृदयरज्जुः[2] भवति ।




**चित्रम् ४ : त्रिभुजक्षेत्रस्य हृदयरज्जुसाधनम्**

चित्रम् ४ मध्ये, $AE$ व्यासः ($AE = 2r$) स्वीकृतः । $\Delta AEB$, $\Delta ACD$ समानौ भवतः । अतः अनुपातेन,

$$\frac{AB}{AE} = \frac{AD}{AC}$$
$$\frac{AB}{2r} = \frac{AD}{AC}$$
$$AB \times AC = 2r \times AD$$
$$2r = \frac{AB \times AC}{AD} = \frac{cd}{h}$$

$$r(\text{हृदयरज्जुः}) = \frac{cd}{2h} \qquad (२०)$$

(२०) तमे समीकरणे $c$, $d$ भुजे भवतः । $h$ लम्बो भवति ।

अन्येन प्रकारेणापि त्रिभुजस्य हृदयरज्जोः साधनं कर्तुं शक्यते । एतदर्थम् अस्मभ्यं लम्बकस्य ($h$) ज्ञानम् अपेक्षितम् । चित्रम् ४ अनुसारेण लम्बकम् अधोनिर्दिष्टप्रकारेण (२१) तमं समीकरणं प्राप्यते –

$$A_{\Delta}(\text{त्रिभुजस्य क्षेत्रफलम्}) = \frac{1}{2} \times a \times h$$
$$2A_{\Delta} = a \times h$$

[1] सिद्धान्तशेखरः १३.३१a

[2] हृदयरज्जुर्नाम circumradius (कर्णः) ।

ISSN 2348-7828

$$h\ (\text{लम्बकः}) = \frac{2A_\Delta}{a} \qquad (२१)$$

अत्र (२०) तमे समीकरणे (२१) तमसमीकरणस्योत्थापनेन,

$$r\ (\text{हृदयरज्जुः}) = \frac{cd}{2} \times \frac{a}{2A_\Delta} = \frac{adc}{4A_\Delta} \qquad (२२)$$

इति (२२) तमं सूत्रम् उपपद्यते । एतदेव त्रिभुजस्य हृदयरज्जुसाधनस्य द्वितीयं सूत्रं भवति ।

**समचतुर्भुजस्य (*Cyclic quadrilateral with equal sides*) हृदयरज्जुसाधनम्**

**चतुर्भुजेषु श्रुतिपार्श्वबाहुवधस्य चार्धं खलु लम्बभक्तम् ॥**[1]

चतुर्भुजक्षेत्रे कर्णस्य पार्श्वबाहोश्च घातस्य अर्धं लम्बेन विभक्तं चेत् हृदयरज्जुः लभ्यते ।




**चित्रम् ५ – समचतुर्भुजस्य हृदयरज्जुसाधनम्**

चित्रम् ५ मध्ये $h$ लम्बकः, एवञ्च $a, b, c, d$ भुजाः वर्तन्ते । इदानीं श्लोकानुसारेण (२३) तमं समीकरणम् उपपद्यते ।

$$r\ (\text{हृदयरज्जुः}) = \frac{z \times b}{2h} = \frac{y \times d}{2h} \qquad (२३)$$

(२३) तमे समीकरणे $y, z$ कर्णौ स्तः । एवञ्च $b, d$ भुजौ स्तः । $h$ लम्बक अस्ति ।

**विषमचतुर्भुजस्य (*Cyclic quadrilateral with unequal sides*) हृदयरज्जुसाधनम्**

**अतुल्यबाहोः प्रतिबाहुबाहुवर्गैक्यमूलस्य दलं हि यद्वा ।**[2]

विषमबाहुचतुर्भुजस्य प्रतिबाहोः बाहोश्च वर्गयोगमूलस्य अर्धं हृदयरज्जुः भवति ।

[1] सिद्धान्तशेखरः १३.३१ b

[2] सिद्धान्तशेखरः १३.३२a

ISSN 2348-7828




**चित्रम् ६ – विषमचतुर्भुजस्य हृदयरज्जुसाधनम्**

चित्रम् ६ मध्ये $a, b, c, d$ विषमचतुर्भुजस्य भुजा वर्तन्ते । अनयोः प्रयोगेण श्लोकानुसारेण अधोनिर्दिष्टेन

(२४) तमसमीकरणमाध्यमेन हृदयरज्जोः साधनं प्रकारद्वयेन करिष्यते ।

$$\text{हृदयरज्जुः } (r) = \frac{1}{2}\sqrt{a^2 + c^2}$$

अथवा

$$= \frac{1}{2}\sqrt{b^2 + d^2} \qquad (२४)$$

**हृदयरज्जुद्वारा व्याससाधनम्**

**द्वाभ्यां हताऽसौ हृदयस्य रज्जुर्व्यासो बहिर्वृत्तभवः प्रदिष्टः ॥**[1]

हृदयरज्जुः (त्रिज्या) द्वाभ्यां गुणिता बहिर्वृत्तस्य (त्रिभुजोपरिगतस्य चतुर्भुजोपरिगतस्य वा वृत्तस्य) व्यासो भवति ।

(२५) तमे समीकरणे $d$ व्यासः अस्ति । अन्यत्सर्वं स्पष्टम् ।

$$r \times 2 = d \qquad (२५)$$

**द्वितुल्यबाहुचतुर्भुजस्य सर्वसमावरचतुर्भुजस्य च कर्णसाधनम्**

**द्वितुल्यबाहोश्च चतुर्भुजेषु स्यातां श्रुती सर्वसमावरेषु ।**

**बाहुप्रतीबाहुवधैक्यमूलमतुल्यबाहोरधुना प्रवक्ष्ये ॥**[2]

द्वितुल्यबाहुचतुर्भुजस्य (समानान्तरचतुर्भुजस्य) सर्वसमावरचतुर्भुजस्य (वर्गक्षेत्रस्य) च बाहु-प्रतिबाहुघातयोगमूलं कर्णो भवति ।

चित्रम् ५ अनुसारेण द्वितुल्यबाहुचतुर्भुजस्य कर्णसाधनं क्रियते । चित्रे $BD$ कर्ण अस्ति । तस्य साधनम् अधोनिर्दिष्टप्रकारेण क्रियते –

$$BD^2 = DE^2 + BE^2$$
$$= (AD^2 - AE^2) + BE^2$$
$$= d^2 - \left[\frac{(a-c)}{2}\right]^2 + \left[\frac{(a+c)}{2}\right]^2$$
$$= d^2 + a.c$$

---

[1] सिद्धान्तशेखरः १३.३२b

[2] सिद्धान्तशेखरः १३.३३

चित्रम् ५ मध्ये $b = d$ अस्ति । अतः, $d^2 = b^2$ इत्यपि लेखितुं शक्यते । अनेन,

$$BD = y = \sqrt{b^2 + a.c} \quad (२६)$$

भवति ।

**विषमचतुर्भुजस्य कर्णानयनम्**

**कर्णान्तरसंश्रितभुजाहतिसंयुतिर्या**
**भक्ता परस्परमसौ गुणयेद् द्विधा ताम् ।**
**युत्या भुजप्रतिभुजावधयोः पदे तु**
**कर्णाविमौ हि विषमाख्यचतुर्भुजस्य ॥**[1]

विषमबाहुचतुर्भुजस्य उभयपार्श्वे कर्णाश्रितौ यौ भुजौ भवतस्तयोर्भुजयोः पृथक् पृथक् घातौ कृत्वा तयोर्योगः कार्यः । एवम् अन्यकर्णस्यापि उभयपार्श्वस्थितयोः भुजयोरैक्यं कार्यम् । एवं सिद्धम् ऐक्यद्वयं परस्परं भाजितं कार्यम् । लब्धफलं भुज-प्रतिभुजयोः घातयोः युत्या गुणयेत् । तयोर्मूले विषमबाहुचतुर्भुजस्य कर्णौ स्याताम् ।

चित्रम् ६ मध्ये $a, b, c, d$ भुजाः, $x, y$ कर्णौ स्तः । श्लोकानुसारेण उभयोरपि कर्णयोः साधनम् अधोनिर्दिष्टयोः (२७), (२८) समीकरणयोः माध्यमेन प्रदर्श्यते –

$$AC = x = \sqrt{\frac{(ad + bc)}{(ab + cd)}(ac + bd)} \quad (२७)$$

$$BD = y = \sqrt{\frac{(ab + cd)}{(ad + bc)}(ac + bd)} \quad (२८)$$

**वृत्तस्य परिधिसाधनम्**

**विष्कम्भवर्गे दशभिर्विनिघ्ने पदीकृते स्यात्परिधिः सुसूक्ष्मः ।**[2]

व्यासस्य वर्गं दशभिः सङ्गुण्य मूलं क्रियते चेत् सुसूक्ष्मः परिधिः समुपलभ्यते ।

$$\begin{aligned} c\ (\text{परिधिः}) &= \sqrt{d^2 \times 10} \\ &= d\sqrt{10} \\ &= 2r\sqrt{10} \end{aligned} \quad (२९)$$

(२९) तमे समीकरणे $c$ परिधिः, $d$ व्यासः, $r$ व्यासार्धं वर्तते । शेषं स्पष्टम् । बहुषु गणितग्रन्थेषु $\sqrt{10} = \pi$ इति निर्दिष्टमस्ति । यदि एतदेव मानम् अस्माभिः (२९) तमे समीकरणे स्थाप्यते तर्हि $2\pi r$ इति भवति । एतदेव सूत्रम् अर्वाचीनगणिते वृत्तस्य परिधिसाधनार्थं प्रयुज्यते । $\pi$ विषये अधिकं ज्ञातव्यं तर्हि हिन्दीभाषायां प्रकाशितं "**भारत में $\pi$ का क्रमिक विकास**" इति शोधपत्रम् अनुसरणीयम् ।[3]

---

[1] सिद्धान्तशेखरः १३.३४

[2] सिद्धान्तशेखरः १३.३५a

[3] https://www.ijtsrd.com/mathemetics/other/50621/%CF%80-evolution-of-in-india/dinesh-mohan-joshi

ISSN 2348-7828

**वृत्तस्य क्षेत्रफलानयनम्**

**विष्कम्भवर्गस्य चतुर्थभागवर्गाद्दशघ्नाच्च पदं फलं स्यात् ॥**[1]

विष्कम्भवर्गस्य (व्यासवर्गस्य) चतुर्थांशस्य वर्गं दशभिः सङ्गुण्य मूलं क्रियते चेत् वृत्तस्य क्षेत्रफलं समुपलभ्यते ।

(३०) तमे समीकरणे $A_c$ वृत्तस्य क्षेत्रफलमस्ति । $d$ व्यासः, $r$ व्यासार्धम् अस्ति । श्लोकानुसारेण अस्मिन् समीकरणे वृत्तस्य क्षेत्रफलसाधनं प्रदर्शितम् ।

$$A_c(\text{वृत्तस्य क्षेत्रफलम्}) = \sqrt{\left(\frac{d^2}{4}\right)^2 \times 10} = \frac{d^2}{4}\sqrt{10}$$
$$= \frac{d \times d}{2 \times 2} \times \sqrt{10} = \left(\frac{d}{2}\right)^2 \times \sqrt{10}$$
$$= r \times r \times \sqrt{10} = \sqrt{10}\, r^2 \qquad (३०)$$

**वृत्तस्य ज्यासाधनम्**

**वृत्तव्यासादिष्टबाणोननिघ्नाद्वेदैः क्षुण्णाद् यत्पदं ज्या भवेत्तत् ।**[2]

वृत्तव्यासात् शरं (उत्क्रमज्यां) संशोध्य चतुर्गुणितशरात् सङ्गुण्य मूले गृहीते सति ज्यामानं प्राप्यते ।

$$c\ (\text{ज्या}) = \sqrt{4h(d-h)}$$

चित्रम् ७ मध्ये त्रिभुजे $ADC'$ एवं $CDA$ समाने स्तः । अतः अनुपातेन अधोनिर्दिष्टप्रक्रियाद्वारा ज्यासाधनं कृतम् –

$$\frac{CD}{AD} = \frac{AD}{C'D}$$
$$\frac{h}{\frac{c}{2}} = \frac{\frac{c}{2}}{d-h}$$
$$\frac{c^2}{4} = h(d-h)$$

$$c\ (\text{ज्या}) = \sqrt{4h(d-h)} \qquad (३१)$$

(३१) तमे समीकरणे $h$ बाणः, $d$ वृत्तव्यासः एवञ्च $c$ ज्या वर्तते । अतः सिद्धम् ।




**चित्रम् ७ – चाप-शर-ज्या-व्यासादीनां साधनम्**

**शरसाधनम्**

[1] सिद्धान्तशेखरः १३.३५b [2] सिद्धान्तशेखरः १३.३७a

**वृत्ते जीवाव्यासकृत्योर्विशेषान्मूलं प्रोह्य व्यासतोऽर्धं शरः स्यात् ॥**[1]

व्यासवर्गात् ज्यावर्गं संशोध्य मूलं गृहीत्वा तस्य अर्धं कार्यम् । तदानीं यत्फलं लभ्यते तत् व्यासात् शोध्यते चेत् शरः (उत्क्रमज्या) समुपलभ्यते ।

$$h\ (\text{शरः}) = d - \frac{\sqrt{d^2 - c^2}}{2}$$

$$= d - \sqrt{\frac{(d+c)(d-c)}{2}}$$

(३२)

अत्र शरसाधनेऽपि चित्रम् ७ इत्यस्य उपयोगः कृतः । (३२) तमे समीकरणे $d$ व्यासः अस्ति, $c$ ज्या अस्ति ।

**व्याससाधनम्**

**जीवार्धवर्गे शरवर्गयुक्ते शरोद्धृते व्यासमुशन्ति वृत्ते ।**[2]

जीवायाः अर्धस्य वर्गं शरवर्गेण संयोज्य शरमानेन विभज्यते तदा व्यासमानं समुपलभ्यते ।

(३३) तमं समीकरणं श्लोकानुसारेण प्रतिपादितमस्ति । समीकरणे $d$ व्यासः, $c$ जीवा, $h$ शर अस्ति ।

$$d\ (\text{व्यासः}) = \frac{\left(\frac{c}{2}\right)^2 + h^2}{h} \qquad (३३)$$

37 तमे श्लोके $c\ (\text{ज्या}) = \sqrt{4h(d-h)}$ सूत्रं स्वीकृतमस्ति । अनेन अधः (३३) तमसमीकरणस्य उपपत्तिः प्रतिपादिता । अत्र,

$$d - h = \frac{c^2}{4h}$$

$$c^2 = 4h\,(d-h)$$

$$\frac{c^2}{4} = h(d-h)$$

$$= hd - h^2$$

$$\frac{c^2}{4} + h^2 = hd$$

$$d\ (\text{व्यासः}) = \frac{\frac{c^2}{4} + h^2}{h} \qquad (३४)$$

इति सिद्धम् ।

**मिथश्छिन्नयोर्वृत्तयोः शरसाधनम्**

**व्यासौ तथा ग्रासविहीननिघ्नौ ग्रासोनयुत्या विहृतौ शरौ स्तः ॥**[3]

[1] सिद्धान्तशेखरः १३.३७b

[2] सिद्धान्तशेखरः १३.३८a

[3] सिद्धान्तशेखरः १३.३८b

ISSN 2348-7828

ययोर्वृत्तयोर्मिथः छेदनं भवति तयोर्वृत्तयोर्व्यासौ ग्रासप्रमाणेन पृथक् पृथक् संशोध्य ग्रासप्रमाणेनैव सङ्गुण्यते चेत् यत्फलं लभ्यते तदुभयोर्वृत्तयोर्ग्रासोनव्यासप्रमाणयोर्योगेन विभज्यते तदा तयोर्वृत्तयोः शरौ पृथक् पृथग्भवतः ।




**चित्रम् ८ - मिथः छिन्नयोः वृत्तयोः शरसाधनम्**

चित्रम् ८ मध्ये $AD, BE$ वृत्तयोर्व्यासौ भवतः । $BD$ ग्रासो वर्तते । श्लोकानुसारेण (३५), (३६) समीकरणे उपपद्येते । अनयोः समीकरणयोः $BC, CD$ शरौ स्तः ।

$$BC\ (\text{शरः}) = \frac{(AD - BD) \times BD}{(AD - BD) + (BE - BD)} \qquad (३५)$$

$$CD\ (\text{शरः}) = \frac{(BE - BD) \times BD}{(AD - BD) + (BE - BD)} \qquad (३६)$$

**चापानयनम्**

**वर्गादिषोः षड्गुणिताच्च जीवावर्गेण युक्तात् पदमत्र चापम् ।**[1]

शरवर्गं षड्भिः सङ्गुण्य ज्यावर्गेण संयोज्य मूले गृहीते सति चापमानं समुपलभ्यते ।

श्लोके यदुद्धृतं तद् आधुनिकरीत्या (३७) तमे समीकरणे प्रदर्शितम् ।

$$a\ (\text{चापम्}) = \sqrt{6h^2 + c^2} \qquad (३७)$$

अस्मिन् समीकरणे $a$ चापम्, $h$ इषुः एवञ्च $c$ जीवा वर्तते । एतत् चित्रम् ७ मध्ये अवलोकयितुं शक्यते ।

**प्रकारान्तरेण इषु(शर)साधनम्**

**ज्याचापवर्गान्तरतोऽङ्गभक्ताद्यद्वर्गमूलं तदिषोः प्रमाणम् ॥**[2]

ज्या-चापवर्गान्तरं षड्भिः विभज्य मूले गृहीते सति इषोः प्रमाणम् लभ्यते ।

(३८) तमं समीकरणं श्लोक उद्धृतं गणितं प्रतिपादयति ।

$$h\ (\text{इषुः}) = \sqrt{\frac{a^2 - c^2}{6}} \qquad (३८)$$

अस्मिन् समीकरणे $h$ इषुः, $a$ चापं, $c$ ज्या च वर्तते । अस्मिन् प्रसङ्गेऽपि चित्रम् ७ इत्यस्य प्रयोगः कृतः ।

**ज्यासाधनम्**

[1] सिद्धान्तशेखरः १३.३९a

[2] सिद्धान्तशेखरः १३.३९b

**धनुःकृतेर्बाणकृतिं विशोध्य रसाहतं मूलमपीह जीवा ।**[1]

चापवर्गात् षड्गुणितशरवर्गं संशोध्य मूले गृहीते सति जीवा समुपलभ्यते ।

$$c(\text{जीवा}) = \sqrt{a^2 - 6h^2} \tag{३९}$$

(३९) तमे समीकरणे $c$ जीवा, $a$ धनुः, $h$ बाणो वर्तते । अस्मिन् प्रसङ्गेऽपि चित्रम् ७ अवलोकनीयम् ।

**व्यासानयनम्**

**चापस्य वर्गार्धमिषोश्च कृत्या हीनं भवेद्व्यास इषुद्विभक्तः ॥**[2]

चापवर्गार्धं शरवर्गेण संशोध्य द्विगुणितशरेण विभज्यते चेत् व्यासमानं समुपलभ्यते ।

$$d\ (\text{व्यासः}) = \frac{\frac{a^2}{2} - h^2}{2h} \tag{४०}$$

(४०) तमे समीकरणे $d$ व्यासः, $a$ चापं, $h$ शरः च वर्तते । अस्मिन् प्रसङ्गेऽपि चित्रम् ७ अवलोकनीयम् ।

**चतुर्भुजस्य कोटिकर्णयोः साधनम्**

**इष्टा भुजा तत्कृतिरिष्टभक्तहीनार्धिता कोटिरसौ समेता ।**

**प्राग्भाजकेन श्रवणः सुधीभिर्जात्यायतक्षेत्रविधौ निरुक्तः ॥**[3]

इष्टभुजवर्गम् इष्टसङ्ख्यया सम्भाज्य इष्टसङ्ख्यया ऊनीकृत्य अर्धीक्रियते तदा भुजः लभ्यते । इष्टभुजवर्गम् इष्टसङ्ख्यया सम्भाज्य इष्टसङ्ख्यया ऊनीकृत्य लब्धं फलम् अर्धीकृत्य इष्टसङ्ख्यां योज्यते तदा च कर्णः लभ्यते ।




**चित्रम् ९ – चतुर्भुजस्य कोटिकर्णयोः साधनम्**

चित्रम् ९ मध्ये $a$ इष्टभुजः स्वीकृतमस्ति । चित्रे $b$ कर्णः, एवं $c$ भुज अस्ति । श्लोकानुसारेण अधोनिर्दिष्टप्रकारेण अनयोः साधनं कर्तुं शक्यते । (४१), (४२) समीकरणयोः $n$ इष्टसङ्ख्या वर्तते । अतः श्लोकानुसारेण,

$$c\ (\text{भुजः}) = \frac{1}{2}\left[\frac{a^2}{n} - n\right] \tag{४१}$$

$$b\ (\text{कर्णः}) = \frac{1}{2}\left[\frac{a^2}{n} - n\right] + n \tag{४२}$$

[1] सिद्धान्तशेखरः १३.४०a

[2] सिद्धान्तशेखरः १३.४०b

[3] सिद्धान्तशेखरः १३.४१

ISSN 2348-7828

एतत्सर्वं चित्रम् ९ मध्ये प्रदर्शितम् ।

**जात्यत्रिभुजाभ्यां विषमचतुरस्रानयनम्**

**जात्ययोः श्रुतिहताः परस्परं क्षेत्रयोरिह हि बाहुकोटयः ।**
**तेषु भूमिरधिकोऽल्पको मुखं शेषकं तु विषमस्य दोर्द्वयम् ॥**[1]

द्वयोर्जात्यत्रिभुजयोर्भुजकोटी परस्परं कर्णेन सह गुणनीयौ । तदानीं यदधिकं लभ्यते सः भुजः, यदल्पकं भवति तत् मुखम् । अवशिष्टं यद्भवति तद्भुजो भवति ।

$$c \times a' = x$$
$$c \times b' = x_1$$
$$c' \times a = x_2$$
$$c' \times b = x_3$$

(४३)




**चित्रम् १० : जात्यत्रिभुजाभ्यां विषमचतुरस्रसाधनम्**

(४३) तमे समीकरणे $x, x_1, x_2, x_3$ यत् प्राप्तं तेषु यस्य मानं सर्वाधिकं भवति तस्य नाम भूमिः, अल्पकं मुखम्, शेषौ भुजाविति । चित्रम् १० मध्ये एतत् स्पष्टतया दृश्यते ।

**निष्कर्षः** – भारतीयगणितपरम्परायाम् आर्यभटप्रभृतीनां नैकानाम् आचार्याणां योगदानं विद्यते । आचार्य आर्यभटः (४७६ *AD*) स्वकीये आर्यभटीयग्रन्थे गणितपादे क्षेत्रव्यवहारसम्बद्धं वृत्तक्षत्रफलम्, विषमचतुरश्रादेः क्षेत्रफम्, ज्यासाधम्, वृत्तपरिधि-व्यासप्रमाम्, ज्या-खण्डज्यावृत्तादिपरिकल्पना, शङ्कुच्छाया, कोटि-भुज-कर्ण-शरादीनां साधनप्रकारान् सङ्क्षेपरूपेण प्रतिपादयामास । एवमेव आचार्यब्रह्मगुप्तेनापि (५९८ *AD*) चतुर्भुज-जात्यक्षेत्र-चतुरस्रोपरि वृत्तस्य व्यासज्ञानम्, त्रिभुजोपरि गतवृत्तस्य व्यासार्धज्ञानम्, विषमचतुर्भुजस्य कर्णसाधनम्, सूचीक्षेत्रम्, वृत्तपरिधिफलानयनम्, जीवाव्यासयोरानयनम्, ज्याव्यासाभ्यां शरानयनम् – इत्यादिविषयाः स्वकीयब्राह्मस्फुटसिद्धान्तग्रन्थे विवेचिताः । अस्माभिर्लक्षितं यत् ब्राह्मस्फुटसिद्धान्तस्य क्षेत्रव्यवहारस्य श्लोकोक्तविषयैस्सह श्रीपतेः क्षेत्रव्यवहारस्य विषयेषु साम्यं दृश्यते । अतः श्रीपतिना ब्राह्मस्फुटसिद्धान्तस्य अनुसरणं कृतं स्यादिति भाति । यद्यपि सिद्धान्तशेखर एको विशालो महत्त्वपूर्ण उपयोगी च ग्रन्थो वर्तते तथापि अस्य ग्रन्थस्य कृते कस्यामपि भारतीयभाषायां पाश्चात्त्यभाषायां वा समीचीना व्याख्या नोपलभ्यते । अत एव अस्माभिर्ग्रन्थस्यास्य

[1] सिद्धान्तशेखरः १३.४२

संस्कृतानुवाद आधुनिकगणितानुसारेण करणीय इति सङ्कल्पितः । अस्य ग्रन्थस्य क्षेत्रव्यवहारस्य संस्कृतानुवादेन सह आधुनिकगणितानुसारेण व्याख्या अस्माकं प्रथमं सोपानं भवति । शनैः शनैरस्य ग्रन्थस्य अन्येषाम् अध्यायानामपि व्याख्यानं कृत्वा प्रकाश्यते ।

## सन्दर्भग्रन्थसूची


1. **सिद्धान्तसम्राट्;** ग्रन्थकर्ता – जगन्नाथसम्राट्, प्रथमसंस्करणम्, संस्करणवर्षम् – सा.यु.१९७६, प्रकाशनसंस्था – संस्कृतपरिषद्, सागरविश्वविद्यालयः, सागरम् (मध्यप्रदेशः)
2. **श्रीमद्भास्कराचार्यप्रणीतः सिद्धान्तशिरोमणिः – स्वोपज्ञवासनाभाष्यसंवलितो नृसिंहदैवज्ञकृतवार्त्तिकोपेतश्च;** सम्पादकः – डॉ.मुरलीधरचतुर्वेदः; तृतीयं संस्करणम्; संस्करणवर्षम् – सा.यु.२०१०; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
3. **"ज्या-सिद्धान्ताः" Formulas of Sine;** सम्पादकः – पं. शिवचरणशास्त्री; प्रकाशनवर्षम् – सा.यु.२०१४; प्रकाशनसंस्था – राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुरम्
4. **सिद्धान्तसार्वभौमः – द्वितीयो भागः, ग्रन्थकर्ता –** मुनीश्वरः, प्रकाशनवर्षम् – सा.यु.१९३५, प्रकाशनसंस्था – राजकीयसंस्कृतमहाविद्यालयः, वाराणसी
5. **सिद्धान्ततत्त्वविवेकः – प्रथमो भागः,** ग्रन्थकर्ता – कमलाकरभट्टः, व्याख्याकारः – श्रीगङ्गाधरशर्मा, द्वितीयसंस्करणम्, संस्करणवर्षम् – सा.यु.२०१७, प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
6. **सिद्धान्तशेखरः ;** ग्रन्थकर्ता – श्रीपतिः, व्याख्याकारः – सत्यदेवशर्मा, प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी
7. **सिद्धान्तशिरोमणेर्गोलाध्यायस्योपपत्तिः –** लेखकः – डॉ. प्रेमकुमारशर्मा, संस्करणम् : सा.यु.२००५, प्रकाशनसंस्था – नागप्रकाशनम्, नवदेहली
8. **अर्वाचीनं ज्योतिर्विज्ञानम्;** ग्रन्थकर्ता – श्रीरमानाथसहायः; प्रकाशनवर्षम् – सा.यु.१९९६; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
9. **ज्योतिर्विज्ञानम्;** ग्रन्थकर्ता – धूलिपाल अर्कसोमयाजी; प्रकाशनवर्षम् – सा.यु.१९६४; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
10. **म०म०बापूदेवशास्त्रिकृता सरलत्रिकोणमितिः;** सम्पादकः – पण्डितश्रीगोविन्दपाठकः; प्रकाशनवर्षम् – सा.यु.२००२; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
11. **म०म० बापूदेवशास्त्रिकृता सरलत्रिकोणमितिः (संस्कृत-हिन्दीव्याख्योपेतम्);** व्याख्याकारः – पं.सत्यदेवशर्मा; संस्करणवर्षम् – सा.यु.२०१२; प्रकाशनसंस्था – चौखम्बा सुरभारती प्रकाशनम्, वाराणसी
12. **पं. बलदेवमिश्रकृता सरलत्रिकोणमितिः;** व्याख्याकारः सम्पादकश्च – डॉ. कमलाकान्तपाण्डेयः; प्रकाशनवर्षम् – सा.यु.२००७; प्रकाशनसंस्था – शारदासंस्कृतसंस्थानम्, वाराणसी
13. **ज्योतिष-सिद्धान्त-मञ्जूषा;** ग्रन्थकर्ता – डॉ. विनयकुमारपाण्डेयः; संस्करणवर्षम् – सा.यु.२०२०; प्रकाशनसंस्था – चौखम्बा सुरभारती प्रकाशनम्, वाराणसी
14. **मन्दशीघ्रफलसाधनसमीक्षा;** ग्रन्थकर्ता – विद्यावाचस्पतिः डॉ. रामजीवनमिश्रः; प्रथमसंस्करणम् – सा.यु.२००५; प्रकाशनसंस्था – ठाकुरप्रकाशनम्
15. **म.म.पं.सुधाकरद्विवेदिविरचितं दीर्घवृत्तलक्षणम्;** सम्पादको व्याख्याकारश्च – डॉ. चन्द्रमा पाण्डेयः; प्रथमसंस्करणम् – सा.यु.२००६; प्रकाशनसंस्था – शारदासंस्कृतसंस्थानम्, वाराणसी
16. **सुराकान्तसङ्कलितः ज्योतिर्विज्ञानशब्दकोषः;** लेखनं सम्पादनञ्च – डॉ. सुराकान्तझा; प्रथमं संस्करणम्; संस्करणवर्षम् – सा.यु.२००९; प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी
17. **सूर्यसिद्धान्तः (आर्षग्रन्थः);** व्याख्याकारः – श्रीकपिलेश्वरशास्त्री; संस्करणवर्षम् – सा.यु.२०१५; प्रकाशनसंस्था – चौखम्भा संस्कृतभवनम्, वाराणसी
18. **म.म.सुधाकरद्विवेदिप्रणीतया 'सुधावर्षिणी'टीकया संवलितः सूर्यसिद्धान्तः;** सम्पादकः – विद्यावारिधिः श्रीकृष्णचन्द्रद्विवेदी; द्वितीयं संस्करणम्; संस्करणवर्षम् – सा.यु.२०१६; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
19. **भास्करीयगोलमीमांसा;** प्रधानसम्पादकः – प्रो. वाचस्पति उपाध्यायः, लेखकः – प्रो. देवीप्रसादत्रिपाठी, सम्पादकः – प्रो. रमेशकुमारपाण्डेयः, संस्करणम् – सा.यु.२०१०, प्रकाशनसंस्था – श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली
20. **उपपत्तीन्दुशेखरः;** महामहोपध्यायश्रीदुर्गाप्रसादद्विवेदेन सङ्कलितः, सम्पादकः – श्रीगिरिजाप्रसादद्विवेदी, संस्करणम् – सा.यु.२००८, प्रकाशनसंस्था – भारतीयबुक् कारपोरेशन् – नवदेहली


**********

ISSN 2348-7828

# व्याकरणशास्त्रे रचनात्मकविधेः प्रयोगः

डॉ. परमेशकुमारशर्मा[1]

**शोधसारः**

रचनात्मकविधेः छात्रानामध्ययनदृष्ट्या सुतरां प्रयोगः भवितुमर्हति, अनेन विधिना छात्राः अल्पपरिश्रमेण अधिकाभ्याससमयं प्राप्स्यन्ति यथा- बाणभट्टसन्दर्भे पुत्रोत्तरस्योदाहरणे काचित् प्रसिद्धा घटना वर्तते। यत्र पुत्रयोः कौशलपरीक्षणेन अग्रिमकार्ययोजनां विदधाति| बाणभट्टः पुत्रौ पृच्छति- "सूख वृक्ष घर के सामने खडा है" इत्यस्य संस्कृतं किमस्ति तदा एकः पुत्रः उक्तवान्[2]- शुष्कः वृक्षः तिष्ठत्यग्रे, द्वितीयः अपि उक्तवान् यत् नीरसतरुरिह विलसति पुरुतः। तथा अत्र वाक्यद्वयेन रचनात्मकविधेः संद्योतनं भवति अत्र वर्णितं यत् यदि अभ्यासेन विषयस्य अधिगमेन च ज्ञानं शीघ्रं जायते तर्हि अस्माभिः प्रयत्नेन विषयः समुपस्थापनीयः येन छात्राणां शीघ्रं ज्ञानं जायते। लालित्यपूर्णता च उपवर्णिता। अस्यां पद्धत्याम् इकारपञ्चकप्रतिमानं महत्त्वपूर्णं योगदानं वर्णितं वर्तते। Engage, Explore, Explaining, Elaborate, Evaluate इति[3]। तत्र संलग्नता, अवगाहनम्, व्याख्यानम्, विस्तारणम्, मूल्याङ्कनञ्च। तेषां भाषाधिगमः व्याकरणाधिगमः च शीघ्रं भविष्यति इति साधुतया वर्णितं वर्तते रचनात्मकविधेः बिन्दुरूपेण चिन्तनम्रचनात्मकविधेः स्वरूपम् ,रचनावादिशिक्षणस्य इतिहासः, व्याकरणाध्यापने रचनात्मविधेः प्रयोगः,पदरचनाभ्यासाः, वाक्यरचनाभ्यासाः च , अस्मिन् लेखे विधास्यते ।

व्याकरणाध्ययनदृष्ट्या कार्यमिदं सर्वथा विनूतनं वर्तते अनेन कार्येण शोधार्थिनां महान् उपकारः भविष्यति अत्र विशिष्य छात्राणां हितकामनया अनेकविधपरिश्रमः विहितः वर्तते। तत्र प्रामुख्येण इमे विषयाः वर्णिताः सन्ति। यथा-

**अस्य लेखस्य मुख्यांशाः**

- रचनात्मकविधेः भूमिकावगमः
- रचनात्मकविधेः बिन्दुरूपेण चिन्तनम्
- रचनात्मकविधेः स्वरूपपरिज्ञानम्
- रचनावादिशिक्षणस्य इतिहासज्ञापनम्
- व्याकरणाध्यापने रचनात्मविधेः प्रयोगपरिज्ञानम्
- पदरचनाभ्यासज्ञापनम्
- वाक्यरचनाभ्यासावसरकल्पनम्
- **पारिभाषिकशब्दावली-** १. रचनात्मकविधिः, २. आई-पञ्चकम्, ३.प्रत्ययाः ४. धातवः, ५.वाच्यपरिवर्तनानि सन्ति|

अद्यतनसमये प्रचलितेषु विधिषु रचनात्मकविधिः सुतरां महत्त्वभूतः वर्तते। प्राचीनकाले श्रुतिपरम्परया छात्राः विषयान् अधिगच्छन्ति स्म।[4] आचार्यः श्रवणं कारयति स्म। छात्राः श्रवणबलेन विषयान् अधिगच्छन्ति स्म। तत्र शिक्षकाणां छात्राणां च प्राधान्यं भवति स्म। आचार्याः ज्ञानस्वरूपाः भवन्ति स्म| छात्राः अत्यन्तं मेधाविनः ज्ञानग्राहकाश्च भवन्ति, छात्रेषु च मेधाशक्तेः बाहुल्यमासीत्, किन्तु प्रायः आधुनिककाले छात्रकेन्द्रितशिक्षायाः प्राबल्यं जातमस्ति[5] यतः जीवनशैलीकारणेन छात्रेषु तथा समग्रता, ग्राहकता, एकग्रता, तत्परता अत्यधिकपरिश्रमावसरः च नास्ति। कारणं हि भोजनं वातावरणम् उभयं बहुधा नष्टं वर्तते। अतः अधुना जनाः भणन्ति – **शिक्षकः केवलं सौविध्यप्रदायकः, पथप्रदर्शकः प्रेरकः सहयोगी च भवति।** छात्रैरेव स्वज्ञानबलेन विषयाणाम् अधिगमः कर्तव्यः भवति। शिक्षकः क्रियाः शब्दान् वा श्यामफलके लिखति, तासाम् अभ्यासं वाक्यरचनां च स्वयं छात्राः कर्तुं प्रयतन्ते अर्थात् छात्रेभ्यः अवसरकल्पनं सामान्यरूपेण शिक्षककार्यम्। बालः स्वयमेव विषयं जानीते। अनुभवैः सूचनाः यदा युक्ताः भवन्ति, तदा तज्ज्ञानं विकसितं भवति। शिक्षकाः तथाभूतान् अवसरान् छात्राणां पुरस्तात् समुपस्थापयन्ति। यदि रचनात्मकविधेः बिन्दुरूपेण चिन्तनं कुर्मः तर्हि-

---

[1] सहायकाचार्यः, शिक्षापीठं, श्रीलालाबहादुराशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः, कटवारियासराय नईदिल्ली.

[2] कादम्बरी, वाणभट्टः, चौखम्भाप्रकाशनम्

[3] उच्चप्राथमिकस्तरीयसंस्कृतशिक्षणसंदर्शिका, शिक्षणअधिगमकेन्द्रं, श्रीलालाबहादुराशास्त्री राष्ट्रीयसंस्कृतविश्वविद्यालयः, पृष्ठसंख्या- 60

[4] दर्शनशिक्षा,

[5] उच्चप्राथमिकस्तरीयसंस्कृतशिक्षणसंदर्शिका, शिक्षण-अधिगमकेन्द्रं, श्रीलालाबहादुराशास्त्री राष्ट्रीयसंस्कृतविश्वविद्यालयः, पृष्ठसंख्या- 30

- छात्राधारिता शिक्षा।[1] अत्र छात्राः आधिक्येन कार्यं कुर्युः।
- स्वाधिगमः – छात्राः स्वज्ञानबलेन एव अनुभवबलेन च अधिगमं कुर्वन्ति।
- छात्रा: कक्षायां अधिकसहभागितां कुर्युः इति प्रयत्नः क्रियते।
- शिक्षकः गतिविधिषु सहयोगं करोति।
- स्वयमेव छात्राः ज्ञानस्य सर्जनं कुर्वन्ति।
- स्वयमेव छात्राः त्रुटिसंशोधनाय प्रयत्नं कुर्वन्ति।
- अर्थाभिव्यक्तेः फलं प्राप्नुवन्ति।
- अनुभवेन ते ज्ञानस्य निष्पादनं कुर्वन्ति।

अनेन रचनावाद्यधिगमक्रमे छात्रा: स्वयमेव विषयस्य अधिगमं कुर्वन्ति।

**रचनात्मकविधेः स्वरूपम्**

रचनाधारेण शब्दाः त्रिधाः भवन्ति- रूढशब्दः, यौगिकशब्दः, योगरूढशब्दश्च। **रूढशब्दः**[2]- यस्य खण्डनं न सम्भवति। यथा- गृहम्, पुरुषः, महिला, कमलः, पुस्तकम् इत्यादयः। **यौगिकशब्दः**- रूढशब्दे कश्चन शब्दः यथा युक्तः भवति अथवा उपसर्गप्रत्ययः च युक्तः भवति तदा ये शब्दाः निष्पद्यन्ते। यथा- पुस्तक+आलयः पुस्तकालयः, विद्या+आलयः विद्यालयः एते रूढेणैव योगेन उत्पद्यन्ते यौगिकाः शब्दाः उच्यन्ते। - **योगरूढः**- योगरूढे शब्दः स्वीयं पृथक् अर्थं प्रददाति। पृथक् अर्थप्रदातारः ये शब्दाः भवन्ति ते योगरूढशब्दाः कथ्यन्ते। यथा– लम्बोदरः न लम्बः वर्तते, न च उदरं वर्तते, तर्हि कः वर्तते? कश्चन अपरः अर्थः जायते। यथा– जलधिः न जलमस्ति न धी अस्ति तर्हि का अस्ति? जलधिः इत्युक्ते समुद्रः। जलजः न तु जलमस्ति न तु जः अस्ति तर्हि कः अस्ति? जलजः जलाद् उत्पद्यते कमलम्। एवं ये शब्दाः सन्ति ते योगरूढाः शब्दाः सन्ति| रचनात्मकाधारेण त्रिधा एतान् शब्दान् विभक्तुं शक्नुमः।

**रचनात्मकशिक्षणस्येतिहासः**

रचनात्मकशिक्षणस्य रचनात्मकविधेः वा दर्शनेन ज्ञायते यत् महाभारत-पंचतंत्र-पातंजलमहाभाष्यादि ग्रन्थेषु अस्य प्रयोगः लभ्यत एव| तर्हि प्राप्यते महाभारते–

**आचार्यात्पादमाधत्ते पादं शिष्यः स्वमेधया।**
**पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च।।**[3]

श्लोके अस्मिन् स्पष्टं जायते यत् यदि शिक्षाध्ययनस्य पादचतुष्टयं क्रियते तर्हि छात्रा: गुरो: केवलं एकं पादमेव अधीयते, स्वबुद्ध्या च शिष्यः एकं पादम्, स्वमित्रैः च एकं पादम्, कालक्रमेण च एकं पादं विद्यायाः प्राप्नुवन्ति।

लिखितमस्ति एवमेव महाभाष्ये पस्पशाह्निके चतुर्भिः प्रकारैः विद्योपयुक्ता भवति।[4]

- आगमकालेन।
- स्वाध्यायकालेन।
- प्रवचनकालेन।
- व्यवहारकालेन च।

समाजे स्पष्टं भवति यत् यावत् छात्रस्य स्वयमेव प्रवृत्तिः न भवति, तावत् विषयस्य पूर्णाधिगमः न जायते। अतः अत्र विषयस्य पूर्णाधिगमाय रचनात्मकविधौ छात्रेभ्यः आधिक्येन अवसरः प्रदीयते। एषः व्याकरणशिक्षणाय अत्यन्तोपयोगी विषयः भवितुमर्हति।

---

[1] उच्चप्राथमिकस्तरीयसंस्कृतशिक्षणसंदर्शिका, शिक्षण-अधिगमकेन्द्रं, श्रीलालाबहादुराशास्त्री राष्ट्रीयसंस्कृतविश्वविद्यालयः, पृष्ठसंख्या- 30

[2] परमलघुमञ्जूषा, नागेशभट्टः, चौखम्भाप्रकाशनम्, वाराणसी

[3] महाभारतं

[4] महाभाष्ये पस्पशाह्निके

बाणभट्टसन्दर्भे पुत्रोत्तरस्योदाहरणे काचित् प्रसिद्धा घटना वर्तते। सः पुत्रौ पृच्छति। एकः पुत्रः वदति[1]- शुष्कः वृक्षः तिष्ठत्यग्रे, द्वितीयः अपि वदति नीरसतरुरिह विलसति पुरुतः। रचनात्मकविधेः वाक्यद्वयेन संद्योतनं भवति अर्थात् पुनः पुनः अभ्यासेन विषयस्य अधिगमकरणेन च ज्ञानं शीघ्रं जायते तदर्थम् अस्माभिः यदि प्रयत्नेन विषयः समुपस्थाप्यते छात्राणां शीघ्रं ज्ञानं जायते। लालित्यपूर्णता च उत्पद्यते अस्यां पद्धत्याम् इकारपञ्चकप्रतिमानं महत्त्वपूर्णं योगदानं प्रददाति। Engage, Explore, Explaining, Elaborate, Evaluate इति[2]। तत्र संलग्नता, अवगाहनम्, व्याख्यानम्, विस्तारणम्, मूल्याङ्कनञ्च।

**व्याकरणाध्यापने रचनात्मविधेः प्रयोगः-**

पदरचना वाक्यरचना च मुखे भवतः, पूर्वं पदरचनाविषये अवधेयं तदनु शनैः शनैः वाक्यसंरचनाविषये स्वयमेव अभ्यासबलेन परिज्ञानं भविष्यति| एतदेवाश्रित्य छात्राणां परिश्रमम् आश्रित्य तैः पदरचनापुरस्सरं क्रियायाः आधारेण वाक्यसंरचनाविषये अभ्यासः कारणीयः अस्ति।

१. पदरचनाविषये अवधानम्- विविधस्तरे पदरचना कथं जायते आदौ विचार्यते-

I. **तिङ्प्रत्यया धारेण पदरचना[3]-**

अस्मिन् क्रियापदे भ्वादिगणस्य पठधातुः तिप्प्रत्यययोजनेन पठति इति सिध्यति। अतः पठति गच्छति, खादति, भवति इत्यत्र ति पदं योजयित्वा लट्-लकारे धातुरूपाणां रचना कर्तव्या। परस्मैपदिभ्यः आत्मनेपदिभ्यः उभयभ्यः धातुभ्यः प्रत्ययाः भवन्ति। उदाहरणं समुपस्थाप्यते यस्य अभ्यासः बृहद्धातुकुसुमांकरं हस्ते निधाय करणीयः। यथा-

परस्मैपदिधातूनाम् उदाहरणं[4]




आत्मनेपदिधातूनाम् उदाहरणं[5]




[1] कादम्बरी, वाणभट्टः, चौखम्भाप्रकाशनम्

[2] उच्चप्राथमिकस्तरीयसंस्कृतशिक्षणसंदर्शिका, शिक्षणअधिगमकेन्द्रं, श्रीलालाबहादुराशास्त्री राष्ट्रीयसंस्कृतविश्वविद्यालयः, पृष्ठसंख्या- 60

[3] लघुसिद्धान्तकौमुदी, गीताप्रेस गौरखपुर, उत्तरप्रदेश

[4] लघुसिद्धान्तकौमुदी, गीताप्रेस गौरखपुर, उत्तरप्रदेश

[5] लघुसिद्धान्तकौमुदी, गीताप्रेस गौरखपुर, उत्तरप्रदेश

ISSN 2348-7828

एवंरीत्या सर्वलकार-गण-आदिधातूनां साहाय्येन उभयपदित्वे अभ्यासः कर्तव्यः।

II. **कृत्प्रत्ययानामाधारेण पदरचना-** कृत्प्रत्ययानामाधारेण अनेकविधप्रक्रियायाः अवलम्बनेन पदरचना कर्तुम् शक्यते|

**१.क्त्वा-प्रत्ययानामाधारेण पदरचना-**




**२.शतृ-प्रत्यययोजनपुरस्सरं पदरचना**[1]- यथा शतृ-प्रत्ययः तु समानः भवति। गम्-धातोः शतृप्रत्ययः गच्छत् खाद्-धातोः शतृप्रत्ययः खादत्। पठ्-धातोः शतृ-प्रत्ययः पठत् लिख्-धातोः शतृप्रत्ययः लिखत् पदरचना भवति एवं कारयित्वा छात्रस्य शीघ्रं व्याकरणावबोधः




सरलतया कारयितुं शक्यते।

**३.शानच्प्रत्यययोजनपुरस्सरं पदरचना**[2]- तत्र कथं शब्दस्य समुत्पादनं भवति? प्रक्रियाबोधनं तत्र वर्धते वर्धमानः। कम्पते कम्पमानः। लज्जते लज्जमानः। लज्ज्-धातोः+शानच्प्रत्ययः= लज्जमानः। एवं कृत्वा पदरचनां कारयित्वा छात्राणां बोधनं कारयितुं शक्यते।

---

[1] *शतृशानजन्तमञ्जरी* ; लेखकः-जि.महाबलेश्वरभट्टः, प्रकाशकः-संस्कृतभारती; पृष्ठसङ्ख्या-36

[2] *शतृशानजन्तमञ्जरी* ; लेखकः-जि.महाबलेश्वरभट्टः, प्रकाशकः-संस्कृतभारती; पृष्ठसङ्ख्या : 3+65.

ISSN 2348-7828




**४.क्त- प्रत्यययोजनपुरस्सरं पदरचना[1]-**

गम्+क्त = गतः,खाद्+क्त = खादितः, पठ्+क्त = पठितः इत्यादयः अनेके अभ्यासाःछात्रैः स्वयमेव करणीयाः, यच्च चित्रात्मकरूपेण अधः कल्पनायै उपस्थाप्यते।




एतेषु उदाहरणेषु क्वचित् इकारः आगच्छति क्वचित् इकारः नागच्छति। एवं रीत्या अपि बोधनपूर्वकं पदरचना कथं भवति? क्तप्रत्यययोजनपुरस्सरं इति छात्राणां रचनात्मकविधिना तेषाम् अभ्यासमुखेन शिक्षकः कारयितुं शक्नोति।

५.क्तवतुप्रत्यययोजनपुरस्सरं पदरचना-

गम्+क्तवतु = गतवत्

खाद्+क्तवतु = खादितवत्

पठ्+क्तवतु = पठितवत् इत्यादिप्रयोगमाध्यमेन पदरचना कथं भविष्यति? इति पदरचनायाः प्रक्रियां छात्राणां कृते शिक्षकः बोधयितुं शक्नोति।

[1] लघुसिद्धान्तकौमुदी, गीताप्रेस गौरखपुर, उत्तरप्रदेश




III. **सुप्प्रत्ययाधारेण पदरचना**[1]




IV. **स्त्रीप्रत्ययाधारेण पदरचना**

छात्रे ङीप्, ङीष्-प्रत्ययाः दीयन्ते।

टाप्-प्रत्यययोजनपुरस्सरमपि शब्दरचनाप्रक्रियां शिक्षकः छात्रान् प्रयोगबलेन अभ्यासबलेन च कारयितुं शक्नोति। यथा-

बालक+टाप्-प्रत्ययः क्रियते + बालिका।

नायक+टाप् प्रत्ययः = नायिका।

चालक+टाप् प्रत्ययः = चालिका

इत्यादिरूपेण छात्राणां स्त्रीलिंगे टाप्-प्रत्यययोजनपुरस्सरम् चिन्तनं कारयितुं शक्यते। उदाहरणरूपेण एतानि कानिचन उदाहरणानि प्रत्ययस्थानि वर्तन्ते।

V. **आरम्भिकस्तरे अक्षरयोजनपुरस्सरं उत मध्यपदपूरणपुरस्सरं पदरचना-** शिक्षकः क-मध्ये रिक्तस्थानं त्यक्त्वा लकारं लिखति छात्रेण पूरणीयः शब्दः। तर्हि किं भविष्यति? कमलम्। ग-मध्ये स्थानं पुनः न इति। मध्यवर्णः योजनीयः तर्हि गमनम्। पदस्तरे एतत्। यथा-पदरचनाभ्यासा:- सामान्यरूपेण विशेषरूपेण वा छात्राणां विशेषाभ्यासाय विविधाभ्यासा: प्रदातुं शक्यन्ते ते यथा-

भ....न= भवनम् .............

खा...न= खादनम् ................

एवं रीत्या अन्यान् अभ्यासान् कारयितुं शक्नुमः।

---

[1] लघुसिद्धान्तकौमुदी, गीताप्रेस गौरखपुर, उत्तरप्रदेश

ISSN 2348-7828

### VI. तद्धितप्रत्यायाधारेण पदरचना

समानप्रत्ययेनानेकशब्दरचनाभ्यासः कार्यते। यथा-

१.ठक्-प्रत्ययपुरस्सरं पदरचना




२. सर्वनामशब्देभ्यः त्रल्-प्रत्ययाधारेण पदरचना[1]




३. प्रातिपदिकशब्देभ्यः तल्-प्रत्ययाधारेण पदरचना




२. सर्वनामशब्देभ्यः थाल्-प्रत्ययाधारेण पदरचना[2]

[1] लघुसिद्धान्तकौमुदी, गीताप्रेस गौरखपुर, उत्तरप्रदेश

[2] लघुसिद्धान्तकौमुदी, गीताप्रेस गौरखपुर, उत्तरप्रदेश




**३. प्रातिपदिकशब्देभ्यः त्व-प्रत्ययाधारेण पदरचना**




२. **वाक्यरचनाविषये अवधानम्-** विविधस्तरे पदरचना कथं जायते आदौ विचार्यते-

I. **प्रथमविभक्तिं योजयित्वा वाक्यरचना**

रामः गच्छति, ते गच्छन्ति, भवान् पठति, इत्यादिक्रमेणानेकवाक्यरचना कर्तुं शक्यते । तस्याः अभ्यासः अभ्यासक्रमे कर्तुं शक्यते

II. **क्रियायाः आधारेण (लकाराणाम् आधारेण)**

**खाद्यताम्-** मया खाद्यताम्, **गम्यताम्-** तेन गम्यताम्, त्यज्यताम्- तेन त्यज्यताम्, उपयुज्यताम्- अस्माभिः उपयुज्यताम् इत्यादिक्रमेणानेकवाक्यरचना कर्तुं शक्यते । तस्याः अभ्यासः अभ्यासक्रमे कर्तुं शक्यते

III. **विविधकारकाणां योजनपुरस्सरं वाक्यरचना**

द्वितीयतृतीयादिकारकाणाम् आधारेण वाक्यरचना कार्यते।

IV. **कर्तृपदचयनपुरस्सरं वाक्यरचना-** अत्र शिक्षकः कर्तृपदवाक्यानि लिखति। छात्रेण तानि वाक्यानि योजयित्वा वाक्यनिर्माणं करणीयं भवति। यथा क्रियापदं तु भवति गच्छन्तीति अपरस्मिन् पार्श्वे त्रयः शब्दाः लिखिताः भवन्ति। बालः, बालिका, बालकाः। गच्छन्ति इति कारणेन किम् आगमिष्यति इत्यस्य अभ्यासं शिक्षकः कारयति। एवमेव द्वित्रान् अभ्यासान् प्रददाति। पठामि लिखति वदति एकस्मिन् कोष्ठके पञ्चशब्दान् लिखति। छात्राः तान् शब्दान् चित्वा कर्तृपदसंयोजनाभ्यासं कुर्वन्ति तेन तेषां भाषाधिगमः संरचनाविधिमाध्यमेन जायते। एवमेव उदाहरणमेकं समुपस्थाप्याते

ISSN 2348-7828

**कर्तृपदयोजनपुरस्सरं वाक्यरचना[1]-**

………………पठामि लिखामि चलामि ।( बालः, अहम्, शिशुः, मातरः)

V. **क्रियापदचयनपुरस्सरं वाक्यरचना[2]-** अनेनैव क्रमेण शिक्षकः कर्तृपदं लिखति क्रियापदं त्यजति। छात्रैः स्वयमेव क्रियापदं योजनीयं भवति। तत्र बहूनि क्रियापदानि लिखितानि भवन्ति। तेन शिक्षकः वारं वारं योजयित्वा अभ्यासं कुरुते। गणेशः पुस्तकं……. (क्रिया) गच्छति[3] पठति लिखति। छात्राः स्वयमेव ततः एकां क्रियां योजयित्वा वाक्यं निर्मान्ति। एतदस्ति क्रियापदयोजनाभ्यासः। द्वित्राणि वाक्यानि तथा निर्मान्ति। पुनः पुनः अनेकक्रियाः लिखित्वा तदर्थं वाक्यरचनायै छात्रान् प्रेरयितुम् शक्नोति[4]।

**रचनात्मकविधेः अभ्यासः- १.पदरचनाभ्यासः, २.वाक्यरचनाभ्यासःच।**

**१.पदरचनाभ्यासः-**

**१.पदरचनाभ्यासः[5]-** तत्र शब्दरचनाभ्यासे बहुधा भवितुमर्हति। तत्र शब्दनिर्माणं प्रथममस्ति शब्दः भवति, छात्रः प्रत्ययैः शब्दानां योजनं करोति। यतः रामःइति लिखितं भवति पञ्चम्यां किं भवेत्? तर्हि ङस् प्रत्ययः लिखितः भवति, छात्रेण सह प्रत्ययः योजनीयः, वाक्यस्य च निर्माणं कर्तव्यम्। एवमेव गणेश+सु, सीता+भ्यस्, एवं छात्रेण स्वयमेव तत्र शब्दरचनाभ्यासः करणीयः। एकप्रत्यययोजनपूर्वकम्। तथैव लिङ्गभेदपुरस्सरं सुप्रत्ययस्य पदरचनासामर्थ्यम् प्राप्तव्यम्। यथा राम + सु पदम् उत्पद्यते रामः।

| | |
|---|---|
| राम + सु | रामः |
| हरि + सु | हरिः |
| गुरु + सु | गुरुः |

सु इति प्रत्ययः समानस्तु अस्ति परं प्रत्येकं पदे स्वीयम् अर्थं समुत्पादयति हरि+सु तत्र तत्र प्रथमान्तत्वम् अर्थं द्योतयति। गुरु+सु इति गुरुः तर्हि यत्र यत्र सर्वत्र प्रथमान्तत्वमेव संसूचितं भवति। तत्र अर्थः तु प्रथमान्तः अर्थः एव ज्ञायते।

एवमेव 'गणेश सु' अपि एतस्य वयम् अभ्यासं कर्तुं शक्नुमः। रचनात्मकविधेः प्रयोगं कर्तुं शक्नुमः।

एवम् अन्यान्यप्रत्ययानां योजनपुरस्सरं पदरचनाप्रक्रिया अनेन रचनात्मकविधिना शिक्षकैः कारयितुं शक्यते। एवं कृत्वा विविधाः अभ्यासाः कार्यन्ते तर्हि छात्राणां स्पष्टं ज्ञानं समुत्पद्यते। एतेषु त्रिषु छात्राः स्वयमेव कृत्वा अधिगमं कुर्वन्ति। अतः रचनावाद्युपागमे इमे विधयः अन्तर्भूताः भवन्ति। केवलम् अभ्यासक्रमभेदः कश्चन परिवृत्तः भवति। रचनात्मकविधौ शब्दपूर्णात्मकः अभ्यासः विधीयते।

३. **क्रियारचनाभ्यासः[6]-**

प्रकृतिप्रत्यययोजनेन शब्दः। धातुं वदति शिक्षकः पुनः प्रत्ययं वदति। गम्-धातुः अस्ति तिप्-प्रत्ययं योजयति तर्हि किं भवति? गच्छति। मिप्-प्रत्ययं योजयति गम्-धातुः तदा किं भवति? गच्छामि। एवं कृत्वा क्रियापदशब्दनिर्माणे क्रियापदनिर्माणप्रक्रियां साधयति शिक्षकः। तदनु क्रियापदयोजनायाः परं शिक्षकः क्रियारूपाणि पुनः कृद्-रूपाणि तत्र शब्दनिर्माणप्रक्रियां करोति। कृद्-रूपेषु गन्तव्यम्। गम्+तव्यत् गन्तव्यम्। कृ+अनीयर् करणीयम्। एवं कृत्वा अभ्यासं कारयति। नाम प्रकृतिप्रत्ययम् एकं प्रकृतिं लिखति अन्ते रूपं लिखति पुनः क्रियायोजनाभ्यासं कारयति संरचनां कारयति। प्रत्यययोजनपूर्वकं कृत्-रूपस्थप्रत्ययानां योजनां कारयति। पुनः तद्धितप्रत्ययस्थानामपि रचनां कारयति। वनितायाः पुत्रः वैनतेयः। अश्वपतेः पुत्रः आश्वपतम्। एवं कृत्वा तद्धितप्रत्ययानाम्। पुनः स्त्रीप्रत्ययान्तरूपैः यथा ङीष्-प्रत्ययं योजयित्वा कुर्वत् कुर्वती। गच्छत् गच्छन्ती। एवं कृत्वा छात्रैः द्वारा अभ्यासं कारयति। पुनश्च वाक्याभ्यासद्वारा व्याकरणे वाक्यानि चित्रं दर्शयति। चित्रद्वारा छात्रैः वाक्यानि वाचयति। तेन वाचनाभ्यासः व्याकरणशुद्धतायाः अभ्यासः चित्रमाध्यमेन शब्दानां कथनाभ्यासेन शिक्षकः वाक्यरचनामाध्यमेन छात्राणां पूर्णं विकासं कारयितुं शक्नोति। तेन छात्राः व्याकरणस्य शब्दानाम् अभ्यासं कर्तुं शक्नुवन्ति। प्रत्यययोजनेन शब्दाः निष्पीड्यन्ते। यथा- धातुभ्यः कृत्प्रत्ययाः प्रातिपदिकेभ्यः तद्धितप्रत्ययाः च जायन्ते।

---

[1] माध्यमिकस्तरीयसंस्कृतशिक्षणसंदर्शिका, शिक्षण-अधिगमकेन्द्रं ,श्रीलालबहादुराशास्त्री राष्ट्रीयसंस्कृतविश्वविद्यालयः, पृष्ठसंख्या- 330

[2] प्रथमादीक्षा, केन्द्रीयसंस्कृतविश्वविद्यालयः, न. दिल्ली

[3] विभक्तिवल्लरी, संस्कृतभारती, बैम्गलूरं

[4] माध्यमिकस्तरीयसंस्कृतशिक्षणसंदर्शिका, शिक्षणअधिगमकेन्द्रं, श्रीलालबहादुराशास्त्री- राष्ट्रीयसंस्कृतविश्वविद्यालयः, पृष्ठसंख्या- 327

[5] माध्यमिकस्तरीयसंस्कृतशिक्षणसंदर्शिका, शिक्षणअधिगमकेन्द्रं, श्रीलालबहादुराशास्त्री-राष्ट्रीयसंस्कृतविश्वविद्यालयः, पृष्ठसंख्या- 328

[6] क्रियापदकोष्टकं, संस्कृतभारती

*ISSN 2348-7828*

४. उपसर्गनियोजनेनापि अर्थपरिवर्तनपुरस्सरं पदरचनाभ्यासः-

- ❖ शब्दः उपसर्गः प्रत्ययः
- ❖ रोगः नि+ रोगः रोग + इन रोगी
- ❖ हारः आ+ हारः आहार+ इन आहारी

अनु-उपसर्गपूर्वकम् अनेकेषां शब्दानां प्रयोगः कर्तुं शक्यते। उपसर्गनियोजनेनापि अर्थपरिवर्तनपुरस्सरं पदरचनाभ्यासः जायते। अन्यच्च यथा अनुशब्दः वर्तते तन्निर्माणाय प्रयत्नः यथा भवेत् तदानुरोधेन एव शब्दः+ क्रिया इत्यनयोः योजनेन पदरचनाभ्यासः कर्तव्यः।

| | शब्दाः | क्रियाः |
|---|---|---|
| अनु | अनुक्रिया | अनुभवति |
| | अनुभवः | अनुकरोति |
| | अनुरागः | अनुतिष्ठति |

अत्र एतेषु सर्वेषु अपि शब्देषु क्रियापदेषु वा समानरूपेण यः कश्चन अपि शब्दः दरीदृश्यते, सः शब्दः तु अनु-उपसर्गः एव। यः अनु-उपसर्गः अन्यशब्दानामपि अर्थं परिवर्तयति, अनु-उपसर्गः अयमेव द्वितीयम् अर्थं च अपि जनयति क्रियायामपि। अतः पदरचनात्वात् अयं विधिः वर्तते रचनात्मकविधिः। अनु-उपसर्गः यत्र तिष्ठति तत्र तत्र स्वरीत्या नियमानुसारं अर्थं समुत्पादयति।

एवमेव अपराणि उदाहरणानि अपि अस्माभिः अवलोकनीयानि यथा- प्रतीति उपसर्गः। प्रतीति उपसर्गः प्रत्येकम् इति पदे एकम् इति पदेन योजनेन प्रत्येकम् एवमेव प्रत्याहारः प्रति आहारः इत्यादिषु शब्देषु स्वीयम् अर्थं भिन्नतया परिबोधयति। श्लोकपूर्तिः, समस्यापूर्तिः इत्यादयः रचना समावलम्बन्ते। तत्रैव रचनात्मकविधौ एकस्य धातोः शब्दस्य वा अनेकप्रत्यययोजनेन स्वरूपरचनानन्तरं क्रियते वाक्यादीनाञ्च रचना विधीयते। अत्र हि रचनात्मकविधौ एकस्य एव प्रत्ययस्य प्रयोगेण अनेके अन्यशब्दाः कथं जायन्ते इति रचना चिन्त्यते तत्र अभ्यासः च विधीयते। रचनात्मकविधौ सुतरां योग्यरीत्या चित्रादीनां रेखाचित्रादीनां च प्रयोगपूर्वकं शीघ्रं रुचिकररीत्या च छात्राणां पुरस्तात् विषयः समुपस्थापयितुं शक्यते। उदाहरणरूपेण प्रोपसर्गयोजनपूर्वमनेकशब्दानां रचनाभ्यासः -




प्र-मध्यभागे लिखितः तस्य च चतुष्प्रकारकं रेखाचित्रं कृत्वा, प्रकोष्ठाः, प्रभागाः, प्रकृष्टं, प्रकारः, प्रफुल्लः, प्रकाशः, प्रभावः इत्यादीन् शब्दान् अपि वयं चिन्तयितुं शक्नुमः। एतेषु सर्वेषु अपि शब्देषु एकरूपात्मकः शब्दः केवलं प्र इति उपसर्गः वर्तते। तस्य उपसर्गस्य साहाय्येन अनेकशब्दानां कल्पना कृता अस्ति। प्र इति पदं तु समानरूपेण दृश्यते। अतः अत्र रचनात्मकविधेः उदाहरणं वयं वक्तुं शक्नुमः। एवमेव तिप्रत्ययं योजयित्वा

**५.ति-प्रत्यययोजनपुरस्सरमनेकधातूनां शब्दाभ्यासः[1]-**

[1] व्याकरण शिक्षणम्, डा. परमेश कुमार शर्मा, अमरग्रंथपब्लिकेशन, २०२४

ISSN 2348-7828




चलति पठति लिखति खादति गच्छति अत्रापि ति-इति प्रत्ययपदम् अनेकक्रियाः निष्पादयति। एवं रीत्या विविधैः अभ्यासैः रचनात्मकविधिना छात्राणां व्याकरणबोधनं कर्तुं शक्यते। यथा भ्वादिगणे भू+ति किं भवति ? भवति। पठ्+ति पठति। ति इति प्रत्ययः समानः छात्रैः पठ् धातुं तिप्रत्ययञ्च युक्त्वा परस्परमेलनेन एकस्य शब्दस्य रचनात्मकं नाम निर्माणं कृत्वा अर्थावबोधं व्याकरणविधौ छात्राणां कारयितुं शक्यते। शीघ्रतया छात्राः अनेन विधिना विषयम् अधिगन्तुं शक्ष्यन्ति।

अदादिगणे - अद् + ति = अत्ति।

शीङ् + ते = शेते।

अधि + इङ् + ते = अधीते।

एवं रूपेण अन्यानपि अभ्यासान् शिक्षकः कारयितुं शक्नोति।

तथैव सि प्रत्यययोजनपुरस्सरं क्रियापदरचनां कारयितुं शक्नोति। यथा

अद् + सि = अत्सि।

शीङ् + से = शेषे।

एवं कृत्वा शेष्वे शेते शेसे इत्यादिषु अपि छात्राणाम् अभ्यासः कारयितुं शक्यते। तेन प्रेरिताः सन्तः छात्राः उपसर्गप्रयोगेण प्रत्ययानां प्रयोगेण च व्याकरणस्य अनेकशब्दरचनासामर्थ्यं अवगत्य तत्र प्रयोगाय सामर्थ्यशीलाः भविष्यन्ति। यद्यपि अन्यविषयाणां पाठनदृष्ट्या एतस्य विधेः विभिन्नरूपेण प्रयोगः भवति तथापि पदानिर्माणदृष्ट्या अत्र व्याकरणपाठनदृष्ट्या वा अनेन रूपेण प्रयोगः शक्यते।

**२.वाक्यरचनाभ्यासः-**

**१.प्रथमविभक्तिं योजयित्वा वाक्यरचनाभ्यासः-**




रामः गच्छति अनेन क्रमेणानेकवाक्यरचना। गमिष्यति, पठिता, अभूत् इत्यादीनामन्यलकाराणामभ्यासः अनेन क्रमेण कर्तुं शक्यते|

**२.क्रियायाः आधारेण वाक्यरचनाभ्यासः- (लकाराणाम् आधारेण)**




अनेन प्रकारेण छात्राणामभ्यासः कारयितुं शक्यते यथा लकारपरिवर्तनपूर्वकं तद्विहाय च- खाद्यताम्- मया खाद्यताम्,गम्यताम्- तेन गम्यताम् इति।

**३.विविधकारकाणां योजनपुरस्सरं वाक्यरचनाभ्यासः- (तृतीया)**




**पुस्तकेन, हस्तेन, मुखेन, पादेन, यानेन इत्यादीनि पदानि उचितवाक्येन सह तृतीयाविभक्तिस्थवाक्यनिर्माणाय योजयन्तु।**
द्वितीयतृतीयादिकारकाणाम् आधारेण वाक्यरचना कार्यते।

**४.कर्तृपदचयनपुरस्सरं वाक्यरचनाभ्यासः-**

वाक्यरचनाकर्म अत्यन्तं प्रेरकं योग्यं च, परं अत्र भूयो भूयः अभ्यासस्य आवश्यकता भवति| तत्र न विशेष-अभ्यासः अपेक्षितः अपितु निरन्तरमभ्यासः कार्यः| येन सुतरां अभ्यासः भवेत्| अत्र शिक्षकः कर्तृपदवाक्यानि लिखति। छात्रेण तानि वाक्यानि योजयित्वा वाक्यनिर्माणं करणीयं भवति। यथा क्रियापदं तु भवति गच्छन्तीति। अपरस्मिन् पार्श्वे त्रयः शब्दाः लिखिताः भवन्ति। बालः, बालिका, बालकाः। गच्छन्ति इति कारणेन किम् आगमिष्यति इत्यस्य अभ्यासं शिक्षकः कारयति। एवमेव द्वित्रान् अभ्यासान् प्रददाति। पठामि लिखति वदति एकस्मिन् कोष्ठके पञ्चशब्दान् लिखति। छात्राः तान् शब्दान् चित्वा कर्तृपदसंयोजनाभ्यासं कुर्वन्ति तेन तेषां भाषाधिगमः संरचनाविधिमाध्यमेन जायते। एवमेव -

**कर्तृपदयोजनपुरस्सरं वाक्यरचनाभ्यासः[1]-**

............................पठन्ति लिखन्ति चलन्ति।(बालः, शिशुः, मातरः)
........................पठसि लिखसि चलसि।(बालः, शिशुः, मातरः, त्वम्)
...........................पठत लिखत चलत।(यूयम्, बालः, शिशुः, मातरः)

---

[1] माध्यमिकस्तरीयसंस्कृतशिक्षणसंदर्शिका, शिक्षणअधिगमकेन्द्रं ,श्रीलालाबहादुराशास्त्री राष्ट्रीयसंस्कृतविश्वविद्यालयः, पृष्ठसंख्या- 330

………………पठामि लिखामि चलामि।( बालः, अहम्, शिशुः, मातरः)

५. **क्रियापदचयनपुरस्सरं वाक्यरचनाभ्यास:[1]-**

वाक्यरचनाकर्म अत्यन्तं प्रेरकं योग्यं च परं अत्र भूयो भूयः अभ्यासस्य आवश्यकता भवति| तत्र न विशेष-अभ्यासः अपेक्षितः अपितु निरन्तरमभ्यासः कार्यः| येन सुतरां अभ्यासः भवेत्| अनेनैव क्रमेण प्राध्यापकः कर्तृपदं लिखति, क्रियापदं त्यजति। छात्रैः स्वयमेव क्रियापदं योजनीयं भवति। तत्र बहूनि क्रियापदानि लिखितानि भवन्ति। तेन शिक्षकः वारं वारं योजयित्वा अभ्यासं कुरुते। सुरेशः पुस्तकं……. (क्रिया) गच्छति[2] पठति लिखति। छात्राः स्वयमेव ततः एकां क्रियां योजयित्वा वाक्यं निर्मान्ति। एतदस्ति क्रियापदयोजनाभ्यासः। द्वित्राणि वाक्यानि तथा निर्मान्ति। पुनः पुनः अनेकक्रियाः लिखित्वा तदर्थं वाक्यरचनायै छात्रान् प्रेरयितुम् शक्नोति[3]।

१. बालकः पुस्तकं ……….(पश्यति, खादति,पठति )
२. बालकः गृहम् ……….(गच्छति ,पश्यति, खादति,पठति )
३. बालकः यानं ……….(गच्छति ,पश्यति, खादति,पठति )
४. बालकः फलं ……….(गच्छति ,पश्यति, खादति,पठति )
५. बालक: अजां ……….(नयति , क्षिपति, खादति ) ।
६. बालक: अवकरं ……….(नयति , क्षिपति, खादति ) ।

अत्र क्रियापदयोजनपुरस्सरमभ्यासं कारयति। शीघ्रतया अवगमः च भवति।

रचनात्मकविधिमाध्यमेन बालः रुच्या, क्षमतया, पूर्वज्ञानाधारेण मित्राणां सहयोगबलेन च सामाजिकपरिवेशेन कक्षागतपरिवेशेन च ज्ञानस्य समार्जनं कर्तुं शक्नुवन्ति। तेषां ज्ञानं स्थिरं सहजं सकारात्मकरूपेण च भवितुमर्हति, यतः तैः स्वयमेव तस्य ज्ञानस्य समर्जनं वाक्यादीनां प्रयोगपूर्वकं प्राप्तमस्ति। अतः तत्र आरम्भिकस्तरात् नाम ककारनिर्माणं, ककारः यकारः इत्यादिनिर्माणपूर्वकं शिक्षकः वाच्यपरिवर्तनं, शुद्धतासम्पादनं, शब्दनिष्पादनं च व्याकरणस्य लक्ष्यमस्ति तत्सर्वं शिक्षकः कारयितुं शक्नोति। अतः निष्कर्षरूपेण वक्तुं शक्नुमः रचनाविधिः व्याकरणशिक्षणे बहुमहत्त्वपूर्णं योगदानं विदधाति। अनेन विधिना यदि शिक्षणं विधीयते तर्हि छात्राणां सहभागितया आधुनिकपरिप्रेक्ष्ये अध्यापनं कारयितुं शक्यते।

## सन्दर्भग्रन्थसूची


1. संस्कृत साहित्य का इतिहास, वाचस्पति गैरेला:, चौखम्बा विद्याभवन, वाराणसी, 1994
2. साहित्यशिक्षणविधिः , लोकमान्यमिश्रः, राजस्थानी, ग्रन्थागारः, जोधपुरम् , प्रथमसंस्करणम् -1998
3. व्याकरणशिक्षणम् , रजनीकान्तशुक्लः, राष्ट्रियसंस्कृतविद्यापीठ तिरुपतिः ,प्रथमसंस्करणम् -2007
4. संस्कृतशिक्षणम् , प्रो. सन्तोषमित्तलः, नवचेतना पब्लिकेशनम्, जयपुरम् , द्वितीयसंस्करणम् -2013
5. कौशलबोधिनी डॉ.एच.आर.विश्वासः, संस्कृतभारती नवदेहली, द्वितीयसंस्करणम् -2006
6. संस्कृतशिक्षणम् - नविनप्रविधयश्च, प्रो.च.ल.ना.शर्मा, डॉ. फ़तेहसिहः, आदित्यप्रकाशनम् जयपुरम् , द्वितीयसंस्करणम्-2008
7. माध्यमिकस्तरीयसंस्कृतशिक्षणसंदर्शिका, शिक्षणअधिगमकेन्द्रं , श्रीलालाबहादुराशास्त्री राष्ट्रीयसंस्कृतविश्वविद्यालयः, पृष्ठसंख्या- 327
8. उच्चप्राथमिकस्तरीयसंस्कृतशिक्षणसंदर्शिका, शिक्षणअधिगमकेन्द्रं, श्रीलालाबहादुराशास्त्री राष्ट्रीयसंस्कृतविश्वविद्यालयः, पृष्ठसंख्या- 60


*********************

[1] प्रथमादीक्षा, केन्द्रीयसंस्कृतविश्वविद्यालयः, न. दिल्ली

[2] विभक्तिवल्लरी, संस्कृतभारती, बैम्गलूरं

[3] माध्यमिकस्तरीयसंस्कृतशिक्षणसंदर्शिका, शिक्षणअधिगमकेन्द्रं, श्रीलालाबहादुराशास्त्री- राष्ट्रीयसंस्कृतविश्वविद्यालयः, पृष्ठसंख्या- 327

ISSN 2348-7828

# साहित्यशास्त्र में प्रतिपादित आगम तत्त्वविमर्श

डॉ. राजकुमार मिश्र[1]

**शोध सार**

संस्कृतसाहित्यशास्त्र की आचार्य परम्परा मे भगवती शारदा से समलंकृत काश्मीर देश का विशिष्ट स्थान है। आलंकारिक मनीषियों में आनन्दवर्धन मम्मट कुन्तक उद्भट्ट कल्हण क्षेमराज आदि अनेक आचार्यों ने काश्मीर भूमि को अपने जन्म से सुशोभित किया। और उन आचार्यो में आचार्य अभिनव गुप्त का विशिष्ट महत्त्व है। अभिनवगुप्त आलंकार शास्त्र के परमाचार्य ही नही अपितु काश्मीर शैवागम के संस्थापक आचार्य हैं। इन्होने भरतमुनि के रससूत्रों की मनोवैज्ञानिक व्याख्या (अभिव्यंजनावाद) कर अलंकार शास्त्र को दर्शन के उच्चशिखर तक पहुंचा दिया और साथ ही शैवागम सिद्धान्त को अपने प्रौढ विचारों और तर्को से सम्पूर्ण देश में प्रचार प्रसार किया। यह आगम भी वेद का अंग है इसको तंत्रशास्त्र भी कहते हैं। तंत्र के प्रथम प्रवक्ता भगवान शिव को माना जाता है। निगमागममूलक भारतीय जनमानस में जिस प्रकार वेद का महत्त्व है उसी प्रकार आगम का भी स्थान है यद्यपि दोनो शास्त्र स्वतन्त्र होते हुए भी परस्पर एक दूसरे के पोषक हैं अतएव वेद और आगम में पोष्यपोषकभाव सम्बद्ध है। वेद ज्ञान कर्म और उपासना के स्वरूप को बताता है तो आगम इनके उपायभूत साधनो का वर्णन करता है। इसलिए वाचस्पति मिश्र ने तत्त्ववैशारदी की योगभाष्य के व्याख्या में आगम शब्द कि व्युत्पत्ति करते हुए कहते हैं आगच्छन्ति बुद्धिमारोहन्ति अभ्युदयनिःश्रेयसोपायाः यस्मात् स आगमः। आगमशास्त्र के विषय में वाराही तंत्र में कहा गया है कि आगम इन सात लक्षणो से समन्वित है, सृष्टि, प्रलय, देवतार्चन, सर्वसाधन, पुरश्चरण, षट्कर्म (शांति वशीकरण स्तंभन विद्वेषण उच्चाटन तथा मरण) साधन और ध्यानयोग।

महानिर्वाण तंत्र के अनुसार इस कलियुग में प्रत्येक मनुष्य पवित्र विचारों से प्रायः हीन है अतएव मनुष्यों के प्रति परम दयालु भगवान शिव ने आगमों का उपदेश भगवती पार्वति को स्वयं दिया, इसलिए कलियुग में आगम सम्बन्धी पुजापद्धति का विशेष महत्त्व बताया गया है, **कलौ आगमसम्मतः**। भारतीय जनमानस ने अपने उपास्य देवता के भेद से वैष्णव आगम शैव आगम और शाक्त आगम भेद से तीन प्रकार के देवता की मान्यता दी है। इन्ही उपास्य देवों को अनेक स्थलों पर आलंकारिक आचार्यो ने वर्णन किया है।

कुंजी शब्द (Key words)- **परा, पश्यन्ती, मध्यमा, वैखरी, आगम, प्रतिभा।**

**विषयोपस्थापन**

प्रस्तुत लेख में अभिनवगुप्त द्वारा प्रतिपादित साहित्य शास्त्र में आगमीय विषयो को यथामति प्रस्तुत करूंगा। अभिनवगुप्त के अनुसार 36 तत्त्वों मे शिव स्वरूप जो शक्ति तत्त्व है वही परा है। सदाशिव पश्यन्ती की अवस्था है अथवा परा का विवर्त पश्यन्ती, मध्यमा और वैखरी संवित् है। शैवागम मत में शक्ति और शक्तिमान में परस्पर भेद नही है। वैयाकरण के मत में यही परा वाग् शब्दब्रह्म है जो मूलाधारस्थ स्पन्दशून्य बिन्दुरूपिणी है। शैव मत में परा वाग् ही चिद्रूप है वह स्वप्रकाशस्वरूप है उसी का नामान्तर प्रतिभा है। अभिनवगुप्त ने ध्वान्यालोक के लोचन नामक व्याख्या ग्रन्थ में इन्हीं चारो वाग् की चर्चा करते हैं। ध्वान्योक की लोचन टीका के प्रथम उद्योत के अन्तिम में कहा - **यदुन्मीलनशक्त्यैव विश्वमुन्मीलति क्षणात्**

**स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम्॥**[2]

प्रस्तुत पद्य की विभिन्न प्रकार से आचार्यो ने व्याख्या किया है। यथा जिस भगवती पार्वति की उन्मीलन शक्ति से क्षणमात्र में विश्व प्रकाशित हो जाता है अपनी आत्मरूपी आयतन में विश्राम करने वाली उस प्रतिभा नामक शि वा को प्रणाम करते है। प्रस्तुत पद्य में कहा गया है जैसे भगवती अपनी कृपाकटाक्ष से हृदय तत्त्व को उन्मीलित करती है वैसे ही सम्पूर्ण विश्व करतलामलकवत् विना किसी अन्य उपकरण से हमारे अन्तःकरण में उद्भासित होने लगता है। अथवा उस रसावेष से वैशद्य निरवद्य सुन्दर कवि और सहृदय के हृदयों मे वर्णनीय वस्तुनिष्ठ कवि प्रज्ञा विशेष को प्रणाम करते हैं जिससे प्रकाशित होकर सम्पूर्ण विश्व प्रतिक्षण नूतनतया प्रतिभासित होने लगता है "यथास्मै रोचते विश्वं तथेदं परिवर्तते"। अभिनवगुप्त के लोचन ग्रन्थ के कौमुदीटीका में टीकाकार संस्कृत व्याख्या करते हुए पूर्वोक्त पद्य की व्याख्या इस प्रकार करते हैं **शिवाशब्देन विश्वसारभूतस्य परमात्मशब्दवाच्यस्य परमेश्वरस्य महीयसी शक्तिः पराशब्दाभिधेया स्वयंप्रकाशाद्वैतरूपा तदव्यतिरिक्तस्वरूपतया तदीयकृत्यसर्वस्वनिर्वहणधुरन्धरा कापि देवताभिधीयते।**[3]

शैव सिद्धान्त के अनुसार विश्व का सारभूत परमात्मतत्त्व शिव की परम शक्ति जो स्वयं प्रकाशस्वरूप **"सर्वस्य स्वप्रकाशरूपा परमार्थतश्चान्तःमुखत्वेन प्रकाशमात्रपरमार्थतया भेदाभावक्रमा"**[4] परावाग् शब्द से वाच्य शिवा है और उसी का नाम प्रतिभा है " **पराशक्तेः**

[1] सहायक आचार्य, के. सं. वि., श्री रणवीर परिसर, कोट-भलवाल, जम्मू।

[2] अभिनवगुप्तकृत लोचनटीका पृष्ठ संख्या 436

[3] लोचनटीका की श्रीमदुत्तुंगकृत कौमुदी टीका पृष्ठ संख्या 439

[4] ईश्वरप्रत्यभिज्ञाविवरण पृष्ठ संख्या 179

**नामान्तरं प्रतिभेति** [1] जो शिव से अव्यतिरिक्त है परिपूर्ण है स्वयं प्रकाश और चैतन्य स्वरूप वाली चितिशक्ति( चितिः स्वतन्त्रा विश्वसिद्धिहेतुः) के उन्मीलन से व्यापार से यह जगत् प्रकाशित है। और यह जो प्रतिभा है अक्रम चिद्रूप है जैसा कि कहा गया है

**या चैषा प्रतिभा तत्तत्पदार्थक्रमरूषिता**
**अक्रमानन्तचिद्रूपा प्रमाता सः महेश्वरः ॥**[2]

**पदार्थक्रमरुषितेति सक्रमा। वस्तुतोऽक्रमैव स्वयं स्वकीयैश्वर्यविलासतः क्रमारुषिततयावभासते इति। ततः क्रमादभासनमूलकारणभूताप्यक्रमैव सा स्वयम्** [3]। वह प्रतिभा सक्रमा और अक्रमभेद से दो प्रकार की है। जो अक्रम है वह स्वप्रकाशरूप है विश्वप्रकाशिका परा संवित् है। जैसा कि कहा गया है **अक्रमा शिवात्मिका स्वप्रकाशा विश्वप्रकाशिनी च परा संवित्** [4]**।**

लोचन के मंगलाचरण में भी अभिनवगुप्त कहते हैं **क्रमात्प्रख्योपाख्याप्रसरसुभगं भासयति तत्सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते** [5] इत्यादि पद्य में प्रख्या का अर्थ प्रतिभा है और उपाख्या का वचन। प्रतिभा और वचन के प्रसार से हृद्य काव्य तत्त्व सर्वोत्कृष्ट है। प्रस्तुत पद्य के सरस्वत्यास्तत्त्वं इस पद की व्याख्या शैवागम अनुसार भी करते सकते हैं सरस्वत्याः शब्दप्रपंचाभिमानिन्याः देवतायाः परमार्थिकं तत्त्वं अर्थात् अबाधितं स्वरूपं तत्त्वं सा च परावाग् क्योकि परा हि स्वप्रकाशचिदात्मनः परमेश्वरस्य महती शक्तिस्तदभिन्ना मुख्या देवता। क्योकि जैसे शक्ति शक्तिमान से व्यतिरिक्त नही है इनके मध्य में परस्पर तादात्म्य है जैसे वन्हि और उसकी दाहकता शक्ति दोनो में परस्पर भेद नही होता उसी प्रकार।

**सा शिवा परमा देवी शिवाभिन्नाशिवंकरी सा खलु स्वरूपज्योतिरेवान्तः परावागनपायिनी**[6]।

यद्यपि अभिनवगुप्त के मत में शक्ति और शक्तिमान में भेद नही हैं परात्रिंशिका में कहते हैं नहि **शक्तिः शिवात् भेदमामर्शयेत्**[7]। परन्तु कहीं कहीं भेद भी देखा जाता है। आचार्य कुन्तक ने वक्रोक्तिकाव्यजीवितम् के मंगलाचरण में कहते हैं कि

**जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनम्**
**शिवं शक्तिपरिस्पन्दमात्रोपकरणं नुमः ॥**[8]

प्रस्तुत पद्य में जगत् निर्माण में जगदीश्वर शिव को शक्ति के परिस्पन्द व्यापार के अतिरिक्त किसी अन्य की आवश्यकता नही है यह बताया गया है। आचार्य अभिनवगुप्त ने अपने मंगल श्लोकों में शिव की परम शक्ति संकोचकलंककालुष्यलेशशून्या भगवती परा संविद् को बहुत अत्यधिक स्मरण किया है ध्वन्यालोक के द्वितीय उद्योत के आरम्भ में अपने लोचन में कहते हैं।

**या स्मार्यमाणा श्रेयांसि सूते ध्वंसयते रुजः**
**तामभीष्टफलोदारकल्पवल्ली स्तुवे शिवाम् ॥**[9]

प्रस्तुत पद्य में भी उसी परम शिव की शिवा शक्ति को स्मरण करते हैं जो परम कल्याण को देने वाली है। प्रथम उद्योत के अन्तिम पद्य में आचार्य अभिनवगुप्त प्रतिभा को शिवा कहते हैं "वन्दे तां प्रतिभां शिवां " उसी प्रकार इस पद्य में शिवा शब्द का अर्थ यदि प्रतिभा माना जाए तो इसका अर्थ होगा कि प्रज्ञा विशेष प्रतिभा संवित् की जैसे उपासना की जाती है वैसे ही आनन्द मंगल को प्रदान करती है क्योकि काव्य के अनुशीलन से ब्रह्मानन्द सहोदर आनन्द की प्राप्ति है और लोकवृत्त में दक्षता प्रदान कर अकल्याण का नाश करता है जिससे अनायास ही चतुवर्गफल प्राप्ति हो जाती है इसीलिए प्रतिभा को सभी फल देने के लिए उदार कल्पलता कहा गया है। वस्तुतः विमर्शरूप ही प्रतिभा है वही कदाचित् परमेश्वर के अनुग्रह से योगी के हृदय में उदित होती है इसलिए उसके स्वात्म ज्ञान को प्रातिभ कहा जाता है।

**यथा एकैव सा परमेश्वरी प्रतिभा अस्मदुक्तिमाहात्म्यकल्पिता एवंविधा अपरिच्छिन्नस्वभावापि सर्वात्मैव** [10]**।**

प्रस्तुत पद्य को भी जब परावाग् परक अर्थ करते है तो वही स्वयं प्रकाश रूप परमार्थ तत्त्व परा संवित् उदारकल्पलता अभीष्टफलप्रदा इत्यादि अर्थ हो जाता है।

प्रथम उद्योत में परा वाक् की चर्चा के पश्चात् द्वितीय उद्योत के लोचनग्रन्थ के अन्त में पश्यन्ती वाक् की चर्चा करते हैं यथा

**प्राज्यं प्रोल्लासमात्रं सद्भेदेनासूत्र्यते यया**
**वन्देऽभिनवगुप्तोऽहं पश्यन्तीं तामिदं जगत्** [11] **॥**

प्रस्तुत पद्य में अभिनवगुप्त कहते हैं कि जिस पश्यन्ती वाक् से यह जगत् सर्वप्रथम प्रतीतिमात्र सत् होता हुआ प्रकाशित होता है अर्थात् ब्रह्म से भिन्नरूप से प्रकाशित होता है उस पश्यन्ती वाग् को प्रणाम करता हूं।

---

[1] काश्मीरशैवदर्शनबृहद्कोश पृष्ठ 414

[2] ईश्वरप्रत्यभिज्ञा 108

[3] काश्मीरदर्शनबृहदकोश 415

[4] काश्मीरदर्शनबृहदकोश पृष्ठ संख्या 415

[5] ध्वन्यालोकलोचन पृष्ठ 35

[6] लोचनटीका की श्रीमदुत्तुंगकृत कौमुदी टीका 43

[7] अभिनवगुप्तकृत परात्रिंशिका पृष्ठ संख्या 03 संपादक महामहोपाध्याय मुकुन्दरामशास्त्री

[8] कुन्तककृत वक्रोक्तिकाव्यजीवितम् पृष्ठ संख्या

[9] अभिनवगुप्तकृत लोचनटीका द्वितीयोद्योत् पृष्ठ संख्या

[10] अभिनवगुप्तकृत परात्रिंशिका विवरण पृष्ठ संख्या 108 संपादक महामहोपाध्याय मुकुन्दरामशास्त्री

[11] अभिनवगुप्तकृत लोचनटीका द्वितीयोद्योत् पृष्ठ संख्या 120

परा पश्यन्ती मध्यमा वैखरी ए चार प्रकार की संवित् हैं। परा संवित् में शब्द और अर्थ में भेद नही होता, जिस प्रकार घट पटादि का बाह्यभेद ब्रह्म में नही होता उसी प्रकार परा संवित् में पूर्ण अभेद होता है। पश्यन्ती संवित् का ग्रहण बुद्धि के द्वारा होता है इसमें बुद्धि भेद को ग्रहण करती है इसलिए कहा गया कि पश्यन्ती संवित् बुद्धि क्षेत्र में वर्तमान होकर इस विश्व को भेद रूप से प्रकाशित करती हैं। परात्रिंशिका में अभिनवगुप्त कहते हैं कि **सा शक्तिः लोकानुग्रहविमर्षमयी प्रथमतः परामर्शमय्या पश्यन्त्या आसूत्रयिष्यमाणानन्तशक्तिताविभिन्ना प्रथमतरं अदेशकालकलितायां सविदि निरूढा तावत् पश्यन्त्युद्भवभविष्यदुक्तिप्रत्युक्त्यविभागेनैव वर्तते** [1]
मध्यमा संवित् के विषय कहते हैं कि -

**आसूत्रितानां भेदानां स्फुटतापत्तिदायिनीम्**
**त्रिलोचनप्रियां वन्दे मध्यमां परमेश्वरीम्** [2] ॥

अर्थात् सूत्रो द्वारा निर्दिष्ट क ख ग इत्यादि ध्वन्यादिभेद को स्पष्टता प्रदान करने वाली (मध्यमा संवित् वैखरी संवित् में स्फुटता को प्रदान करती है) भगवान शिव की प्रिया स्वरूप मध्यमा संवित् को प्रणाम करते हैं। परात्रिंशिका में। अभिनवगुप्त कहते हैं। **मध्यमा पुनः तयोरेव वाच्यवाचकयोः भेदमादर्श्य सामानाधिकरण्येन विमर्शव्यापारः**[3]

मध्यमा संविद् में उपांशु जप के समय में कुछ शब्द का भान होता है ऐसा आचार्य नागेश कहते है। **मध्यमानादश्च सूक्ष्मतरः कर्णपिधाने जपादौ च सूक्ष्मतरवायुव्यंग्यः शब्दब्रह्मरूपस्फोटव्यंजकश्च**[4]। अभिनवगुप्त भी कहते हैं अत्र हि **मध्यमापदे आत्मैव संश्रुणुते नापरः इत्युक्तम् परप्रमातृदर्शनमात्रगोचरजिह्वोष्ठपुटादिसंयोगे तु यद्यपि आत्मनः एव श्रवणं स्यात् न परस्य तथापि मध्यमपादमेव एतत् संपद्यते** [5] अर्थात् आचार्य अभिनवगुप्त कहते हैं कि मध्यमा संविद् में शब्द का श्रवण स्वयं को ही होता है अन्य को नही। अभिनवगुप्त और शैव दृष्टि से ज्ञान क्रिया शक्तिमय शिव परमब्रह्म है महामाया भगवती पार्वति भेदो का सूत्रपात कर जगत् को सत्ता प्रदान करती हैं। मध्यमा और पश्यन्ती भगवती पार्वति की स्वरूप हैं।
चतुर्थ संवित् की चर्चा करते हुए कहते है

**स्फुटीकृतार्थवैचित्र्यबहिःप्रसरदायिनीम्**
**तुर्यां शक्तिमहं वन्दे प्रत्यक्षार्थनिदर्शनीम्** [6] ॥

अर्थात् उस चतुर्थ वैखरी संवित् को प्रणाम करते हैं जो वक्ता के मन में स्पष्ट अर्थवैचित्र्य को श्रोता के कर्ण पर्यन्त अप्रत्यक्ष भी अर्थ को प्रत्यक्ष के सदृश निर्देश करती है।

नागेशभट्ट कहते है कि **वैखरीनादो ध्वनिः सकलजनमात्रश्रोत्रग्राह्यः भेर्यादिनादवन्निरर्थकः। परश्रोत्रेणापि ग्राह्याः वैखरी वागुच्यते**[7] परात्रिंशिका ग्रन्थ में अभिनवगुप्त कहते हैं कि मध्यमा नाद में शब्द और अर्थ में परस्पर भेद नही होता परन्तु वैखरी में शब्द और अर्थ में भेद स्पष्ट होता है। यथा **वैखरी तु तदुभयभेदस्फुटतामय्येव** [8]। वस्तुतः अभिनवगुप्त के सिद्धान्त को नागेभट्ट ने लिया क्योकि दोनों आचार्यो ने वैखरी नाद् में भेद स्पष्ट होता है और सम्पूर्ण जन श्रोत्रग्राह्य होता है ऐसा मानते हैं।

**<u>शोधनिष्कर्ष</u>**

शैवागम के अनुसार परम शैव निराकार पूर्ण ब्रह्म जो सभी तत्त्वों से परे है, जिसका प्रतीक शिवलिंग है, जिसे समाधि की अवस्था में अनुभव किया जाता है, जो शिव है सर्वत्र व्यापक है परन्तु लिंग में लीनतया विद्यमान रहता है, और सदाशिव पश्यन्ती मध्यमा वैखरी संविद् पद वाच्य है, इनमें परस्पर तादात्म्य है। इसी प्रकार शिव और परा संविद् में परस्पर कोई भेद नही है। शक्ति और शक्तिमान में तादात्म्य शैव मत में माना जाता है। इस प्रकार अभिनवगुप्त द्वारा लोचन में प्रतिपादित आगम तत्त्व को यथामति उपस्थापित किया यद्यपि आलंकार शास्त्र में अन्य ग्रन्थों में भी सर्वत्र आगमतत्त्वों का आचार्यो ने विचार किया है परन्तु संक्षेप से लोचन में प्रतिपादित विषय को मैने ग्रहण किया। इति शम्

********************

[1] अभिनवगुप्त परात्रिंशिका पृष्ठ सख्या 03 संपादक महामहोपाध्याय मुकुन्दरामशास्त्री

[2] अभिनवगुप्तकृत लोचनटीका पृष्ठ संख्या 320

[3] अभिनवगुप्तकृत परात्रिंशिका पृष्ठ सख्या 05 संपादक महामहोपाध्याय मुकुन्दरामशास्त्री

[4] नागेशभट्टकृत संपादक सदाशिवशास्त्री द्वितीयसंस्करण परमलघुमञ्जूषा पृष्ठ संख्या 27

[5] अभिनवगुप्तकृत परात्रिंशिका पृष्ठसख्या 71 संपादक महामहोपाध्याय मुकुन्दरामशास्त्री

[6] अभिनवगुप्तकृत लोचनटीका पृष्ठ संख्या 350

[7] नागेशभट्टकृत संपादक सदाशिवशास्त्री द्वितीयसंस्करण परमलघुमञ्जूषा पृष्ठ संख्या 27

[8] अभिनवगुप्तकृत परात्रिंशिका पृष्ठ सख्या 05 संपादक महामहोपाध्याय मुकुन्दरामशास्त्री

ISSN 2348-7828

# पर्यावरण संरक्षण की वैदिक दृष्टि

डॉ सन्दीपकुमारः[1]

**शोध सार**

वर्तमान युग की सबसे गम्भीर चिंताओं में अन्यतम है पर्यावरण संरक्षण। प्राचीन समय में पेड-पौधे, वन, नदियाँ, सरोवर आदि जल के मुख्य स्रोत वायु, अन्न, औषधियाँ आदि सभी स्वच्छ एवं पुष्टिकारक होते थे। इसका कारण था प्रकृति से सामंजस्य रखकर जिया जाने वाला जीवन। पर्यावरण की परिभाषा 'परितः आव्रियते येन तत् पर्यावरणम्' जो सभी ओर से ढंक कर रखे उसे पर्यावरण कहते हैं। वैदिक दृष्टि से विचार करने पर ऋग्वेद के प्रथम दार्शनिक सूक्त 'नासदीय सूक्त' के प्रथम मंत्र[2] में उपस्थापित प्रश्नत्रय में सृष्टि से सम्बन्धित प्रथम प्रश्न 'किमावरीवः' अर्थात् सृष्टि उत्पत्ति से पूर्व यह जगत् किसके द्वारा आवृत्त था। इससे स्पष्ट है कि आवरण किंवा पर्यावरण वैदिक साहित्य में भी चिंतनीय तत्त्व है।

नासदीय सूक्त के अनुसार घोर अंधकार में निगूढ तमस् तत्त्व ( ब्लैक मैटर) उस परमेश्वर की सर्जन एवं अनेकरूपता की कामना से उसकी तपोमहिमा से नानारूप वाली सृष्टि के रूप में प्रतिभासित होने लगा। इस प्रकार परोपकारार्थ हूत यज्ञ से उत्पन्न सृष्टि की नाभि अंतरिक्ष, सिर द्यौ, चरण पृथ्वी और दिशाएँ कर्णरूप थी।[3] पर्यावरण की दृष्टि से प्राकृतिक तत्त्वों पर विचार किया जाए तो तैत्तिरीयोपनिषद् का ऋषि लिखता है कि उस परमात्मा से सर्वप्रथम आकाश उत्पन्न हुआ।[4] प्रकृति के इन पाँच तत्त्वों पर इस पत्र में क्रमशः विचार किया जा रहा है।

1.) **आकाश** – परमात्मा से उत्पन्न सर्वप्रथम प्राकृतिक तत्त्व आकाश है। आकाश को सर्वव्यापक माना गया है। आकाश को सर्वव्यापक माना गया है अत एव ईशावास्योपनिद् में ब्रह्म को आकाश के समान व्यापक कहा गया है।[5] आकाश सर्जन करने के लिए स्थान प्रदान करने वाला तत्त्व है। सभी ग्रह आकाश में ही विचरते हैं, शरीर की धमनियों में रक्त का संचरण भी आकाश के कारण ही संभव है।

आकाश को परिभाषित करते हुए दर्शन ग्रन्थों में उसे शब्द गुण वाला बताया गया है।[6] शब्द आकाश में उत्पन्न होकर वहीं विद्यमान रहता है। जब वही शब्दवान् आकाश कर्णशष्कुली-अवच्छिन्न आकाश में आता है तब शब्द श्रवणगोचर होता है। स्वाभाविक रूप से 20 से 80 डेसिबल ध्वनि को मनुष्य के लिए सहनीय माना गया है।[7] इससे अधिक ध्वनि को हानिकारक माना गया है। इसे ही ध्वनि प्रदूषण कहा जाता है। आधुनिक समय में कारखानों, वाहनों और (डी. जे.)ध्वनि विस्तारक यंत्रों के अत्यधिक प्रयोग से ध्वनि प्रदूषण बहुत अधिक होता है जिसके कारण मनुष्य को रक्तचाप की अनियमितता, अनिद्रा आदि अनेक रोग हो रहे हैं। मोबाइल. टी. वी., इंटरनेट आदि के प्रयोग से तथा परमाणु परीक्षण आदि के द्वारा उत्सर्जित रेडियोधर्मी प्रदूषणों से आकाश के प्राकृतिक तन्तु क्षुब्ध हो रहे हैं जिनसे नभचर पक्षियों के स्वास्थ्य पर भी प्रतिकूल प्रभाव पड रहा है।

वैदिक विज्ञान में इसके विपरीत सामगान आदि का विधान किया जाता है। सभी वेदमन्त्रों के अपने स्वर हैं जो संगीत शास्त्र में प्रयुक्त होने वाले सात स्वर ही है। ये संगीत के सात स्वर वैदिक स्वरों का प्रतीकात्मक रूप हैं। स – षड्ज , रे- रैवत, ग- गान्धार, म - मध्यम, प - पंचाल, ध – धैवत, नि-निषाद में इस प्रकार स्वरों पर आधारित राग-रागिनियों का विकास हुआ, जो ऋतु, मास, प्रातः मध्याह्न, रात्रि आदि के अनुरूप नियोजित किये गए हैं। गायत्री आदि वैदिक छन्दों को दिशाओं का पवित्र करने वाला व दुरितनाशक माना गया है।[8] गन्धर्ववेद पर आधारित संगीत के आधार पर आधुनिक चिकित्सा विज्ञान ने साउंड थेरेपी का आविष्कार किया है। जो बहुत से रोगों के उपचार में सहायक है।

2.) **वायु** - आकाशजन्य वायु पर्यावरण का सर्वप्रमुख तत्त्व है। अत एव इसे प्राणवायु भी कहा जाता है। इसी वायु से श्वास-प्रश्वास का आवागमन संभव है। यह हमारे शरीरों के अन्दर और बाहर संचरण करता है। पृथ्वीस्थ वायुमण्डल में विभिन्न गैसों का आनुपातिक संतुलन है इसमें किञ्चित् भी असंतुलन सृष्टि का विनाशक हो सकता है। वैदिक ऋषियों ने इसी कारण वायु को देवता माना है। कठोपनिषद् में वायु की व्यापकता का उदाहरण देते हुए ब्रह्म की व्यापकता को बताया गया है।[9] दर्शन ग्रंथों में भी प्राण, अपान, समान, व्यान और उदान पाँच प्रकार के प्राण एवं नाग, कूर्म, कृकल देवदत्त एवं धनंजय पाँच प्रकार के उपप्राणों का वर्णन है।

---

1 सहायकाचार्यः , संस्कृत विभाग, नानकचंद ऐंग्लो संस्कृत महाविद्यालय, मेरठ।

2 नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद् गहनं गभीरम्॥ *ऋग्वेद* –10/121/1

3 नाभ्याऽऽऽसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रांस्तथा लोकाँ अकल्पयन् ॥ *ऋग्वेद* – 10/90/14

4 तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्यो अन्नम्। अन्नाद्रेतः। रेतसो पुरुषः। *तैत्तिरीयोपनिषद्* – 2/1/1

5 ओम् खं ब्रह्म। *यजुर्वेद* 40/15

6 शब्दगुणकम् आकाशम् । *तर्कसंग्रहः* – पृष्ठ - 50

7 https://decibelpro.app/blog/how-many-decibels-can-a-human-hear/#2

8 गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्त्या सह ।
बृहत्युष्णिहा ककुप्सूचिभिः शम्यन्तु त्वा ॥ *यजुर्वेद* 23/33

9 वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ *कठोपनिषद्* 2/2/10

पुरुष सूक्त में सृष्टि उत्पत्ति के क्रम में खाद्य पदार्थों की उत्पत्ति के पश्चात् वायव्य जीवों की उत्पत्ति बताई गई है।[1] क्योंकि वायव्य जीव पर्यावरण के लिए बहुत महत्त्वपूर्ण है। वायु की शुद्धता एवं संतुलन ही जीवन का आधार है। वर्तमान समय में औद्योगिक क्रांति, बहुविस्तृत आवासीय निकायों की योजना, अत्यधिक वाहनों का प्रयोग और वातानुकूलन यंत्रों के बहुत प्रयोग के कारण विषाक्त गैसों का उत्सर्जन हो रहा है, जिससे पूरा विश्व अपने अस्तित्व को लेकर सशंकित है। वैज्ञानिकों के अनुसार अग्रिम दो शताब्दियों में पृथ्वी जीवन के अनुकूल नहीं रह जाएगी। वायु प्रदूषण का स्तर विनाशक रूप धारण कर लेगा।

वायु प्रदूषण के निवारण का उपाय वैदिक ऋषियों के प्रकृति संरक्षण के साथ यज्ञमय जीवन ही है। वैदिक मनीषियों ने यज्ञ को सम्पूर्ण ब्रह्माण्ड का केन्द्र बिन्दु माना है।[2] यज्ञ से केवल वायु प्रदूषण ही नहीं अपितु जल पृथ्वी ध्वनि प्रदूषण एवं एतज्जन्य रोगों का निवारण भी किया जा सकता है। अथर्ववेद में कहा गया है कि यज्ञ में दी गई आहुति वायुमण्डल में स्थित रोगाणुओं का इस प्रकार नाश कर देती है जैसे नदी का वेग झाग का।[3] वैदिक मनीषियों ने वायु शोधन हेतु नाना प्रकार की समिधाओं और सामग्री से यज्ञ का विधान किया है। प्रसिद्ध वैज्ञानिक प्रो. ओमप्रकाश पाण्डेय अपनी पुस्तक भारत वैभव में लिखते हैं कि " आम की समिधा जलने पर एथिलीन आक्साइड और प्रोपेलीन गैसों को छोडती है जो वातावरण में विद्यमान क्लोरो फ्लोरो कार्बन जैसी हानिकारक गैसों को नष्ट कर देती है।" लखनऊ स्थित राष्ट्रीय वनस्पति विज्ञान संस्थान ने एक शोध में सिद्ध किया है कि आम की समिधा को जलाने से उत्पन्न होने वाली 'फार्म एल्डिहाइड' गैस प्रबल जीवाणुनाशक है।[4] मंदार, पलाश, खदिर चिडचिडा, पीपल, गूलर, शमी आदि की समिधाओं से निकला धूम अनेक प्रकार के रोगों का नाशक है। भारत सरकार के सांख्यिकी मंत्रालय ने केन्द्रीय प्रदूषण नियंत्रण बोर्ड के साथ मिलकर यज्ञ पर अनेक प्रकार के शोध किये जिसके परिणाम में यह पाया गया कि यज्ञ किये जाने वाले स्थान में यज्ञ से पूर्व और पश्चात् वायु में हानिकारक तत्त्वों की उपस्थिति में भारी कमी पाई गई जो कई दिनों तक बनी रही। वायु हमारे जीवन को प्रत्यक्ष रूप से प्रभावित करती है यह रोगादि दोषों को शरीर से बाहर करता है।[5]

3.) **अग्नि-** अग्नि सृष्टि का तृतीय तत्त्व है। वैदिक परंपरा में अग्नि सर्वाधिक पूज्य देवता है। ऋग्वेद का प्रथम सूक्त अग्नि सूक्त है तथा उसके प्रथम मन्त्र में ही अग्नि को पुरोहित (सर्वाग्रगामी और देवताओं का ऋत्विक्) माना गया है।[6] अग्नि शब्द 'अगि गतौ' धातु से सिद्ध होता है जिससे सभी पदार्थ गतिशील हैं वहीं अग्नि है। निरुक्त में अग्नि का निर्वचन इस प्रकार किया गया है – 'अग्नि: अग्रणी भवति, अग्रं यज्ञेषु प्रणीयते, अङ्गं नयति संनममान:'।[7]

